ISSN : 2454 - 2547/ ISSUE : 7

# *Rasikapriya*

JOURNAL OF MADRAS SANSKRIT COLLEGE-2020

Published by:
The Madras Sanskrit College

Affiliated to University of Madras
(Aided by Rashtriya samskritha samsthanam-H.R.D Ministry Govt. of India New Delhi)
84, Royapettah High Road, Mylapore, Chennai-600 004. PH. 044 24980421.
E-mail: mds.sanskritcollege@gmail.com
website: www.madrassanskrticollege.edu.in

RS. 200/-

विलासः ७

# रसिकप्रिया

JOURNAL OF MADRAS SANSKRIT COLLEGE

सविलासरसोल्लासा सुवृत्ता रसिकप्रिया । सगुणालङ्क्रिया जीयात् पत्रिका सुरगीरिव ॥

प्रधानसंपादकः
आचार्यः ता पे राधाकृष्णन् नम्पूतिरिः

Chief Editor:
Dr. T.P. Radhakrishnan Namboodiri
Principal, The Madras Sanskrit College



ISSN : 2454 - 2547

# JOURNAL OF THE MADRAS SANSKRIT COLLEGE

# रसिकप्रिया

**विलासः – ७**

## RASIKAPRIYA

**ISSUE- 7**

संपादकः

**आचार्यः ता.पे. राधाकृष्णन् नम्पूतिरिः**

*Chief Editor :*

**Dr. T.P. Radhakrishnan**

Principal, The Madras Sanskrit College

*Published by :*

**THE MADRAS SANSKRIT COLLEGE**

(Affiliated to the University of Madras)

(Aided by the Rashtriya Sanskrit Sansthan, New Delhi)

84, Thiru-vi-ka Road (Royapettah High Road), Mylapore, Chennai - 600 004.

Phone : 044-2498 0421 E-mail : mds.sanskritcollege@gmail.com

website : www.madrassanskritcollege.edu.in

**2020**

| | | |
|---|---|---|
| Title of the Book | : | **RASIKAPRIYA**<br>ANNUAL JOURNAL OF THE MADRAS SANSKRIT COLLEGE |
| First Print | : | March 2020 |

© Madras Sanskrit College. All rights reserved. No material / Article be used in any manner without the permission of the Authors and the Madras Sanskrit College.

| | | |
|---|---|---|
| Copies | : | 300 |
| Price | : | **Rs. 200/-** |
| Chief Editor | : | **Dr. T.P. Radhakrishnan,** Principal. |
| Editor | : | **Dr. Mani Dravid,** Associate Prof. & HOD., Mimamsa |
| Editorial Board | : | **Dr. S. Arunasundaram,** Asst. Prof. & HOD., Vyakarana<br>**Dr. Akhileshwara Mishra,** Asst. Prof. in Jyotisha<br>**Dr. K. Shyamasundara,** Asst. Prof. in Vyakarana<br>**Dr. S. Umapathi,** Asst. Prof. in Sahitya |
| Publisher | : | **Dr. T.P. Radhakrishnan,** Principal<br>The Mdaras Sanskrit College<br>84, Thiru-vi-ka Road (Royapettah High Road)<br>Mylapore, Chennai - 600 004. |
| Printer | : | Shri Harish Printers<br>Mandaveli, Chennai - 600 028 |

(Printed and Published by the Madras Sanskrit College, Mylapore, Chennai - 600 004 under financial assistance from the Rashtriya Samskritha Samsthanam, New Delhi, Ministry of H.R.D., Govt. o India).

## विषयानुक्रमणिका


**सम्पादकीयम्** Dr. ता.पे. राधाकृष्णन् नम्बूतिरिः, प्राचार्यः, म.सं.महावि. 01

**पाणिनीयव्याकरणानुसारिवैदिकस्वरविचारः** Dr. K. श्यामसुन्दरः, व्याकरणविभागः, म.सं.महावि. 02

**प्रतिमायां भासतेऽप्रतिमो भासः** Dr. S. उमापतिः, साहित्यविभागाध्यक्षः, म.सं.महाविद्यालयः 10

**महाभारते अद्वैतवेदान्तविमर्शः** Dr. V. रामकृष्णः, सहायकाचार्यः, वेदान्तविभागः, म.सं.महावि. 14

**कर्णभारविषयविवेचनम्** Dr. G. सुरेशः, सहायकाचार्यः, साहित्यविभागः, म.सं.महावि. 20

**वास्तुमण्डलनिरूपणम्** डा. अखिलेश्वर मिश्रः, मद्रपुरी संस्कृत महाविद्यालयः, चेन्नै 24

**प्रश्नशास्त्रे शकुननिरूपणम्** सु . मुरलिः, ज्योतिषविभागः, मद्रपुरीसंस्कृतकलाशाला, चेन्नै 29

**द्वैतसिद्धान्ते साक्षिप्रत्यक्षस्वरूपम्** डा. पि.पि. श्रीधरोपाध्यायः, मद्रपुरीसंस्कृतकलाशाला, चेन्नै 35

**आयुर्वेदस्य दर्शनत्वविचारः।** Prof. S. Venugopalan, Dept of Sanskrit. 41
Sri Jayendra Saraswathy Ayurveda College, Nazarathpet.

**सर्वदर्शनसङ्ग्रहे चार्वाकमतस्य विमर्शः** Dr Sharda Narayanan, 47
Dr MGR Janaki College, Chennai

**भासनाटकचक्रस्थ पञ्चरात्रे शैक्षिकतत्त्वानि** वा. फणिप्रसादः, विद्यावारिधिः, शिक्षाशास्त्रम् 51

**भासरूपकेषु जीवितदर्शनम्** Dr.N.A.Shihab, Asst Prof, Dept of Sahitya, 55
Govt. Sanskrit College, Thripunithura

**भासनाटकचक्रम् - एकम् विवेचनम्** Dr.N.Shashidhar, Sanskrit Lecturer, 59
Vignana Jyothi institute of Arts and Sciences ,
West Marredpally, Secunderabad

**मध्यमव्यायोगे कुटुम्बनिर्वहणम्** Dr. Rajesha. M. D, Lecturer,University College, 65
Mangalore

**भासनाटकचक्रे पञ्चरात्रम्** डा. नरेन्द्र बि एस् , संस्कृतविभागाध्यक्षः , तुङ्गामहाविद्यालयः, 67
तीर्थहल्लि , कर्नाटकराज्यम्

**अहिंसा** मनीष कुमारः, छात्रः, मद्रपुरीसंस्कृतकलाशाला, चेन्नै 70

**मध्यमव्यायोगे भासेनोदाहृतविद्यार्थिलक्षणम्** Dr. M. SRIDHAR RAJAN, 73
Asst. prof &Head, Dep. of Sanskrit, Sri Sankara
Arts & Science college, Enathur, Kanchipuram

| | | |
|---|---|---|
| **स्वप्नवासवदत्ते व्यक्तित्वाध्ययनम्** | डा. रा. चन्द्रशेखरः, उपाचार्यः, शिक्षाविभागः, राष्ट्रियसंस्कृतविद्यापीठम् , तिरुपतिः | 75 |
| **भासनाटके राजनीतिः** | मुरलीकृष्णः ई , शोधच्छात्रः, संस्कृतसाहित्यविभागः, श्रीशङ्कराचार्यसंस्कृतविश्वविद्यालयः, कालटि | 79 |
| **कवि मंगलेश डबराल के साहित्य में सामाजिक आन्दोलन** | Dr. Sathyanarayana HK, Asst Prof of Hindi The Madras Sanskrit College | 83 |

॥ श्रीवाग्देव्यै नमः ॥

# सम्पादकीयम्

**Dr. ता.पे. राधाकृष्णन् नम्बूतिरिः,**

प्राचार्यः, मद्रपुरीसंस्कृतमहाविद्यालयः

**शेषाद्रिनाथविदुषा समारब्धा सतां प्रिया।**

**शास्त्रार्थसंग्रहपरा राजते रसिकप्रिया ॥**

**गुरून् अज्ञानदोषघ्नान् एकदन्तं सरस्वतीम्। व्यासं च दक्षिणामूर्तिं प्रणमामि पुनःपुनः॥**

अस्मद्गुरुभिः दर्शनपारङ्गताद्यनेकबिरुदभूषितैः मद्रपुरीयसंस्कृतमहाविद्यालयस्य प्राक्तनप्राचार्यैः **डा. के. वि. शेषाद्रिनाथशास्त्रि**महोदयैः बहुकालात् पूर्वं समारब्धा, मध्ये नैककारणैः स्तब्धा, प्रगतवर्षे प्राक्तनप्राचार्यैः **डा. नु. वे. देवीप्रसादशर्म**महोदयैः पुनः प्रवर्तिता **रसिकप्रिया**ख्या सहृदयहृदयोल्लासदायिनी इदंकलाशालायाः पत्रिकेयम् **जगद्गुरुश्रीकाञ्चीकामकोटिपीठाधिपतीनां** करुणापूरपूरितानुग्रहविशेषेण पुष्टा, नानामठाधीशानां करुणाकटाक्षपातपात्रभूता, तत्तत्संस्थागतानेकविद्वद्वृन्दविरचितप्रबन्धवरैः समृद्धा, निर्वाहकसमितिसहयोगेन, नवदेहलीस्थ-**राष्ट्रियसंस्कृतसंस्थानस्य** आर्थिकसाहाय्येन, अस्मत्कलाशालायाः अध्यापकानां परिश्रमेणास्मद्धितैषिणां सर्वेषां साहाय्येन च मुहुः प्रकाशनपथमारोहतीति मोमुद्यते मे मनः।

ऐषमो नवदेहलीस्थ-**राष्ट्रियसंस्कृतसंस्थानस्य** आर्थिकसाहाय्येनास्मन्महाविद्यालये समायोजितयोः "**सर्वदर्शनसंग्रहः**" "**भासनाटकचक्रम्**" इति शीर्षकाङ्कितयोः राष्ट्रियसंगोष्ठ्योः विविधप्रदेशीयैः विद्वदग्रेसरैः तत्तन्महामुनिप्रणीतानि नानादर्शनानि, कविकुलगुरुकालिदासेन संस्तुतस्य बाणभट्टप्रशंसितस्य महाकविचक्रवर्तिभासस्य कृतीश्च सागरीकृत्य बहुधा मथित्वा लब्धपीयूषरूपेण नानाविषयेषु प्रस्तुताः प्रबन्धा अपि संगृह्यात्र प्रकाशिताः सन्ति।

अवसरेऽस्मिन् रसिकप्रियायाः संपाद्य प्रकाशने कृतभूरिपरिश्रमेभ्यः अस्मत्कलाशालायाः मीमांसाविभागाध्यक्षेभ्यः महामहोपाध्याय **डा. मणिद्राविड**महोदयेभ्यः, व्याकरणाचार्येभ्यः **डा. एस्. अरुणसुन्दर**महोदयेभ्यः, **डा. श्यामसुन्दर**महोदयेभ्यः, ज्योतिषाचार्येभ्यः **अखिलेश्वरमिश्र**महोदयेभ्यः, साहित्याचार्येभ्यः **डा. एस्. उमापति**महोदयेभ्यः, अन्येभ्यश्च प्रत्यक्षं परोक्षं वा साहाय्यमाचरितवद्भ्यो मदीयान् धन्यवादान् निवेदयामि। **रसिकप्रियां** चेमां सहृदयानां विद्वज्जनानां करकमलयोः सादरं प्रणतिपूर्वकम् उपायनीकरोमि इति शम्॥

# पाणिनीयव्याकरणानुसारिवैदिकस्वरविचारः

**DR.K.SHYAMASUNDARA**
Asst. Prof .of VYAKARANA.
The Madras Sanskrit College.
Mylapore, Chennai.600004.
Mob: 9841371467.
E-Mail: srimalashyam@gmail.com

उदात्तः अनुदात्तः स्वरितः प्रचयः इति चत्वारः स्वराः वेदे प्रसिद्धाः। तत्र **"उच्चैरुदात्तः" "नीचैरनुदात्तः" "समाहारः स्वरितः"** [पा.सू.१.२.२९,३०,३१] इति उदात्तादीनां त्रयाणां लक्षणं पाणिनिना अभिहितम्। ताल्वादिषु सभागेषु स्थानेषु ऊर्ध्वभागे निष्पन्नः अच् उदात्तो भवति , अधोभागे निष्पन्नः अच् अनुदात्तः, उदात्तत्वानुदात्तत्वयोः समाहारो यस्मिन्नचि सः स्वरितः इति तदर्थः। तथा संहितायां, स्वरितात् परस्य अनुदात्तस्य उदात्तसदृशम् ऐकस्वर्यं भवति। तस्यैव प्रचयः इति नाम [1]। तथा च सूत्रं **"स्वरितात् संहितायाम् अनुदात्तानाम्"** [पा.सू.१.२.३९] इति। ऋग्वेदे एते चत्वारः स्वराः एव प्रधानतया दृश्यन्ते । यथा प्रथममन्त्रे – **"अ॒ग्निमी॑ळे"** इति । अत्र अकारः अनुदात्तः, गकारोत्तरः इकारः उदात्तः, मकारोत्तरः ईकारः स्वरितः , ळकारोत्तरः एकारः प्रचयः । तथा हि अग्निशब्दः अव्युत्पत्तिपक्षे **"फिषोऽन्त उदात्तः"** (फि.सू.१ प्रातिपदिकं फिट्, तस्यान्तः उदात्तः स्यात् ) इति अन्तोदात्तः, अर्थात् तत्र नकारोत्तरः इकारः उदात्तः। व्युत्पत्तिपक्षे तु गत्यर्थकात् **'अगि'** धातोः **"अङ्गेर्नलोपश्च"** (उणादि. ४.४९०) इति औणादिकनिप्रत्यये निष्पन्नः अग्निशब्दः । तत्र "**धातोः" [पा.सू.६.१.१६२]** इति सूत्रेण अकारः उदात्तः। **"आद्युदात्तश्च"** [पा.सू.३.१.३] इति प्रत्ययस्वरेण इकारोऽप्युदात्तः। तत्र धातुस्वरे आदौ अवस्थिते सति पश्चात् विधीयमानः प्रत्ययस्वरः अवशिष्यते **"सति शिष्टस्वरबलीयस्त्वम्..."** [वा.६.१.१५८] इति न्यायात्। ततः **"अनुदात्तं पदमेकवर्जम्"** [ ६.१.१५८ ] इति सूत्रेण अकारः अनुदात्तो भवति । तथा च पक्षद्वयेऽपि अग्निप्रातिपदिकम् अन्तोदात्तम् । तदुत्तरः द्वितीयैकवचनम् अम्प्रत्ययः **"अनुदात्तौ सुप्पितौ"** [ पा.सू.३.१.४] इति अनुदात्तः। ततः इकार-अकारयोः **"अमि पूर्वः"[६.१.१०७]** इति यत् पूर्वरूपं , तदपि **"एकादेश उदात्तेनोदात्तः" [ ८.२.५.]** इति उदात्तमेव भवति । तदुत्तरम् ईळे इति कृत्स्नं पदं **"तिङ्ङतिङः"** [८.१.२८] इति सूत्रेण अनुदात्तम् । तत्र पदद्वयसंहिताकाले **"उदात्तादनुदात्तस्य स्वरितः"** [ ८,४,६६.] इति ईकारस्य स्वरितस्वरो भवति । ततः परस्य ळकारोत्तरस्य एकारस्य **"स्वरितात् संहितायाम् अनुदात्तानाम्"**

---

[1] स्वरितादनुदात्तानां परेषां प्रचयःस्वरः। उदात्तश्रुतितां यान्ति एकं द्वे वा बहूनि वा । इति ऋक्प्रातिशाख्यम्

[ **१.२. ३९.**] इति प्रचयः इति स्वरक्रमः । प्रसिद्धाः निषादगान्धारादयः सप्त स्वराः उदात्तादिप्रभवाः एव । तदुक्तं पाणिनीयशिक्षायाम् –

**उदात्ते निषादगान्धारौ अनुदात्ते ऋषभधैवतौ ।**

**स्वरितप्रभावा ह्येते षड्ज-मध्यम-पञ्चमाः ॥** [पा.शिक्षा.१२] इति ।

पाणिनीयव्याकरणे धातोः, प्रत्ययस्य, प्रातिपदिकस्य , समासस्य, तिङन्तस्य, निपातस्य , इत्येवं तत्तच्छब्दानां पृथक् पृथक् स्वराः सन्ति प्रोक्ताः ।एवं तत्तत्स्वराणां मेलने , संहितायां च कथं स्वरभेदो भवति इत्याद्यपि सम्यक् न्यरूपि । एतेषां वैदिकस्वराणां संगीतवत् श्रुतिमाधुर्यं मनोरञ्जकत्वं चैव फलम् इति पामराः चिन्तयेयुः । परन्तु तदपेक्षया मुख्यं फलमस्ति शब्दार्थनिर्णयः । उक्तं च भर्तृहरिणा[1] –

**"संयोगो विप्रयोगश्च साहचर्यं विरोधिता । अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य संनिधिः ॥**

**सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः । शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ॥** इति।

अनेन नानार्थकशब्दानां वाच्यार्थानिश्चये, तदपाकरणपूर्वकम् , अर्थविशेषे तात्पर्यग्राहकत्वेन संयोगादीनामिव स्वराणामपि उपयोगो भवति इति स्पष्टम् ।

महाभाष्ये व्याकरणाध्ययनप्रयोजननिरूपणावसरे शब्दार्थे असंदेहार्थं व्याकरणम् अध्येयम् इत्युक्त्वा इदमुदाहरणं दत्तम् – **"स्थूलपृषतीमाग्निवारुणीम् अनड्वाहीम् आलभेत"** इति । अत्र अनड्वाही इत्यनेन गौः उच्यते । तस्याः विशेषणं स्थूलपृषतीमिति । अत्र संदेहः स्थूला चासौ पृषती च स्थूलपृषती इति कर्मधारयार्थो ग्राह्यः उत स्थूलानि पृषन्ति यस्याः सा इति बहुव्रीह्यर्थः ग्राह्यः इति । तत्र तस्मिन् शब्दे "स्थूलपृषतीम्" इत्यस्ति स्वरः । अयं च पूर्वपदप्रकृतिस्वरः। तेन बहुव्रीह्यर्थनिर्णयः क्रियते । यतो हि समासस्य उत्सर्गतया **"समासस्य"** [ ६.१.२२३.] इति सूत्रेण अन्तोदात्तस्वरो विहितः। बहुव्रीहौ तु **"बहुव्रीहौ प्रकृत्या पूर्वपदम्"** [६.२.१.] इति पूर्वपदप्रकृतिस्वरो विहितः। प्रकृते स्थूलशब्दः **'स्थूल परिबृंहणे'** इति धातोः अच्प्रत्ययेन निष्पन्नः **"चितः"** [६.१.१६३. चितः अन्तः उदात्तः स्यात् इत्यर्थः] इति सूत्रेण अन्तोदात्तो भवति । स च पूर्वपदस्य स्वरः समासेऽपि श्रूयते । अतः अत्र पूर्वपदप्रकृतिस्वरेण बहुव्रीहिसमास एवेति निश्चीयते । तत्पुरुषः अर्थात् कर्मधारयश्चेत् **"स्थूलपृषतीम्"** इति अन्तोदात्तः अभविष्यत् **"समासस्य"** [ ६.१.२२३.] इति सूत्रेण । पूर्वपदप्रकृतिस्वरः तत्पुरुषादावपि क्वचित् दृश्यते एव, परन्तु पाणिनिना तस्यापि **"तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः" [६.२.२.]** इत्यादिसूत्रैः बोधितत्वात् न तत्रापि संदेहावकाशः। तत्पुरुषसमासे तुल्यार्थं तृतीयान्तं सप्तम्यन्तं उपमानवाचि अव्ययं द्वितीयान्तं कृत्यान्तं च यत् पूर्वपदं तत् प्रकृतिस्वरं भवति इति हि सूत्रार्थः ।

---

[1] वाक्यपदीयम्, वाक्यकाण्डम् .श्लो.३१५-३१६

ऋग्वेदेऽपि एवमेव स्वराधारेण समासनिर्णयः क्रियते ।यथा - **"एमाशुमाशवे भर यज्ञश्रियं नृमादनम् । पतयन्मन्दयत्सखम् ॥** इति ऋङ्मन्त्रः ।[ऋ.सं.१.४.७.] ईमिति निपातः इदंशब्दार्थे । **हे यजमान !** आशवे = **कृत्स्नसोमयागव्याप्ताय इन्द्राय** आशुं = **सवनत्रयव्याप्तं**, यज्ञश्रियं = **यज्ञस्य सम्पद्रूपं** , नृमादनम् = **ऋत्विग्यजमानानां हर्षहेतुं,** पतयत् पतयन्तं= कर्माणि प्राप्नुवन्तं , मन्दयत्सखम् यः इन्द्रः मन्दयति = यजमानान् हर्षयति तस्मिन्निन्द्रे तत्प्रीतिहेतुत्वात् सखिभूतोऽयं सोमः । तम् **इन्द्रसखम्** , ईम् आ भर = **इमं सोमम् आहर इति मन्त्रार्थः ।** अत्र **'यज्ञश्रियम्'** इति शब्दस्य यज्ञस्य श्रियम् = सम्पद्रूपम् इति षष्ठीतत्पुरुषत्वेन अर्थो वर्णितः । तत्र कारणं 'यज्ञश्रीः' इति **"समासस्य"** [ ६.१.२२३.] इति सूत्रेण प्राप्तः अन्तोदात्तस्वरः । अत्र तदुत्तरम् अमप्रत्ययस्य **"अनुदात्तौ सुप्पितौ"** [३.१.४] इति अनुदात्तस्य, **यज्ञश्रियम् इति "उदात्तादनुदात्तस्य स्वरितः"** [८.४.६५ ] इति स्वरितस्वरः प्राप्तः इति ज्ञेयम् । बहुव्रीहौ तु अन्तोदात्तो न स्यात् । यतो हि यज्ञशब्दः यज्धातोः **"यजयाचयतविच्छप्रच्छरक्षो नङ्" [३.३.९०]** इति नङ्प्रत्ययेन निष्पन्नः, प्रत्ययस्वरेण अन्तोदात्तो भवति **"सति शिष्टस्वरबलीयस्त्वम्..."** [वा.६.१.१५८] इति वार्तिकात् । अतः अत्र बहुव्रीहौ सति पूर्वपदप्रकृतिस्वरेण **यज्ञश्रियम्** इति स्यात् । तथा च अन्तोदात्तस्वरेण अत्र षष्ठीतत्पुरुषार्थनिर्णयः ।

एवं स्वरेण अर्थनिर्णयस्य क्रियमाणत्वादेव स्वरभेदे अर्थभेदो भवति इत्युच्यते । स्वरदोषे कृते महाननर्थः संभवति इत्येतद्बोधनार्थं श्रुत्युक्ता एका आख्यायिका प्रसिद्धैव । यथा **[दुष्टः शब्दः ] -**

**"मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ।**

**स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्**[1] **॥"** इति शिक्षावचनम्।

पुरा असुराणां स्वस्त्रीयः विश्वरूपाख्यः त्वष्टुः पुत्रः देवानां पुरोहितः आसीत् । सः यागे प्रत्यक्षं देवेभ्यो आहुतिभागं वदन् , परोक्षतया असुरेभ्यः प्रददाति स्म। कुकृत्येनानेन सञ्जातामर्षः इन्द्रः वज्रेण तं जघान । तेन कुपितः त्वष्टा इन्द्रस्य हन्तारं [वृत्रासुरं] उत्पिपादयिषुः आभिचारिकं यागं चकार । तत्र **"[स्वाहा] इन्द्रशत्रुर्वर्धस्व"** इति मन्त्रः ऊहितः [2]। अनेन अभिप्रेतः अर्थस्तु इन्द्रं यो हन्यात् तादृशः पुत्रो मे जायताम् इति । अत्र शत्रुशब्दः शातयिता = मारयिता इत्यर्थकः क्रियाशब्दः , न तु सपत्नपरः रूढः। एवञ्च इन्द्रशत्रुशब्देन विवक्षितोऽर्थः 'इन्द्रस्य शातयिता' इति । अयमर्थः इन्द्रस्य शत्रुः इति षष्ठीतत्पुरुषे एव सिध्यति । तत्पुरुषे च **"समासस्य"** [६.१.२२३] इति अन्तोदात्तस्वरो भवति **'इन्द्रशत्रुः'** इति । तथैव च ऊहितो मन्त्रः । परन्तु ऋत्विजा तत्र **'इन्द्रशत्रुः'** इति आद्युदात्तः पठितः। आद्युदात्ते बहुव्रीहिसमासो भवति । यतो हि इन्द्रशब्दः **"ऋज्रेन्द्राग्र-वज्र-विप्र-कुब्र-चुब्र..."** [उणादिः-१८६] (अनेन एकोनविंशतिः

---

[1] पाणिनीयशिक्षा.५२

[2] तैत्तिरीयसंहितायाम् काण्डम्-२, प्रपाठकः-१,। शतपथब्राह्मणे काण्डं-१, प्रपाठकः-५, ब्राह्मणम् – २. ।

**रन्नन्ताः** निपात्यन्ते) इत्याद्युणादिसूत्रेण **रन्नन्तो** निपातितः । अतः **"ञ्नित्यादिर्नित्यम्"**[६.१.१९७.] इत्यनेन आद्युदात्तो भवति ।**"बहुव्रीहौ प्रकृत्त्या पूर्वपदम्** "[६.२.१.] इत्यनेन समासेऽपि स स्वरः तथैव तिष्ठति । बहुव्रीहिसमासे इन्द्रशत्रुशब्दस्य इन्द्रः शत्रुः =शातयिता=मारकः यस्य सः इत्यर्थो भवति । तेन , 'इन्द्रेण यो मारितो भवेत् तादृशः पुत्रो मे भूयात्' इति प्रार्थितं भवति । तथा च तदुत्पन्नो वृत्त्रासुरः इन्द्रेण हतः इति । अनेन स्वरस्य प्राधान्यं स्पष्टं प्रतीयते । अत एव भगवान् पतञ्जलिः **"वृद्धिरादैच्"** [१.१.१.] इति सूत्रे भाष्ये वदति - **"एवं हि दृश्यते लोके – यः उदात्ते कर्तव्ये अनुदात्तं करोति खण्डिकोपाध्यायः तस्मै चपेटां ददाति अन्यन्मयोक्तम् अन्यत् त्वं करोषि इति"** इति।

**प्रत्ययस्वरः**

एतावता समासे स्वरेण अर्थनिर्णयः कथमिति दृष्टम् । इदानीं प्रत्ययस्वरेण अर्थनिर्णयं पश्यामः । तथाहि- भ्रातृशब्दात् **"भ्रातुर्व्यच्च"** [४.१.१४४.] इति सूत्रेण अपत्त्यार्थे व्यत्प्रत्यये , तकारस्य इत्संज्ञायां लोपे , भ्रातृव्य इति सिद्ध्यति । अस्य भ्रातृव्यशब्दस्य भ्रातुष्पुत्रः अपत्यं वा अर्थः ।

एवमेव भ्रातृशब्दात् **"व्यन् सपत्ने"** [४.१.१४५.] इति सूत्रेण व्यन्प्रत्यये , नकारस्य इत्संज्ञायां लोपे च निष्पन्नः भ्रातृव्यशब्दः अपरः। अस्य, शत्रुः इत्यर्थः । एवञ्च अर्थद्वयस्य सत्त्वात् भ्रातृव्यशब्दप्रयोगे अर्थे सन्देहः अवश्यं भवेदेव । तत्र स्वरेण अर्थनिर्णयः क्रियते ।

भ्रातृव्यशब्दे **'भ्रा॒तृ॒व्यः॑'** इति अन्तस्वरितः, भ्रातृ॑व्यः इति आद्युदात्तश्चेति उभयथा स्वरो भवति । तत्र **'भ्रा॒तृ॒व्यः॑'** इति अन्तस्वरिते भ्रातुरपत्त्यम् इत्यर्थः। यतो हि तत्र 'व्यत्' इति अपत्त्यप्रत्ययस्य तित्त्वात् **"तित्स्वरितम्"** [६.१.१७९.] [तित्प्रत्ययस्य अन्तः स्वरितः स्यादित्यर्थः] इत्यनेन सूत्रेण तस्य स्वरितस्वरो भवति। शत्रुपर्यायस्य तु आद्युदात्तस्वरः **भ्रातृ॑व्यः** इति । तत्र हि प्रत्ययः अस्ति 'व्यन्' इति । तस्य नित्त्वात् तदन्तस्य भ्रातृव्यशब्दस्य **"ञ्नित्यादिर्नित्यम्"** [६.१.१९७. ञिदन्तस्य निदन्तस्य च आदिः उदात्तः स्यात् इत्यर्थः] इत्यनेन आद्युदात्तस्वरो भवति । यथा कृष्णयजुर्वेदे – **"क्षुत् खलु॒ वै म॑नु॒ष्य॑स्य॒ भ्रातृ॑व्यः"** [1], **"भ्रातृ॑व्यं पादयामसि"**, [तै.ब्रा.२.४.२.१५] **"भ्रातृ॑व्यस्याभि॒दास॑तः"** [तै.ब्रा.२.४.२.१४] इत्येवं बहुत्र दृश्यते आद्युदात्तः भ्रातृव्यशब्दः । अत्र भ्रातृव्यशब्दः शत्रुपर्यायः इति शक्यते वक्तुम् ।

---

[1] तैत्तिरीयसंहिता का०-१, प्र०-६, अनु०-७, प०-४.

**ऋग्वेदेऽपि यथा –**

**"अभ्रातृव्यो अना त्वमनापिरिन्द्र जनुषा सनादसि।** [ ऋ.वे. ८.२१.१३.] इति कश्चन मन्त्रभागः इन्द्रस्तुतिपरः। **हे इन्द्र! त्वं** जनुषा=**जन्मनैव अभ्रातृव्यः = शत्रुरहितः**, अना=**अनियन्तृकः,** अनापिः = **बन्धुवर्जितश्च असि** सनात् = **चिरात्** इति मन्त्रार्थः । अत्रापि भ्रातृव्यशब्दः शत्रुपर्यायः । अतः अभ्रातृव्यशब्दस्य शत्रुरहितः इत्यर्थः । इदं च - **"व्यन् सपत्ने"** [४.१.१४५.] इति व्यन्प्रत्ययः" इति व्याख्यानं कुर्वता सायणाचार्येण सूचितम् । अतः भ्रातृव्यशब्दः आद्युदात्त एव स्यात् । परन्तु अत्र **"नञ्सुभ्याम्"** [६.२.१७२.] (नञ्सुभ्यां परं बहुव्रीहौ अन्तोदात्तं भवति) इति बहुव्रीहिसमासस्वरेण अभ्रातृव्यशब्दस्य अन्तोदात्तत्वात् भ्रातृव्यशब्दस्य आद्युदात्तस्वरो न श्रूयते इति ज्ञेयम् । एवं बहुत्र शब्दार्थनिर्णयः स्वरेणैव क्रियते । अत्र तत्पुरुषश्चेत् **"तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः " [६.२.२.] इत्यत्र पठितेन "अव्यये नञ्कुनिपातानाम्"** इति वार्तिकेन पूर्वपदप्रकृतिस्वरे **अभ्रातृव्यः** इति आद्युदात्तः स्यात् ।

**सन्धिविषये स्वरस्योपयोगः -**

सन्धिकार्यविषयेऽप्यस्ति स्वरस्योपयोगः । यथा – **"अनुदात्ते च कुधपरे"** [६.१.१०.] इति पाणिनीयं सूत्रम्। कवर्गधकारपरके अनुदात्ते अतिपरे, एङ् प्रकृत्त्या (यजुषि) स्यात् इति तदर्थः । यथा- **"अयं सो अग्निर्यस्मिन्त्सोममिन्द्रः"** [ ऋ. ३.२२.१.] इति मन्त्रभागः । अत्र 'सो' इति ओकारात् परत्र अग्निरिति कवर्गपरः अनुदात्तः अकारः अस्ति । तस्मात् अत्र प्रकृतसूत्रेण प्रकृतिभावः । अन्यथा **"एङः पदान्तादति"** [६.१.१०५.] इति सूत्रेण **'सोऽग्निः'** इति पूर्वरूपं स्यात् ।

**स्वरेण पदपाठनिर्णयः**

ऋग्वेदे केषाञ्चन मन्त्राणां स्वराधारेण पदपाठोऽपि निर्णीयते यास्काचार्यैः । यथा-

**वने न वायो न्यधायि चाकञ्छुचिर्वां स्तोमो भुरणावजीगः।** इति एकः मन्त्रभागः। [ऋ.सं.१०.२९.१.]

अत्र शाकल्यकृतः पदपाठोऽस्त्येवम् – वने। न । वा । यः । नि । अधायि । चाकन् । शुचिः । वाम् । स्तोमः । भुरणौ। अजीगरिति । इति । मन्त्रार्थः – **हे भुरणौ ! = अश्विनौ!** वने न वायः न्यधायि = **यथा वृक्षे अजातपक्षः शकुनिपुत्रः नीडे निहितः** चाकन् = **(स्वपितरौ) कामयमानः तिष्ठति , तथा** वां=**युवयोः स्वभूतोऽयं स्तोमः वृक्षस्य नीडभूतेषु अस्मासु निहितः** शुचिः= **व्यपगतसर्वदोषः स्वस्वामिनं प्रतीक्षमाणः युवां प्रति** अजीगः=**नित्यं गच्छति** अथवा इन्द्रं कामयमानः तमेव गच्छति इति । ।

अत्र पदपाठे **"वने। न । वा । यः ।"** इत्येवं वा इति, यः इति च पृथक् पदे स्तः । परन्तु यास्काचार्यः अत्र **`वायः'** इति एकं पदं मनुते । तदुक्तम् - वने इव वायः = वेः पुत्रः ....। वेति च, यः

इति च, चकार शाकल्यः, उदात्तं त्वेवमाख्यातम् अभविष्यत् , असुसमाप्तश्चार्थः " इति ।[निरु.६.२८.] अर्थात् वायः इति एकं पदम् । वेः पुत्रः इति तदर्थः । विशब्दात् अपत्त्यार्थक-अण्प्रत्यये निष्पन्नोऽयं शब्दः । यद्यत्र पृथक् पदे अभविष्यतां तर्हि **'अधायि'** इति क्रियापदं सर्वानुदात्तं नाभविष्यत् । अपि तु **"लुङ्लङ्लृङ्क्ष्वडुदात्तः"** [ ६.४.७१.] इति अडागमस्य उदात्तत्वात् **अधायि** इति आद्युदात्तम् अभविष्यत्। यतो हि अत्र सर्वानुदात्तः **"तिङ्ङतिङः"** [ ८.१.२८., अतिङन्तात् पदात् परम् तिङन्तम् अनुदात्तं भवति ] इति सूत्रेण प्राप्तः। स च सर्वानुदात्तः, तिङन्तं यदि यच्छब्दात् परं स्यात् तर्हि **"यद्वृत्तान्नित्यम्"** [८.१.६६.] इति सूत्रेण निषिद्ध्यते । यत्र पदे, यच्छब्दो वर्तते तत् पदं यद्वृत्तम् । ततः परं तिङन्तं नानुदात्तम् इति सूत्रार्थः। प्रकृते **'अधायि'** इति सर्वानुदात्तो दृश्यते। तस्मात् , ततः प्राक् यच्छब्देन नैव भवितव्यम् । यदि यच्छब्दोऽस्ति तर्हि अधायि इत्यत्र अनुदात्तो न स्यात् । तथा च अत्र वायः इति एकमेव पदम् । तथा स्वीकृते एव उक्तः वाक्यार्थोऽपि संगच्छते नान्यथा इति निरुक्तकाराणामाशयः । उक्तञ्च भाष्यकारैरपि - "न लक्षणेन पदकाराः अनुवर्त्याः । पदकारैः नाम लक्षणम् अनुवर्त्यम् । यथालक्षणं पदं कर्तव्यम्"[1] इति । एवं रीत्या पदपाठनिर्णयेऽपि अस्ति स्वराणाम् उपयोगः । एवं वेदे बहुविधोऽस्ति स्वरस्य उपयोगः ।

किञ्च वेङ्कटमाधवाचार्येण स्वरविषये महान् विचारः प्रस्तुतः तत्कृतऋग्वेदभाष्ये । प्रत्येकम् अध्यायस्य प्रारम्भे श्लोकरूपेण बहवो विषयाः तेन प्रोक्ताः । तत्र वेदार्थज्ञाने ऋषिज्ञानं, देवताज्ञानं, छन्दोज्ञानं, विनियोगपरिज्ञानं, ब्राह्मणग्रन्थोक्त-इतिहासज्ञानं, स्वरज्ञानं च अत्यावश्यकम् । तत्रापि स्वरज्ञानम् अतीव प्रामुख्यं भजते। स्वराधारेण क्रियमाणः अर्थनिर्णयः अन्यथा न भवेत् इति स्पष्टं न्यरूपि। तदुक्तम् –

**माधवस्य त्वयं पक्षः स्वरेणैव व्यवस्थितिः ॥**
**अन्धकारे दीपिकाभिः गच्छन्न स्खलति क्वचित् ।**
**एवं स्वरैः प्रणीतानां भवन्त्यर्थाः स्फुटा इति ॥**[2] इति ।

एवं यत्र उदात्तस्वरो भवति अर्थात् पदे, प्रत्यये, प्रकृतौ वा , तत्र उदात्तस्वरयुक्तस्यैव शब्दस्य अर्थः प्रामुख्यं वैशिष्ट्यं वा आवहति । तदुक्तम् -

**तत्रोत्तरपदार्थस्य प्राधान्यं यत्र वर्तते ।**
**उदात्तस्तत्र भवति सुरूपकृत्नुमूतये ॥**

---

[1] महाभाष्यम् ३.१.१०९. (एतिस्तु... इति सूत्रे भाष्ये )

[2] वें.मा.ऋग्भाष्यम् अ०-१.अ०-१. श्लो०-२६. , अ०-१.अ०-८.श्लो०-१२.

**यदि स्वरः पूर्वपदे तदर्थः प्रस्फुटो भवेत् ।** [वें.मा.ऋग्भाष्यम् अ०-१.अ-३.श्लो०-३,५.]

**एवं पदे समासे च यत्रोदात्तो व्यवस्थितः ।**

**वर्णे पदे वा तत्रापि काकुरस्तीति निश्चयः॥** (वें.मा.ऋग्भाष्यं १.१.२२.) इति।

उदाहरणं पश्यामः –

**"ता महान्ता सदस्पती इन्द्राग्नी रक्षं उब्जतम् । अप्रजाः सन्त्वत्रिणः॥** (ऋ. सं. १.२१.५.) इति एका ऋक्। अस्याः अर्थः– **यौ युवां** महान्ता = **महान्तौ** सदस्पती = **यज्ञगृहस्वामिनौ तौ, हे इन्द्राग्नी**! **युवां रक्षः उब्जतं = रक्षांसि हतम्** । **एवम् अत्रिणः=अस्माकं हिंसितारः, युवयोः प्रसादात् अप्रजाः = अनुत्पन्नाः प्रजावर्जिता वा भवन्तु** इति । अत्र **'अप्रजाः'** इत्यत्र नञ् उदात्तोऽस्ति। अतः तदर्थस्यैव प्राधान्यम् , अनुत्पन्नाः = उत्पत्तिरहिताः इति ।[1]

**अपि च ,**

**"अयोद्धेव दुर्मद आ हि जुह्वे महावीरं तुविबाधमृजीषम् ।"** (ऋ. सं. १.३२.६.) इति कश्चन मन्त्रभागः। अर्थः– युद्धासमर्थोऽपि सुरादिना मत्तः यथा अन्यं युद्धाय आह्वयेत , एवं स्वस्य प्रतिपक्षी योद्धा अन्यः कोऽपि नास्ति इत्यहङ्कारयुक्तः दुर्मदो वृत्रः, महावीरं तुविबाधं = **बहूनां शत्रूणां बाधितारं** ऋजीषं = **शत्रूणाम् अपामार्जकं च इन्द्रं युद्धाय आह्वतवान् इत्यस्य अर्थः** [2]। अत्र **'अयोद्धा'** इति पदे नञ् अनुदात्तः । योद्धाशब्दे अस्ति उदात्तस्वरः। तस्मात् तदर्थस्यैव प्राधान्यं भवेत् । दृश्यते च तत् । यथा असमर्थः योद्धा अयोद्धा इति , अविद्यमानः योद्धा अस्य इत्ययोद्धा इति वा । उभयत्र योद्धा इत्यस्यैव विशेष्यत्वरूपं प्राधान्यं दृश्यते। **'अप्रजाः'** इति पूर्वोक्तोदाहरणे तु नञः उदात्तत्वात् तदर्थस्यैव प्राधान्यमासीत् इति स्मर्तव्यमत्र।

उदात्तस्वरयुक्तस्यैव प्राधान्यमित्यत्र निरुक्तकारोऽप्यनुकूलः। तदुक्तम् - **"तीव्रार्थतरमुदात्तम् अल्पीयोऽर्थतरम् अनुदात्तम् " इति** ।( निरु.४.२५.) वचनस्यास्य पूर्वोक्त एवार्थः तद्भाष्ये निरूपितः । शिशुपालवधकाव्यस्य एकं पद्यमपि अमुं विषयं स्मारयति । यथा –

**अनल्पत्वात् प्रधानत्वादंशस्येवेतरे स्वराः ।**

**विजिगीषोर्नृपतयः प्रयान्ति परिवारताम्** ॥ इति [शि.व.२.९०.] ।

यथा अन्ये अनुदात्तादयः स्वराः अनल्पत्वात् प्रधानत्वाच्च अंशस्य = अंशाभिधानस्वरस्य उदात्तस्य , बहुलाध्वनेः परिवारतां गच्छन्ति तथा विजिगीषोः नृपचक्र-नाभितुल्यस्य राज्ञः अन्ये नृपतयः परिवारतां प्रयान्ति = कर्मकराः संपद्यन्ते इत्यर्थः । अत्र उदात्तस्य अनल्पत्वं नाम = न विद्यते अल्पः

---

[1] सायण-स्कन्दस्वामिभाष्ये.

[2] सायण-स्कन्दस्वामिभाष्ये.

यस्मात् इति अनल्पः = अत्यल्पः, एकस्मिन् पदे सकृदेव उच्चार्यमाणत्वात् । एवं विरलत्वादेव तस्य प्राधान्यम् इति ज्ञेयम्।

एवञ्च वैदिकस्वराणां वेदार्थज्ञानादिबहुविधप्रयोजनस्य सत्त्वात् तज्ज्ञानम् अत्यावश्यकम् इति शम्॥

## उपयुक्तग्रन्थसूची

ऋग्वेदप्रातिशाख्यम् - उव्वटभाष्यसंवलितम् , चौखम्बा संस्कृत प्रतिष्ठान् , दिल्ली।

शिशुपालवधम् - संदेहविषौषधिसर्वङ्कषायुतम् चौखम्बा संस्कृत् सीरिस् आफिस् , बनारस् ।

ऋग्वेदः - स्कन्दस्वमि-वेङ्कटमाधव-मुद्गल-भाष्योपेतः, होशिआरपुरम् विश्वेश्वरानन्द वैदिक शोधसंस्थानम् ।

ऋग्वेदसंहिता – श्रीमत्सायणाचार्यकृतभाष्योपेता , वैदिकसंशोधनमण्डलम् , तिलक महाराष्ट्र यूनिवर्सिटी।

ऋग्वेदसंहिता – श्रीमत्सायणाचार्यकृतभाष्येण, कन्नडानुवादेन च सहिता, श्री जयचामराजेन्द्रवेदरत्नमाला, श्रीचामुण्डेश्वरी एलेक्ट्रिक् प्रेस्, मैसूर्।

पातञ्जलं महाभाष्यम् - प्रदीपोद्योतसहितम् , वाणी विलास प्रकाशन् , वाराणसी।

व्याकरणमहाभाष्यम् - नवाह्निकम् , प्रदीपोद्योतच्छायासहितम् , निर्णयसागरमुद्रणालयः, मुम्बई ।

वैदिकस्वरमीमांसा – पं० युधिष्ठिरमीमांसककृता , रामलाल् कपूर् ट्रस्ट्, दिल्ली।

स्वरसिद्धान्तचन्द्रिका – श्रीनिवासयज्वकृता, राष्ट्रियसंस्कृतसंस्थानम् , देहली।

वैयाकरणसिद्धान्तकौमुदी – बालमनोरमातत्त्वबोधिनीसहिता , मोतीलाल् बनारसीदास् , दिल्ली।

काशिका – न्यासपदमञ्जरीभावबोधिनीसहिता, तारा बुक् एजेन्सी, वाराणसी।

निरुक्तम् - दुर्गाचार्यकृतवृत्तिसहितम् , आनन्दाश्रममुद्रणालयः, पुण्यपत्तनम् ।

पाणिनीयशिक्षा – हरिदाससंस्कृतग्रन्थमाला-५९, चौखम्बा संस्कृत् सीरिस् आफिस् , वाराणसी।

*****

# प्रतिमायां भासतेऽप्रतिमो भासः

**Dr. S. Umapathi**

Head, Dept of Sahitya

The Madras Sanskrit College,

Chennai -04

सद्यः परनिर्वृतिप्रदायकं भवतीदं दृश्यकाव्यामृतम् । सर्वाङ्गीणविषयतया दृश्यं काव्यं विशिष्टं भवति श्रव्यात्। तादृशदृश्यकाव्यरचयितृगणाग्रेसरो भाति भासकविः। बहुविधनिदानैः कालिदास – शूद्रक – चाणक्यादिभ्योऽपि प्राचीनोऽयं कविरिति भाषाविज्ञानिभिः निश्चीयते। अतश्च क्रिस्तोः प्राक् द्वितीयशताब्दिमध्ये कवेरस्य कालं पातयन्ति विज्ञानिनः ।

तादृशपुरातनकाले अनेकै रूपकैः जनानामानन्ददायी आसीदयं भासः। रामायण-भागवत-भारत-लोकसम्बद्धकथाश्रितान्यनेकानि रूपकाणि सहृदयमनःप्रह्लादनाय विरचितान्यनेन कविवरेण। तत्र प्रतिमानाटकम् अनन्यादृशं वर्तते। नाम्नि च नूतनत्वमाविष्कृतमनेन प्राचीनकाल एव।

नाटकस्य तृतीयाङ्के रामस्य राज्यविवासेन पीडितस्य दशरथस्य दिष्टान्तं राजकुमारो भरतः प्रतिमां दृष्ट्वा जानातीति, तदानीन्तनकालानुगुणं सम्प्रदायं कथायामन्तःपातयन् , तदनुसृत्य "प्रतिमानाटकम्" इति नाम चकार।

***वाल्मीकिरामायणेन तुलना :-***

यद्यपीदं कथावस्तु रामायणेतिहासेतिवृत्तमेव, तथापि चर्वितचर्वणस्य निरसनाय, नूतनत्वप्रदर्शनाय सहृदयाह्लादजननाय च काव्यसंसारस्रष्टा भासेन रामायणाद्विलक्षणं वस्तु क्वचित्प्रवेश्यते। उदाहरणतया अयोध्याकाण्डकथामारभ्य, तत्र कैकेयीयाचनया दशरथवाक्य-परिपालनाय च वनं गते रामे, मातुलकुलादागतो भरतः प्रतिमादर्शनेन देवकुलिकवचनेन च दशरथपञ्चत्वं जानातीति। एवमेव पञ्चवट्यां रामरावणसंवादः, सुमन्त्रमुखात् सीताहरणादि-विषयश्रवणं भरतस्य, किष्किन्धासुन्दरकाण्डयोः कथां सर्वथा परित्यज्य युद्धकाण्डस्यान्तिमभागं स्वीकृत्य श्रीलङ्कातः स्वप्रियां सीतां समानीय अयोध्यां प्राप्नोद् राघव इत्यनेकत्र विसंवादो दृश्यते ।

किञ्च कैकेय्या कुतः वरः पृष्टः, तत्रापि चतुर्दश वर्षाणीत्यत्र निदानं किम्? इत्यादिप्रश्नाना-मुत्तरदानेन कविर्भासः कैकेयीमनपराधिनीं भर्तृवत्सलाञ्च प्रदर्शयति। तद्यथा तस्यैव कवेर्वाक्येषु :-

सुमन्त्रः :- **तेनोक्तं रुदितस्यान्ते मुनिना सत्यभाषिणा ।**

**यथाऽहं भोस्त्वमप्येवं पुत्रशोकात् विपत्स्यसे ॥**

भरतः :- नन्विदं कष्टं नाम।

कैकेयी :- जात ! एतन्निमित्तमपराधे मां निक्षिप्य पुत्रको रामो वनं प्रेषितः, न खलु राज्यलोभेन। अपरिहरणीयो महर्षिशापः पुत्रविप्रवासं विना न भवति।

भरतः :- तुल्ये पुत्रविप्रवासे कथमहमरण्यं न प्रेषितः ।

कैकेयी :- जात ! मातुलकुले वर्तमानस्य प्रकृतिभूतस्ते विप्रवासः ।

भरतः :- चतुर्दश वर्षाणि किं कारणमपेक्षितानि ?

कैकेयी :- चतुर्दश दिवसा इति वक्तुकामया पर्याकुलहृदयया चतुर्दश वर्षाणीत्युक्तम्।

किञ्च रामायणसदृक्षाणि वाक्यान्यपि तत्र तत्र दृश्यन्ते। यथा कैकेयीवरेण रामः वनं प्रति प्रस्थितः तदा सुतरां क्रुद्धः लक्ष्मणः एवमवादीत् :-

रामायणे :- **सर्वानेव हनिष्यामि मृदुर्हि परिभूयते ।**

**प्रोत्साहितोऽयं कैकेय्या स दुष्टो यदि नः पिता ॥** (अयो. 21,11)

प्रतिमायाम् :- **यदि न सहसे राज्ञो मोहं, धनुः स्पृश, मा दया।**

**स्वजननिभृतः सर्वोऽप्येवं मृदुः परिभूयते ॥** (1.18)

एवमेव रामस्य वनगमनसमनन्तरम् तद्विरहपीडितो राजा दशरथः कौसल्यामिदं वदति :-

रामायणे :- चक्षुर्भ्यां त्वां न पश्यामि कौसल्ये साधु मां स्पृश॥ (अयो, 64.61)

प्रतिमायाम् :- अङ्गं मे स्पृश कौसल्ये न त्वां पश्यामि चक्षुषा॥ (2.18)

***कथापात्राणि :-***

रामायणे प्रत्येकस्य पात्रस्य किञ्चित्किञ्चित् वैशिष्ट्यं प्रदर्शितं महर्षिवाल्मिकिना । तथैव कविभासेनाऽपि विशिष्टपात्राणां विलक्षणवर्णनं कृतं वर्तते।

***श्रीरामः*** :-

श्रीरामस्योत्तमगुणो भवति धीरता त्यागो वा। पितृवाक्यपालनार्थं राज्यमपि त्यक्तवानिति सर्वैः प्रशस्यते। स्वयं वाल्मीकिरपि तत्र **"तदप्रियममित्रघ्नो वचनं मरणोपमम्। श्रुत्वा न विव्यथे रामः कैकेयी चेदमब्रवीत्॥"** (अयो.19.1) इति मरणतुल्यदुःखेनापि न दुःखित इति वदति। सन्दर्भमिमं भासकविः इत्थं रामवचसैव वर्णयति :-

**"राज्ञाऽऽहूय विसर्जिते मयि, जनो धैर्येण मे विस्मितः।**

**स्वः पुत्रः कुरुते पितुर्यदि वचः कस्तत्र भो विस्मयः॥"** इति।

किञ्च कैकेय्यामीषदप्यगुणारोपं न करोति रामः इति रामस्य उन्नतगुणपरिपूर्णतां प्रदर्शयति कविः। यथा "कैकेयी वचसा खलु अभिषेको निवृत्त" इति वदन्तं काञ्चुकीयं प्रति रामः - "आर्य ! गुणाः खल्वत्र । भवान् खलु अस्मत्पक्षपातादेव नार्थमवेक्षते । कुतः, 'शुल्के विपणितं राज्यं पुत्रार्थे यदि याच्यते। तस्या लोभोऽत्र ? नास्माकं भ्रातृराज्यापहारिणाम्'?" इति।

इत्थं "यथाऽहं पितरं सत्यसन्धं कर्तुमिच्छामि तथैव माता कैकेय्यपि विवाहकाले पित्रा दत्तं वाक्यं सत्यापयितुं प्रयतते" इति श्रीरामस्य उदारगुणं प्रकटयति कविः।

किञ्च लक्ष्मणकोपशमनेच्छू रामस्तदानीं स्वीयं कोपं प्रकटय्य "भो लक्ष्मण ! सत्यपालके ताते दशरथे, उत स्वधनं याचमानायां मातरि कैकेय्याम् , अथवा दोषविहीने भरते वा अस्त्रं त्यजानि किम्?" इति "किं रोषणाय रुचिरं त्रिषु पातकेषु" इति तत्कोपं प्रशमयति। इत्थं धीरवीरपुरुषरूपेण रामः चित्रितः ।

***सीता*** :-

'स्वराज्यच्युतिं कथं सीतायै निवेदयामि' इति आकुलीभूतस्य रामस्य निकटे 'प्रियं मे, महाराज एव महाराजः, आर्यपुत्र एवार्यपुत्रः' इति वदन्ती सीता द्विगुणितसन्तोषयुक्ता जाता इति प्रदर्श्यते कविना । अतः रामापेक्षयाऽधिका अथवा रामसमानैव सीता, 'दिष्ट्या स एवास्मि रामः, महाराज एव महाराजः' इति रामवचनसत्त्वात्। अनेन सन्दर्भेण नायकयोः समानहृदयता कविना प्रादर्शि, यदुक्तं मारुतिना सुन्दरकाण्डे 'अस्या देव्या मनस्तस्मिन् तस्य चास्यां प्रतिष्ठितम्' इति।

*भरतः* :-

'भरताय परं नमोस्तु तस्मै प्रथमोदाहरणाय भक्तिभाजाम्' इति देशिकवर्यवचनानुसारं सर्वभक्ताग्रेसरस्य भरतस्य विशिष्टं वर्णनं कृतं वर्तते भासेनात्र। स्वं द्रष्टुं वनमागतं भरतं विलोक्य विस्मितो रामः सीतासकाशं वदति "तं चिन्तयामि नृपतिं सुरलोकयातं येनायमात्मजविशिष्टगुणो न दृष्टः" इति। ततः भरतं प्रति :-

**'यत्सत्यं परितोषितोऽस्मि भवता, निष्कल्मषात्मा भवान्।**

**त्वद्वाक्यस्य वशानुगोऽस्मि, भवतः ख्यातैर्गुणैर्निर्जितः॥'**

इति वदन् रामः भरतस्य गुणैः आत्मनः तदधीनत्वं प्रकटयति। अनेन सन्दर्भेण कविः नाटकेऽस्मिन् भरतस्यैव नायकत्वमुररीकरोति।

एवमेव स्वकीयपितृभक्त्यपेक्षया भरतस्य भ्रातृभक्तिरेवोत्तमेति वदन् श्रीरामः :-

**'सुचिरेणापि कालेन यशः किञ्चिन्मयाऽर्जितम्।**

**अचिरेणैव कालेन भरतेनाद्य सञ्चितम् ॥'**

इति किञ्चिदीर्ष्ययाऽपि मोमुद्यते, इति भरतस्योत्तमनायकत्वं रामवचोभिरेव प्रकटितवान् कविर्भासः॥

एवंप्रकारेण प्रतिमानाटके अप्रतिमरूपेण कविर्भासो भासते इति शम् ॥

******

# महाभारते अद्वैतवेदान्तविमर्शः

**Dr.V. RAMAKRISHNAN**
Asst. Prof . of Advaita Vedanta.
The Madras Sanskrit College.
Mylapore, Chennai.600004.
Mob 9841021148 / 7010968760.
E-Mail raksaram@gmail.com

**महाभारतशब्दव्युत्पत्तिः -ः**

"महत्त्वात् भारवत्वात् च महाभारतमुच्यते" इति महाभारतशब्दस्य व्युत्पत्तिः दृश्यते। भरतान् भरतवंश्यानधिकृत्य कृतो ग्रन्थः भारतम्। भारं वेदादिशास्त्रेभ्योऽपि सारांशं तनोति इति भारतम् इति वाचस्पत्ये। मोक्षपर्यवसायित्वात् महत्त्वम्। एवं विषयगौरवात् भारवत्त्वमिति समन्वयः।

**व्यापकत्वम्** -ः

सर्वेष्वपि शास्त्रेषु तथा असङ्ख्याकासु स्मृतिषु च अनुगतत्वात् तदाश्रित्य तदवलम्ब्य वा काव्यनाटकादीनाञ्च अभ्यागतत्वात् , मन्वादिस्मृतिग्रन्थानां तथा गौतमधर्मसूत्रादीनाञ्च अभ्यागतत्वात् तस्य व्यापकत्वम् सङ्गच्छते। भास-भारव्यादीनां कवीनां, तत्कृतकाव्यनाटकादीनां च तदाश्रितत्वात् महाभारतस्य महत् गौरवम् दृश्यते। यद्यपि तेषां कवीनां प्रतिभाकौशलं वर्णनाशैली च अनितरसाधारणं दरीदृश्यते तथापि **महाभारता**श्रितत्वात् एव तेषाम् आदरः विपुला ख्यातिः महद्गौरवञ्च इदानीमपि जगद्व्याप्तं वर्तते।

**वैशिष्ट्यम्**--ः

एवंभूतस्य महाभारतस्य अद्वैतवेदान्त-शास्त्रोपकारकत्वं ब्रह्मसूत्रादिग्रन्थेषु अनेकत्र दृश्यते । आदिशङ्करभगवत्पादैः अस्मादेव स्मृतिग्रन्थात् वचनानि अनेकत्र उल्लिख्यन्ते। वनपर्वणः, उद्योगपर्वणः, शान्तिपर्वणः, भीष्मपर्वणश्च, उल्लेखाः अनेके उद्धृताः दृश्यन्ते ब्रह्मसूत्रभाष्ये। देवताधिकरणे, कृतात्ययाधिकरणे, तथा प्रमिताधिकरणे च अधिकरणविषयोपस्थापने महदुपकारकत्वेन वर्तन्ते महाभारतगतश्लोकाः। सन्दिग्धोपनिषद्वाक्यमेव अधिकरण-विषयवाक्यत्वेन स्वीकृत्य विचार्य ततः तात्पर्यनिर्णयार्थं यथा अन्यानि श्रुतिस्मृत्यादीनि वाक्यानि उपकुर्वन्ति तथा महाभारतगतश्लोकाः अपि सन्दिग्ध-उपनिषद्वाक्यनिर्णये महदुपकारं कुर्वन्ति। महाभारतात् उद्धृतोल्लेखानां प्रकरणतात्पर्यं किम् ? तथा यदर्थम् एते उल्लेखाः अद्वैतशास्त्रे उद्धृताः उपयुक्ताश्च वर्तन्ते, तत्रत्यप्रकरणतात्पर्यं च कथम्? अनयोः

सामञ्जस्यं केन रूपेण वर्तते? एवम् अद्वैततात्पर्योपोद्बलनसार्थक्यं सामर्थ्यञ्च महाभारतश्लोकानां कया रीत्या अस्ति? इति सविमर्शं स्थालीपुलाकन्यायेन किञ्चिदिव उपस्थाप्यते। अत्र प्रथममस्ति प्रतिषेधाधिकरणम्।

## प्रतिषेधाधिकरणम्

ब्रह्मसूत्रस्य चतुर्थाध्याये द्वितीयपादे वर्तते प्रतिषेधाधिकरणम्। तस्मिन्नधिकरणे अयं विषयो विचारितो वर्तते यत् निर्गुणब्रह्मविद् यो वर्तते तस्य उत्क्रान्तिर्नास्ति इति। तत्र संशयस्तु एवम् – "न तस्मात् प्राणा उत्क्रामन्ति"(श.ब्रा.१४.७.२.८) इत्यत्र किं जीवात् प्राणोत्क्रान्तिः प्रतिषिध्यते उत शरीरात् इति। "योऽकामो निष्काम आप्तकाम आत्मकामो न तस्मात् प्राणा उत्क्रामन्ति"(श.ब्रा.१४.७.२.८) इति जीवादेव प्राणोत्क्रान्तिप्रतिषेधः कृतः, न शरीरात् इति पूर्वपक्षः। तत्र उच्यते– "यत्राऽयं पुरुषो म्रियते उदस्मात् प्राणाः क्रामन्त्याहो न" इति आर्तभागेन कृतप्रश्नस्य "नेति होवाच याज्ञवल्क्योऽत्रैव समवनीयन्ते" (बृ.उ.३.२.११) इति याज्ञवल्क्योक्तोत्तरात् निर्गुणब्रह्मविदः देहात् उत्क्रान्तिर्नास्तीति सिद्धान्तः उक्तः। अयमेव विषयः महाभारतेऽपि श्रूयते इति "स्मर्यते च" इत्येतस्मिन् सूत्रव्याख्याने उपोद्बलकतया स्मृत्यन्तर्गतभारतश्लोकः उद्धृतो वर्तते श्रीमदादिशङ्करभगवत्पादाचार्यैः –

**"सर्वभूतात्मभूतस्य सम्यग्भूतानि पश्यतः।**
**देवा अपि मार्गे मुह्यन्ति अपदस्य पदैषिणः"॥**

(म.भा.१२.२३९.-२३) इति। सर्वेषामपि भूतानां प्रत्यग्रूपेण आकाशतुल्यत्वेन च विद्यमानस्य विभोः प्राप्यस्थानं किमपि नास्ति । परिच्छेदाभिमानिनामेव देवयानपितृयाणान्यतरमार्गः वर्तते। अतः तन्मार्गान्वेषणे देवाः अपि मोहिताः वर्तन्ते इति। मार्गरहितस्य ब्रह्मबुभूषोः अत्रैव समवलीनप्राणत्वं नाम एकीभावेन लीनत्वमिति। वैयासकिः मुमुक्षुः शुकः सगुणब्रह्मविद्याबलेन सह शरीरेण आदित्यमण्डलं प्रस्थितवान्। पित्रा व्यासेन च अनुगम्यमानः आहूतश्च सः भोः इति प्रतिश्रृण्वन् गतवान्। इत्यतः सर्वगतब्रह्मात्मभूतानां ब्रह्मविदामपि उत्क्रान्तिः दृश्यते इतीयं शङ्का असमीचीना। यतो हि यद्यशरीरेण स गतः स्यात् तर्हि सर्वप्राणिदृश्यत्वं न स्यात् , सर्वभूतदृश्यत्वोपन्यासात् । अतः सशरीरगतत्वं तु विशिष्टदेशप्राप्तिपूर्वक-शरीरोत्सर्गाय एव इति मन्तव्यम्। स्मृत्यन्तर्गतभारतश्लोकः अत्र प्रमाणीक्रियते श्रीमदादिशङ्करभगवत्पादाचार्यैः –

**"शुकस्तु मारुताच्छीघ्रां गतिं कृत्वाऽन्तरिक्षगः।**
**दर्शयित्वा प्रभावं स्वं सर्वभूतगतोऽभवत् "॥** इति।

शुकः पवनापेक्षया जवेन अन्तरिक्षं प्राप्य स्वप्रभावं च प्रदर्श्य सर्वान्तरात्मत्वं गतः इति । अतः ब्रह्मविदः गत्युत्क्रान्त्यभावः सिद्धान्तितः॥

## कृतात्ययाधिकरणम्

ब्रह्मसूत्रे तृतीयाद्यायस्य प्रथमपादे द्वितीयमधिकरणमस्ति कृतात्ययाधिकरणम्। "तस्मिन् यावत्संपातमुषित्वा" इत्यारभ्य श्वादियोनिपर्यन्तं विद्यमानच्छान्दोग्यवाक्यम् अत्र विषयः। स्वर्गलोक-गमनमधिकृत्य विचारं कृत्वा प्रत्यागमनमधिकृत्य विचार्यते। स्वकृतकर्मफलभोगार्थं स्वर्गलोकं गताः कर्मिणः संपूर्णं कर्मफलं भुक्त्वा सानुशयम् अवरोहन्ति उत कर्मशेषं विना आगच्छन्ति वा ? इति संशयः। कर्मणा युक्ताः सन्तः इह अवरोहन्ति इति निर्धारयितुम् अधिकरणमिदमारभते। "यावत् संपातमुषित्वाथैतमेवाध्वानं पुनर्निवर्तन्ते " इति श्रुतौ "यावत्संपातमुषित्वा" इति यावत्कर्मफलभोगः तावत् तत्र तस्य स्थितिः इति उक्तत्वात् कर्मावशेषं विनैव तस्य प्रत्यागमनम् इति पूर्वपक्षः। येन कर्मणा ते चन्द्रलोकम् आरूढाः फलोपभोगाय सर्वमपि उपभोगेन क्षपयित्वा तदितरकर्मविशिष्टाः अवरोहन्ति। "तद्य इह रमणीयचरणाः, अथ य इह कपूयचरणाः" इति इयं श्रुतिः पुण्यकर्मणाम् उत्कृष्टयोनित्वं पापकर्मणाम् अधमयोनित्वञ्च स्यात् इति बोधयति। यदि कर्मशेषं विना अवरोहणम् इति उच्येत तर्हि इयं श्रुतिः विरुध्येत। अस्याञ्च श्रुतौ रमणीयकपूयचरणयोः निर्दिष्टत्वात् चन्द्रलोके उपभोगप्रापककर्मातिरिक्तेन पुण्येन पापेन वा विशिष्टाः एव सन्तः अवरोहन्ति इति स्पष्टं प्रतीयते। तस्मात् सानुशयाः एव अवरोहन्ति इति। यथा अत्र श्रुतिप्रमाणं प्रदर्श्यते तद्वत् स्मृतिप्रमाणमपि उदाह्रियते श्रीशङ्करभगवत्पादैः।

**"कदाचित् सुकृतं कर्म कूटस्थमिव तिष्ठति।**
**मज्जमानस्य संसारे यावद् दुःखाद्विमुच्यते॥"**

(म.भा.२९०.१८) इति। अर्थस्तु एवम्— भवसागरे निमज्जतः पुण्यकर्म कदाचित् कूटस्थमिव तिष्ठेत् , यावत् अस्य दुःखनिवृत्तिः न जायते। ततः दुःखात् यदा विमुक्तो भवति ततः पुण्यकर्मफलोपभोगस्य प्रारम्भः। ततः पुण्यकर्मोपभोगानन्तरं पुनः पापकर्मोपभोगः इत्येवमनुवर्तते। अनेनापि ज्ञायते यत् पुण्येन पापेन वा कर्मणा विशिष्टाः सन्तः चन्द्रमण्डलाधिरूढाः अवरोहन्ति इति॥

## प्रमिताधिकरणम्

ब्रह्मसूत्रस्य प्रथमाध्याये तृतीयपादे वर्तते प्रमिताधिकरणम् । "अङ्गुष्ठमात्रः पुरुषो मध्ये आत्मनि तिष्ठति" इति श्रूयते। "तथा अङ्गुष्ठमात्रः पुरुषो ज्योतिरिवाधूमकः। ईशानो भूतभव्यस्य स एवाद्य स उ श्वः। एतद्वै तत्" इति काठकश्रुतिरेव अत्र विषयः। शरीरमध्ये विद्यमानत्वेन निर्दिष्टः अङ्गुष्ठमात्रः पुरुषः जीवो वा उत परमात्मा इति संशयः। अङ्गुष्ठमात्रत्वं जीवस्यैव उपपद्यते बुद्ध्युपाधिकत्वेन हृदये विद्यमानत्वात्। अतः उपाधिमूलकत्वात् देहमध्यस्थितत्वात् च अङ्गुष्ठमात्रत्वं जीवस्य संभवति। सर्वव्यापकत्वात् परमात्मनः अङ्गुष्ठमात्रत्वं न संभवति। विज्ञानात्मनः अङ्गुष्ठमात्रत्वं उपाधिमत्त्वात् कथञ्चित् कल्पनया संभवति इत्यत्र महाभारतस्य वनपर्वणः श्लोकः उद्ध्रियते पूर्वपक्षदृढीकरणाय।

**"अथ सत्यवतः कायात्पाशबद्धं वशं गतम्।**

**अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष यमो बलात्॥"** (म. भा.३.२१७.-१७) इति॥

यमः बलात् परमेश्वरम् आक्रष्टुं न शक्नुयात्। सत्यवतः शरीरात् पाशेन स्वायत्तीकृतम् अङ्गुष्ठमात्रं पुरुषं यमः बलात् आकृष्टवान्। अतः अङ्गुष्ठपरिमाणवान् संसारी। स एव अत्रापि इति॥

**उभयलिङ्गाधिकरणम्**

ब्रह्मणः निर्विशेषत्वनिरूपणार्थम् अधिकरणमिदमारभते। एकादश सूत्राणि सन्त्यस्मिन् अधिकरणे। "सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः"(छा.३.१४.२.) इत्यादिना ब्रह्मणः सविशेषत्वम् , "अस्थूलमनण्वह्रस्वमदीर्घम्" इत्यादिना निर्विशेषत्वं च श्रूयते। एवम् उभयश्रुत्यनुरोधात् किं ब्रह्मणः उभयरूपत्वं वा उत एकरूपत्वम् इति। एकरूपत्वे च किं सविशेषत्वम् उत निर्विशेषत्वम् ? इति संशयः। सर्वासामपि श्रुतीनां प्रामाण्यात् उभयरूपत्वं ब्रह्मणः युज्यते इति। सविशेष-निर्विशेषयोः परस्परं विरुद्धत्वात् एकस्मिन् वस्तुनि एकस्यैव अवस्थानं संभवति। ब्रह्मणः सविशेषत्वम् अनुमानादिप्रमाणैः अधिगन्तुं शक्यते। अनधिगते अपूर्वे अर्थे एव श्रुतेः तात्पर्यम्। न तु प्रत्यक्षादिना अवगते अर्थे। परम् उपासनार्थं सविशेषत्वं ब्रह्मणि परिकल्प्य सविशेषत्वेन उच्यते। इदं तु सविशेषत्वम् उपाधिमूलकं न तु ब्रह्मस्वरूपम्। उपाधेः मिथ्यात्वात् तत्कल्पितविशेषाणामपि मिथ्यात्वमेव । वस्तुतः ब्रह्मणः स्वरूपं निर्विशेषमेव। उपाधिसंबन्धात् सविशेषमिव भासते। तस्मात् सविशेषतायाः मिथ्यात्वं, निर्विशेषतायाः त्रिकालाबाध्यत्वम् इति ब्रह्मणः निर्विशेषत्वमेव, न द्विरूपत्वम् इति ।

एकादशसूत्रघटितेऽस्मिन् अधिकरणे "दर्शयति चाथो अपि स्मर्यते" इत्यस्य सूत्रस्य व्याख्याने परप्रतिषेधमुखेन उदाहर्तुम् उद्धृतो वर्तते महभारतगतशान्तिपर्वणः श्लोकः(म.भा.३३९.४५)

**"माया ह्येषा मया सृष्टा यन्मां पश्यसि नारद।**

**सर्वभूतगुणर्युक्तं नैवं मां ज्ञातुमर्हसि"॥** इति।

सर्वभूतगुणैः दिव्यगन्धादिभिर्युक्तं मां मूर्तिमन्तं पश्यसि इति यत् सा माया। अत एव सद्वैतो भगवान् इति मां द्रष्टुं नार्हसि, वस्तुतो द्वैतातीतत्वात् इत्यर्थः। अतः अनेन स्मृतिप्रमाणेनापि ब्रह्मनिर्विशेषत्वं सिध्यति, तथा साक्षात् नारदं प्रति भगवदुक्तेः विद्यमानत्वाच्च॥

**प्रकृतैतावत्त्वाधिकरणम्**

बृहदारण्यके निर्विशेषब्रह्मबोधकं वाक्यं 'नेति नेति' इति वर्तते। निर्विशेषपदस्य विग्रहस्तु न विद्यन्ते विशेषाः यस्मिन् तत् इति। निर्गताः विशेषाः यस्मात् इति वा। अन्यपदार्थः कश्चन अस्ति। तर्ह्येव निर्विशेषं ब्रह्म अस्तीति स्यात्। परन्तु अत्र 'नेति नेति' इत्यनेन धर्मस्य वा धर्मिणो वा सर्वस्यापि निषेधः क्रियते इति भाति, आधारस्यैव अनिर्दिष्टत्वात्। एवञ्च ब्रह्मणोऽपि निषेधो भवति चेत् निर्विशेषकथनस्य

तात्पर्यं न स्यात्। अतः यादृशश्रुतिबलात् ब्रह्मणः निर्विशेषत्वं प्रमाणसिद्धमिति स्वीक्रियते तादृशश्रुतेः अर्थविशेषः निर्धार्यते अस्मिन् अधिकरणे। "द्वे वाव ब्रह्मणो रूपे मूर्तं चैवामूर्तं च"(बृ.उ.२.३.१.) इत्युपक्रम्य "अथात आदेशो नेति नेति न ह्येतस्मात् इति नेत्यन्यत्पर"मिति(बृ.उ.२.३.६.) मूर्तामूर्तब्राह्मणं संपूर्णम् अत्र विषयः। धर्मः धर्मी इत्यनयोर्मध्ये उभयं निषिध्यते उत अन्यतरत् निषिध्यते वा? अन्यतरत् निषिध्यते इत्यत्र प्रपञ्चो वा उत ब्रह्म निषिध्यते इति विचारः। "द्वे वाव ब्रह्मणो रूपे मूर्तं चैवामूर्तं च" इत्यस्यां श्रुतौ मूर्तामूर्तरूपप्रपञ्चमुक्त्वा 'नेति नेति' इत्यनेन वाक्येन ब्रह्मस्वरूपम् उपदिश्यते। अत्र नेति नेति इति द्विवारमुक्त्वा प्रथमेन 'इति' इत्यनेन प्रपञ्चं निर्दिश्य न इत्यनेन तन्निषिध्यते। द्वितीयेन इतिशब्देन ब्रह्म निषिध्यते वाङ्मनसातीतत्वेन तत्सद्भावस्यैव असंभाव्यमानत्वात् इति पूर्वपक्षः।

सिद्धान्तस्तु—दृश्यप्रपञ्चस्यैव प्रतिषेधः क्रियते , न तु ब्रह्मणः। यदि उभयोः प्रतिषेधः स्यात् तर्हि शून्यवादः स्यात्। लोके असत्यस्य प्रतिषेधे कर्तव्ये तदधिष्ठानस्य सत्यस्य अपेक्षा वर्तते। यथा रज्ज्वादिषु सर्पादिकस्य। दृश्यप्रपञ्चस्य कार्यस्य सत्त्वाभावप्रतीतिस्तु वाचारम्भणशब्दादिभ्यः भवति। अतः "नेति नेति" इति प्रतिषेधनं दृश्यप्रपञ्चस्यैव युक्तम्। द्वैतप्रपञ्चनिषेधे प्रत्यक्षादिप्रमाणविरोधो न । प्रत्यक्षादिप्रमाणस्य व्यावहारिकप्रामाण्याभ्युपगमात् इति। तस्मात् ब्रह्मणो रूपं प्रपञ्चं प्रतिषेधति परिशिनष्टि ब्रह्म इत्यभ्युपगन्तव्यम्॥

नवसूत्रघटितेऽस्मिन्नधिकरणे तृतीयसूत्रमस्ति "अपि च संराधने प्रत्यक्षानुमानाभ्याम्" इति। अत्र सूत्रस्य व्याख्यानम् एवं विद्यते यत् समाध्यवस्थायां योगिनः परमात्मानं प्रत्यक्षानुमानाभ्यां पश्यन्तीति। प्रत्यक्षं तु "कश्चित् धीरः प्रत्यगात्मानमैक्षत्" इत्यादि काठकश्रुतिः (२.१.१)। अनुमानार्थं श्रीशङ्करभगवत्पादैः महाभारतात् वनपर्वणः श्लोकः उद्धृतः-

**"यं विनिद्रा जितश्वासा संतुष्टाः(सत्त्वस्थाः) संयतेन्द्रियाः।**
**ज्योतिः पश्यन्ति युञ्जानास्तस्मै योगात्मने नमः॥"**

इति। ये वितमस्काः निद्रां जितवन्तः जितप्राणाः स्वायत्तीकृतेन्द्रियाः शुद्धसत्त्वाः प्राणायामनिष्ठाः ध्यायिनः ते योगलभ्यात्मना ज्योतिस्स्वरूपं परमात्मानं सर्वदा पश्यन्ति। तथाभूतयोगात्मने नमः इति।

## देवताधिकरणम्

"तदुपर्यपि बादरायणः संभवात्" इतीदं सूत्रं देवताधिकरणे वर्तते। अष्टसूत्रघटितात्मके अस्मिन्नधिकरणे "ब्रह्म वा इदमग्र आसीत् तदात्मानमेवाहं ब्रह्मास्मीति। तस्मात् तत्सर्वमभवत् तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्"- इत्यादिबृहदारण्यकोपनिषदः चतुर्थं ब्राह्मणमेव विषयः। देवानामपि ब्रह्मविद्यायाम् अधिकारः अस्ति इति निर्णेतुमधिकरणमिदम् आरभते। सर्वदा विषय-बुभुक्षायामेव रतानां देवानां वैराग्यादिसाधनप्राप्त्यभावात् ब्रह्मविद्यायां तेषामधिकारो नास्ति इति पूर्वपक्षः। स्वर्गसुखस्यापि

क्षयिरूपत्वात् असूयादिदोषसद्भावात् सर्वत्र न्यूनातिरेकसद्भावाच्च तेषामपि वैराग्योत्पत्तेः अवकाशो दृश्यते। अतः देवानामपि ब्रह्मविद्यायाम् अधिकारो वर्तते एव इति सिद्धान्तः। पूर्वाधिकरणे मनुष्याणां शास्त्रार्थेऽधिकारः सिद्धान्तितः। अतो देवानां स्मरणं जातम्। अतः प्रसङ्गात् तेषामपि अधिकारः अस्ति इति वक्तुम् इदमधिकरणम्। किञ्च उपनिषत्सु दहराद्युपासनाः क्रममुक्तिफलिकाः अनेकाः प्रोक्ताः वर्तन्ते। अतः उपासनाबलेन देवलोकं गत्वा विषयभोगान् उपभुज्य पुनः भूलोकमनागत्य तत्रैव स्थित्वा ब्रह्मविचारं कृत्वा मुक्तिं विन्दते इति यत् तदेव क्रममुक्तिः इत्युच्यते। यदि देवानाम् अधिकारः निषिध्येत तर्हि देवलोकं गत्वा ज्ञानप्राप्तिः न संभवति। अपि च उपासनायां न कस्यापि प्रवृत्तिः स्यात्। अतः देवानामपि अस्यां ब्रह्मविद्यायाम् अधिकारः अवश्यं संभवति इति अधिकरणेऽस्मिन् निर्धार्यते। अत्र "शब्द इति चेन्नातः प्रभवात्प्रत्यक्षानुमानाभ्याम्" इति सूत्रे जगतः प्रभवत्वं शब्दस्येति कथमवगम्यते इत्यत्र सन्दर्भे प्रत्यक्षानुमानाभ्याम् इत्युच्यते। प्रत्यक्षं तु श्रुतिः। अस्य प्रामाण्यार्थमन्यानपेक्षत्वात्। अनुमानं च स्मृतिः। तस्य मूलप्रमाणसापेक्षत्वं वर्तते। "एते असृग्रमिन्दवः तिरःपवित्रमाशवः। विश्वान्यभिसौभगा"। इत्येतन्मन्त्रस्थपदैः ब्रह्मा देवान् ससर्ज इति श्रुतिः। "सः मनसा वाचं मिथुनं समभवत्" अर्थात् त्रयीप्रकाशितां सृष्टिं मनसा आलोचितवान् इत्यर्थः। एवमादिना तत्र तत्र शब्दपूर्विका सृष्टिः श्राव्यते। एतदनन्तरं स्मृतिरपि इत्युक्त्वा महाभारतगतवनपर्वणः श्लोकम् उद्धृत्य स्मृतिप्रमाणमपि उपोद्बलकतया प्रदर्शयन्ति श्रीशङ्करभगवत्पादाः–

**"अनादिनिधना विद्या (नित्या) वागुत्सृष्टा स्वयंभुवा।**
**आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः"**॥इति।

महर्षयः प्राग्जन्मनि अधीतान् वेदान् स्मृतवन्तः। तपःप्रभावेणैव महर्षयः वेदानधीतवन्तः अहर्निशम्। ब्रह्मा तपश्शक्त्या एव आद्यन्तरहितां वेदमयीं वाणीम् उच्चारितवान् इति। तदनुसृत्यैव सृष्टिः प्रवर्तते इति। उत्सृष्टत्वोक्त्या पौरुषेयत्वमाशङ्क्योक्तम्- उत्सर्गोपीति। गुरुशिष्यपरम्पराध्ययनं संप्रदायः। एतदुक्तं भवति– स्वयंभुवः वेदकर्तृत्वेपि न कालिदासादिवत् स्वतन्त्रत्वम् अपि तु पूर्वसृष्ट्यनुसारेण इति।

अत्र अन्योऽपि विषयः अवगन्तव्यः यत् "आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः" इतीदम् उत्तरार्धम् इति ज्ञेयम् । क्वचित् तददर्शनेपि शारीरकसूत्रभाष्यादौ पुस्तकान्तरेषु च तद्दर्शनात् इति नीलकण्ठविरचित-भारतभावदीपाख्य-महाभारतटीकायां स्वयं कथितं वर्तते। अतः श्रीशङ्करभगवत्पादैः महाभारतोपरि प्रदर्शितं गौरवं, महाभारतस्य वैशिष्ट्यं च स्फुटं प्रतीयते। अन्ते च – "धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ। यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित्॥" इतीदम् अन्वर्थं दृश्यते इति शम्॥

*****

# कर्णभारविषयविवेचनम्

**Dr. G. SURESH**
Asst.Prof in Sahitya,
The Madras Sanskrit college,
Mylapore, Chennai - 04.

**चतुर्मुखमुखाम्भोजवनहंसवधूर्मम।**
**मानसे रमतां नित्यं सर्वशुक्ला सरस्वती॥**

श्रेयः प्राप्तुकामजनैः समैरपि विदित एव भवति यत् यशआदिषड्प्रयोजनयुक्त 'कवृ वर्णने' इति धातोर्निष्पन्नकाव्यशब्दोऽयं कान्तासम्मितत्त्वात् सर्वशास्त्रार्थप्रदर्शकत्त्वात् व्यञ्जनाव्यापारमुखेन कविताजगति राजतीति जनगणमनस्सु चेति। तच्च काव्यम् -

**महेन्द्रप्रमुखैर्देवैः उक्तः किल पितामहः।**
**क्रीडनीयकमिच्छामः दृश्यं श्रव्यञ्च यद्भवेत्॥**

इत्युक्तदिशा दृश्यकाव्यं श्रव्यकाव्यम् इति द्विविधं भवति। तत्कारणादेव नाट्यशास्त्रप्रवर्तकैः भरताचार्यवर्यैः एवमभाणि -

**सर्वशास्त्रार्थसंपन्नं सर्वशास्त्रप्रदर्शकम्।**
**नाट्यसंज्ञमिमं वेदं सेतिहासं करोम्यहम्॥** इति।

"नट अवस्पन्दने" इति धातोर्निष्पन्नस्य नाट्यस्य अर्थात् दृश्यकाव्यस्य वेदत्वमदात्। **काव्येषु नाटकं रम्यम्** इत्युक्त्या नाटकरचने एव प्रायशः यशः प्राप्तुकामा कवयः बभूवुः सन्ति च। यतः दृश्यकाव्यस्य इदं वैचित्र्यं भवति - यदा यदा पठ्यते तदा वार्तमानिककालप्रयोग एव उपयुज्यते बहोः कालात्पूर्वं कृतत्त्वेऽपि। एतादृशनाटकजगति प्रथितयशोयुक्ताः नैके महाकवयः आगताः रचितनाटकाः प्राप्तकीर्तयः आसन्। परन्तु तेषु कविकुलतिलकेषु परशुरामक्षेत्रोत्पन्नः दीपशिखाकालिदासस्तुतः बाणभट्टप्रशंसितः महाकविचक्रवर्तिभासाचार्यः अनितरसाधारणस्थानं प्राप्य कविताम्बरे चन्द्रायते।

भासन्ते च भासाचार्यविरचितत्रयोदशनाटकचक्राणि संस्कृतजगति। अयं भासाचार्यः रामायणमाश्रित्य प्रतिमानाटकम् अभिषेकनाटकं च अकृत। एवं व्यासभारतमाश्रित्य पाञ्चरात्रं, दूतवाक्यं , मध्यमव्यायोगः, दूतघटोत्कचः, कर्णभारम् , ऊरुभङ्गं च षण्नाटकानि सातिशयम् आचार्यैः व्यरचिषत।

एवं कृष्णलीलामाश्रित्य बालचरितमकरोत्। बृहत्कथामाश्रित्य स्वप्नवासवदत्तम् , प्रतिज्ञायौगन्धरायणम् , अविमारकम् , चारुदत्तं च सचतुरं चत्वारि नाटकरत्नानि अस्मभ्यमदात्।

नाटके सूत्रधारोक्त्यनन्तरं कथावस्तु स्थाप्यते इति कारणात् स्थापना इति भासप्रयोगेणैव स संप्रदायः आगतः। परन्तु कालिदासादिकवयः प्रस्तावना अर्थात् कथामुखं समाप्ता इत्यर्थे कुर्वन्ति। स्थापना इति भासकविमुद्रावद् भवति इति सहृदयाशयः। अपि च कालिदासोऽपि भासाचार्यं निजगुरुस्थाने संस्थाप्य स्तौति मालविकाग्निमित्रनाटके - **प्रथितयशसां भाससौमिल्लकविपुत्रादीनां प्रबन्धानतिक्रम्य कथं वर्तमानस्य कविकालिदासस्य कृतौ बहुमानः** - इति प्रथमं भासाचार्यमेव निर्दिशति। अनेन रससार्वभौमकालिदासः भासनाटके दत्तचित्तः इति चेत् का वक्तव्यता भासरसनाटकरचने।

अपि च कालिदासात्पूर्वकालीनः इत्यपि भाति भासः।

भासस्य रचनाशैली सरला सुलभावगतिः सचमत्कृतिः उचितालङ्कृतियुक्ता च भवति। अस्य प्रयोगे प्रसादगुणः सर्वत्र प्रतीयते वीररसरसे ओजोगुणोऽपि प्रयुज्यते। एवमेव कर्णभारे अपि अर्थात् एतदेकाङ्कनाटकं तथापि तत्र अर्थगाम्भीर्येण अतिसरलतया सध्वनि श्लोकादिकं भासेन सातिशयं व्यरचि। एवं भासोऽयम् लोकोक्तिवर्णनविषये सामूहिकनीतिविषये च सर्वकवीनतिरिच्य चकास्ति। **कविः क्रान्तदर्शी** इति गीयते। तदुक्तप्रकारं अयं भासः समूहवर्धने अपि नाटककथापात्ररीत्या जनान् बोधयित्वा श्रेष्ठस्थानं प्राप्नोति। तदपि हास्यमुखेन बोधनात् समेषां प्रियतमो भवति भासाचार्यः इति निश्चप्रचं प्रतिभाति। अत एव जयदेवाचार्यैः निजप्रसन्नराघवग्रन्थे समीर्यते -

**यस्याश्चोरश्चिकुरनिकरः कर्णपूरो मयूरः**
**भासो हासः कविकुलगुरुः कालिदासो विलासः।**
**हर्षो हर्षो हृदयवसतिः पञ्चबाणस्तु बाणः**
**केषां नैषा कथय कविताकामिनीकौतुकाय॥**

इति पद्येन समस्तकवीनां स्वभावं वर्णयति। किञ्च भासनाटकचक्रे कर्णभारं नितरां बिभर्त्यौन्नत्यम्। यतः पञ्चविंशतिश्लोकेषु कर्णस्य मनोभावं सातिशयं ससारं वर्णयति कविः। कर्णभारस्यायमर्थः भवति –

१. कर्णस्य भारः अर्थात् कवचकुण्डले सूर्यानुग्रहात् प्राप्ते अपि प्रकृत्या। प्राणरक्षा तेन कर्णेन न कृता तस्मात् तद्भारभूतम् इति कर्णभारम्।

२. कर्णस्य कर्णे अर्थात् श्रोत्रभूषाविषये कुण्डलम् आभरणमेव केवलं भवति। यतः यत्कुण्डलधारणेन आत्महानिः न स्यात् , तद्धृत्वाऽपि न किमपि प्रयोजनम् इति करणात् तद्भारवद् भवति कर्णस्य इति कर्णभारः।

३. कर्णस्य भारः अर्थात् यद्यपि कर्णः पाण्डवपक्षीयः एव तथापि सुयोधनपोषितत्त्वात् तत्पक्षीयः भवति। अतः इदं मत्सोदरान् हन्तुम् अहमेव नियुक्तः सुयोधनेन इति विषयः तस्य मनोव्यथाकरणात् मनोभारः भवति कर्णस्य इति कर्णभारः।

४. अपि च नाटके इन्द्रः याचकरूपेण आगमनसमये समरभूमौ तस्मै झटिति किमपि दातुं न शक्यते इति मनोदुःखेन कर्णस्य तद्भारवत्वात् कर्णभारः।

५. ये लोके वदान्यगुणत्वेन शोभन्ते तेषां समेषां कर्णः भार इव भवति यतः जीवति कर्णे तद्वदान्यैः यशः पूर्णतया आप्तुं न शक्यते इति तेषां कर्ण अर्थात् राधेयः एव भारः इति कर्णभारः। एतदधिकृत्य कृतं नाटकं कर्णभारम् भवति।

अतः कर्णभारे कर्णमहारथस्य मनोव्यथाम् अस्माकं दृष्टिगोचरे साक्षदिव दर्शयति कविर्भासः। भारते शल्यः कर्णं कटूक्त्या बाधमानः रथं नीतवान्। परन्तु नाटके प्रसादगुणे दत्तचित्तः भासः प्रसादरूपेण सर्वाणि पात्राणि कृतवानस्ति। आहवार्थं गमनसमये त्रयोदशदिने वृत्तान्तमिमं मध्येकर्णशल्यं प्राचलदिति भासनाटके भवति।

तदा अर्जुनं गवेषमाणः कर्णः शल्यं प्रति युद्धकाले वैधुर्यम् अर्थात् दैन्यम् आगच्छति मम इति कथनेन व्यासाचार्यमपि केषुचित् स्थलेषु अतिरिच्य भाति भासः।

अत्रायं विषयः मुख्यः भवति - कर्णः महावीरपुरुष एव । परन्तु रसगङ्गाधरकारोक्तप्रकारं वीरताचतुष्टयं तस्य प्रतिभाति। तत्र वीरश्चतुर्धा भवति - दानवीरः, दयावीरः, युद्धवीरः, धर्मवीरः इति। एतत्सर्वं कर्णे कर्णभाररीत्या द्रष्टुं शक्यते। कथमिति चेत् , **विहितकनकश्रृङ्गं गोसहस्रं ददामि** - इत्यनेन कर्णस्य दानवीरत्वं व्यज्यते।

**दानवीरता -**

**अङ्गैः सहैव जनितं मम देहरक्षा**
**देवासुरैरपि न भेद्यमिदं सहास्त्रैः।**
**देयं तथापि कवचं सह कुण्डलाभ्यां**
**प्रीत्या मया भगवते रुचितं यदि स्यात्॥**

अत्रापि अभेद्यं स्वप्राणरक्षं कवचमपि अनायासेन दातुमुद्युक्तस्य कर्णस्य दानवीरत्वं कीदृशमिति वक्तव्यम् वा। इदम् तावद्वदान्यवीरत्वमेव। यतः इन्द्रः विप्ररूपेण आगत्य अयाचत तदा कर्ण एव किमावश्यकं किमावश्यकमिति दानीयवस्तून्यपि तेनेन्द्रेण अपृष्टोऽपि स्वयमेव गोसहस्रं अथवा स्वर्णभाण्डं अथवा अश्वादिकम् इति कथनेन अस्य दानवीरधुरीणता कविभासेन स्थाप्यते।

**दयावीरता** -

**निरर्थमस्त्रं च मया हि शिक्षितम् पुनश्च मातुर्वचनेन वारितः॥** इति अस्त्रवृत्तान्तकथनसमये स्वमातृकुन्तीवचनात् एव अर्थात् 'युधिष्ठिरादिके अस्त्रप्रहारं मा कृथाः' इति स्वमातृकुन्तीवचनात् कारणादेव मम मनसि दया आगच्छति इति शल्यमवोचत्। दया नाम परदुःखनिवारणेच्छा इति कथ्यते। अत्र स्वमातृकुन्त्याः मनोदुखं निवारयितुं आर्द्रमनस्कः भवति कर्णः इत्यनेन दयावीरत्वं व्यज्यते। एवं **वैधुर्यमापतति चेतसि युद्धकाले** इत्यनेनापि दयावीरत्वं ज्ञायते।

**युद्धवीरता** –

यथा कुन्तीवचसा वारितः परशुरामेण शप्तः युद्धभूमौ दृष्टदुर्निमित्तः अपि स्वकार्तज्ञनिवेदनार्थं दुर्योधनजयार्थं युद्धशुद्धवीरलक्षणप्रकारं प्रोत्साहेन स्वप्राणान् तृणमिव विचिन्त्य शल्यराजं प्रति – **भोः शल्य अलमलं विषादेन।**

**हतोऽपि लभते स्वर्गं जित्वा तु लभते यशः।**
**उभे बहुमते लोके नास्ति निष्फलता रणे॥**

इति केनापि वीरेण वक्तुं पार्यते वा इति चेत् , तन्न। परन्तु कर्णस्य एतादृशोक्त्या युद्धवीरत्वं व्यज्यते।

अपि च देशरक्षार्थं जनाः योद्धुमवश्यं वाञ्छन्तु इति कविरभिप्रैति **नास्ति निष्फलता रणे** इति पदेन। तस्मात् कवेः सामूहिकचिन्तनं प्रतीयते। अयं भागः महाभारते नास्ति।

**धर्मवीरता** –

समरभूमावपि विप्रमवलोक्य सावधानतया विना ससम्भ्रमम् तं नमस्करोति। गोब्राह्मणदेववृक्षाः सदा वन्द्याः इति स्मृतिवाक्यानुसारं कर्णः भवति। तत्रापि - **विप्रेन्द्रपादरजसा तु पवित्रमौलिः**- इत्यनेन पूज्यविप्रपूजनत्वं प्रतीयते।धर्मश्च परिपाल्यते।

**कर्णो भवन्तमहमेष नमस्करोमि** - इति कथनात् कर्णस्य धर्माचरणचित्तं ज्ञायते। अपि च अन्ते देवदूतः कर्णमुपसृत्य विमलास्त्रं ददाति। तदस्वीकरणकाले ब्राह्मणवचनात् गृह्यताम् इति देवदूतेन बोधितः कर्णः - ब्राह्मणवचनमिति न मया अतिक्रान्तपूर्वम् -इति धर्मे विश्वासयुक्तकारणादेव अस्त्रं स्वीकृतवान् इति कविः सचमत्कारं वर्णयति। अस्मात् कर्णस्य धर्मवीरत्वं द्योतते। महाभारते कर्णस्य युद्धपाण्डित्यं समवलोक्य भासः स्वप्रतिभामुपयुज्य स्वेतरविलक्षणशैल्याऽतिरमणीयत्वेन सध्वनिपद्यम् कर्णपात्रं खचितवान्। तस्मादेव नाटकमिदं सहृदयहृदयं सरसोल्लासेन आकर्षमाणं भवति।

अतः कर्णभारेण कर्णविषयस्थान् अस्मत्संशयभारान् दूरीकरोति कविर्भासः। भासताम् भासः, भासतेतमां भासकीर्तिः, तद्भासभासा भासन्तां रूपकलोकाः। ॥ शम्॥

# वास्तुमण्डलनिरूपणम्

**डा. अखिलेश्वर मिश्रः,**

ज्योतिषविभागाध्यक्षः,

मद्रपुरी संस्कृत महाविद्यालयः,

मैलापूर् , चेन्नै - ०४

वास्तुमण्डलस्य प्रामुख्येन चतुर्धा भेदाः शास्त्रेषूपदिष्टाः। तद्यथा –

१. द्वात्रिंशत्पदयुक्तवास्तुमण्डलम्　　२. चतुःषष्टिपदयुक्तवास्तुमण्डलम्

३. एकाशीतिपदयुक्तवास्तुमण्डलम्　　४. शतपदयुक्तवास्तुमण्डलम्

अत्र चतुःषष्टिवास्तुपदस्य एकाशीतिवास्तुपदस्य च चर्चा क्रियते। यतो हि–

**एकाशीतिपदं वास्तु गृहकर्मणि शस्यते।**

**चतुःषष्टिपदं वास्तु प्रासादे देवभूभुजाम् ॥**

गृहनिर्माणगृहप्रवेशादिषु कार्येषु एकाशीतिपदयुक्तवास्तुपदस्योपयोगः विद्वद्भिः शंसितः ।

**एकाशीतिवास्तुपदनिर्माणविधिः**

एकाशीतिवास्तुपदनिर्माणविषये श्रीविश्वकर्मप्रकाशग्रन्थे ग्रन्थकारेणेत्थं प्रकारो निर्दिष्टः यत् सर्वप्रथमं स्वर्णशलाकया प्रथमं रेखाः कुर्यात् , तदनन्तरम् आर्द्रपिष्टेन वा हरिद्रायां वा रक्तकुङ्कुमे सूत्रमालोड्य दश रेखाः पूर्वायताः, दश रेखाः उत्तरायताः कुर्यात्। अनेन नव-नव कोष्ठयुक्तानि (९ × ९ = ८१) एकाशीतिपदानि निर्मीयन्ते।

**एकाशीतिपदं कुर्यात् रेखाभिः कनकेन च।**

**पश्चात् पिष्टेन चालिख्य सूत्रमालोड्य सर्वतः॥**

निर्मितैकाशीतिवास्तुपदकोष्ठेष्ववस्थितानां कोष्ठभेदकरेखाणां नामान्यपि शास्त्रज्ञैः निर्दिष्टानि। तद्यथा –

**शान्ता यशोवती कान्ता विशाला प्राणवाहिनी।**

**सती च सुमना नन्दा सुभद्रा सुस्थिता तथा ॥**

**पूर्वापरागता ह्येता उदग्याम्याश्रितास्तथा॥**

पूर्वपररेखाणां नामान्येतानि बोध्यानि –

| | |
|---|---|
| 1. शान्ता | 6. सती |
| 2. यशोवती | 7. सुमना |
| 3. कान्ता | 8. नन्दा |
| 4. विशाला | 9. सुभद्रा |
| 5. प्राणवाहिनी | 10. सुस्थिता |

उदीचीतः अवाचीं प्रति –

**हिरण्या सुव्रता लक्ष्मीर्विभूतिर्विमला प्रिया।**
**जया काला विशोका च तथेन्द्रा दशमी स्मृता।**
**एकाशीतिपदे ह्येता शिराश्च परिकीर्तिता ॥**

नामान्येतानि एकाशीतिवास्तुपदविन्यासस्य रेखाणां सन्ति।

चतुःषष्टिवास्तुपदविन्यासस्य नामानि भिन्नान्येव भवन्ति। चतुःषष्टिवास्तुपदेऽप्येकाशीतिवास्तु पदवत् पूर्वापरयोः तथा च दक्षिणोत्तरयोः रेखाः भवन्ति। तासां भेदकरेखाणां नामान्यपि वास्तुशास्त्रविज्ञैः कथितानि। तद्यथा श्रीविश्वकर्मप्रकाशे पूर्वापररेखाणां नामान्येतानि कथितानि –

**श्रिया यशोवती कान्ता सुप्रियाऽपि परा शिवा।**
**सुशोभा साधना ज्ञेया तथेभा नवमी स्मृता।**
**पूर्वापरा तथा ह्येता चतुःषष्टिपदे स्मृताः॥**

उत्तरतः दक्षिणं प्रत्यङ्कितानां रेखाणां नामानि –

**धन्या धरा विशाला च स्थिरा रूपा गदा निशा।**
**विभवा प्रभवा चान्या सौम्या सौम्याश्रिता शिरा।**
**परस्याष्टांशको भागः तत्प्रोक्तं मर्मसंज्ञकम्॥**

चतुःषष्टिवास्तुपदस्य रेखाणां नामान्युक्तानि। रेखाकरणानन्तरं ९×९=८१ एकाशीतिनवकाः निर्मीयन्ते। एवमेव चतुःषष्टिवास्तुपदे अष्टकं निर्मीयते ८×८=६४ चतुःषष्टिवास्तुपदे चतुःषष्टिवास्त्वष्टकानां निर्माणं भवति। एते नवकाष्टकाः एव पदसंज्ञयाऽभिधीयन्ते ।

## वास्तुपुरुषस्याङ्गेषु देवतानां निवासस्थानानि

| वास्तुपुरुषस्याङ्गानि | अवस्थितदेवताः |
|---|---|
| शिरसि | शिखी (अग्निदेवः) |

| | |
|---|---|
| मुखे | आपः (वरुणदेवः) |

**कायस्य दक्षिणाङ्गेषु स्थिताः देवाः**

| | |
|---|---|
| स्तने | अर्यमा देवः |
| वक्षस्थले | आपवत्सः |
| नेत्रे | पर्जन्यः |
| कर्णोपरि | जयन्तः |
| स्कन्धे | सूर्यः |
| बाहौ | पञ्च देवताः सत्यः, भृषः, आकाशः, वायुः, पूषा च |
| हस्ते | वितथः, बृहद्रथश्च |
| उदरे | विवस्वान् |
| ऊरौ | यमदेवः |
| जानुस्थले | गन्धर्वः |
| जघनाङ्गे | भृङ्गराजः |
| कटिक्षेत्रे | मृगः |

**कायस्य वामाङ्गेषु स्थिताः देवताः**

| | |
|---|---|
| स्तने | पृथ्वीधरः |
| नेत्रे | दितिः |
| वक्षस्योपरि | भुजङ्गः |
| कर्णे | अदितिः |
| स्कन्धे | सोमः |
| बाहौ | पञ्च देवाः भल्लाटः, मुख्यः, नागः, रोगः, शोषः |
| हस्ते | रुद्रः, राजयक्ष्मा च |
| ऊरुस्थले | वरुणः |
| जानुस्थाने | पुष्पदन्तः |
| जघने | सुग्रीवः |
| कटिप्रदेशे | दौवारिकाः |
| पादे | पितृदेवः |

| | | |
|---|---|---|
| लिङ्गोपरि | इन्द्रः, जयन्तश्च | |
| पार्श्वे | असुरः | |
| हृदये | स्वयम्भूः | |
| **देवनामानि** | **पदसंख्या** | **वास्तुदेवस्याङ्गानि, स्वामित्वं च** |
| अग्निः (शिखी) | एकपदम् | शिरः |
| पर्जन्यः | पदमेकम् | दक्षिणनेत्रम् |
| जयन्तः | पदद्वयम् | लिंगे |
| सूर्यः | पदद्वयम् | दक्षिणस्कन्धे |
| सत्यः | द्वे पदे | दक्षिणबाहौ |
| भृशः | पदे द्वे | दक्षिणबाहौ |
| आकाशः | पदमेकम् | दक्षिणबाहौ |
| वायुः | पदमेकम् | दक्षिणबाहौ |
| पूषा | एकपदम् | दक्षिणबाहौ |
| वितथः | पदद्वयम् | दक्षिणहस्ते |
| वृहत्क्षतः | द्वे पदे। | दक्षिणहस्ते |
| यमदेवः | पदद्वयम् | दक्षिण ऊरुस्थाने |
| गन्धर्वः | पदद्वयम् | दक्षिण जानौ |
| भृङ्गराजः | पदद्वयम् | दक्षिण जघने |
| भगः | पदमेकम् | दक्षिण कटिदेशे |
| पिता | पदमेकम् | उभयोः पादयोः |
| दौवारिकः | पदमेकम् | वाम कटिक्षेत्रे |
| सुग्रीवः | द्वे पदे | वामजघेन |
| पुष्पदन्तः | द्वे पदे | वाम-जानौ |
| वरुणः | पदद्वयम् | वामोरुस्थले |
| असुरः. | पदद्वयम् | वामकटिप्रदेशे |
| शोकः | द्वे पदे | वाम पार्श्वे |
| पापः | पदमेकम् | वामबाहौ |
| रोगः | पदमेकम् | वामबाहौ |

| | | |
|---|---|---|
| सर्पः | पदद्वयम् | वाम बाहौ |
| मुख्यः | पदद्वयम् | वामबाहौ |
| भल्लाटः | पदद्वयम् | वामबाहौ |
| सोमः. | द्वे पदे | वामस्कन्धे |
| भुजङ्गः | द्वे पदे | वामवक्षस्थळे |
| अदितिः | पदमेकम्. | वामकर्णोपरि |
| दितिः | पदामेकम्. | वामनेत्रे |
| आपः | पदमेकम् | मुखे |
| सवित्रः | पदमेकम् | दक्षिणकटिप्रदेशे |
| सेन्द्रः जयन्तः | पदमेकम् | लिंगोपरि |
| रुद्रः | एकपदम् | वामहस्ते |
| अर्यमा | त्रिपदानि | दक्षिणहस्ते |
| सावित्रः | एकपदम् | दक्षिणकटिप्रदेशे |
| विवस्वान् | पदत्रयम् | उदरे |
| इन्द्रः | पदमेकम् | लिङ्गोपरि |
| मित्रः | त्रिपदात्मकम् | कुक्षौ |
| रुद्रेन सह.राजयक्ष्मा. | पदमेकम् | कुक्षौ |
| पृथ्विधरः. | पदत्रयम् | वामहस्ते |
| आपवत्सः. | एकम्पदम् | दक्षिणवक्षस्थले |
| विधाता (ब्रह्मा) | नव पदानि | मध्यस्थ हृदये |

सङ्कलनयैकाशीतिः (८१) वास्तुमण्डले उपर्युक्तदेवानां पदानि तेषां काये वासस्थानाङ्गस्य नामानि देवानां स्वरूपाणि च ग्रन्थोक्तदिशा इत्थं वर्णितानि । इति श्रीः॥

# प्रश्नशास्त्रे शकुननिरूपणम्

**सु. मुरलिः**

ज्योतिषविभागाध्यापकः,

मद्रपुरीसंस्कृतमहाविद्यालयः, चेन्नई

"दैवज्ञेन समाहितेन समयः" एवं "पृच्छानिर्गममार्गमन्दिरगतिः" इत्यादिश्लोकेषु दूतस्य दैवज्ञस्य च दृष्टशकुनं श्रवणशकुनं च फलनिर्णयविषये सहायकाः सन्ति। अत्र शकुनफलकथनार्थं ग्रहस्थितेः आवश्यकता नास्ति इति विशेषः। दृङ्मनसोः अनिष्टं यत् दृश्यते अथवा यत् श्रूयते तत् अनिष्टशकुनमिति सामान्यतः वक्तुं शक्यते। ग्रहस्थितिं दृष्ट्वा दूतशकुननिरूपणस्य व्यवस्था प्रश्नशास्त्रे दृश्यते इति महदाश्चर्यम्। तद्यथा प्रश्नलग्नस्य सप्तम पञ्चम अष्टम लग्नभावेषु राहुः अथवा शनिः तिष्ठति चेत् चण्डालपङ्क्तिदर्शनं वक्तव्यम्। कुजबुधौ चेत् शूद्रजातीनां दर्शनं वक्तव्यम्। तत्र प्रश्नविषयदेवतानां तादृश जातिसम्बन्धः तादृशजातीनाम् आराधनाविशेषाः अपि वक्तुं शक्यन्ते। तदुक्तम् –

**राह्वर्किः पृच्छकाधितर्क्षे यद्वा तस्मात् पञ्चमे वाष्टमे वा।**

**चण्डालानां पङ्क्तिरग्रे प्रदृष्टा शूद्रा दृष्टास्तत्र चेद्भूमिजज्ञौ॥** इति । (प्र.मा२-७८)

ग्रहसमुदाये सूर्यकुजौ चतुष्पादग्रहौ एवं राहुः सर्पः। अत्र सप्तमे पक्षिग्रहस्थितिवशात् पक्षिशकुनम्, चतुष्पात् ग्रहस्थितिवशात् गोमहिष्यादि चतुष्पात् दर्शनम् । राहुणा सर्पदर्शनम् । एवमपि "शशिशुक्रौ युवती "इति वचनानुसारं शुक्रेन्दू चेत् वनिता दर्शनं । बुधश्चेत् विद्वज्जनदर्शनं, गुरुश्चेत् विप्रानुरोदनं इति बहु प्रमाणानि सन्ति। एवं शकुनतुल्यदेवतानां निरूपणं देवस्थानस्थितिनिरूपणं च कर्तुं शक्यते। शकुननिमित्तादयस्तु दैवायताः। देवस्य हितं शकुनरूपेण एव ज्ञायते। अत्र ग्रहस्थितिमुपयुज्य शकुननिर्णयः प्रत्ययाप्तये दैवज्ञाः कुर्वन्ति ।

**तत्रस्थे चतुरङ्घ्रिसंज्ञविहगे मातङ्गपश्वादयोऽ**

**भ्यायाताः पथि पक्षिसंज्ञविहगे दृष्टाश्चकोरादयः।**

**सूर्यारौ तु चतुष्पदी निगदितौ मन्देन्दुजौ पक्षिणौ**

**शीतांशुस्तु सरीसृपोष्टचरणः शास्त्रे प्रदिष्टः फणी** ॥ प्र-मा २-१००

**चण्डालाभ्यागमो यद्यहिशिखीगुळिकब्रध्नजास्तत्रसंस्थाः**

**शुक्रेन्दू चेद्वधूनां यदि शशितनयस्तत्र विद्वज्जनानाम् ।**

**विप्राणां वाक्पतिश्चेद्यदि धरणिसुतः शस्त्रिणां कीर्तनीयो**

**वर्त्मन्यभ्यागमः प्राग्यदि पुनररुणः श्रैष्ठ्यभाजां जनानाम्॥** इति। प्र-मा २-१०१

एवं दैवनिर्णयात्मक शकुनस्य भूतवर्तमानभावि निरूपणं प्रश्नशास्त्रे दृश्यते। एवमपि –

**अन्यजन्मान्तरकृतं पुंसां कर्मशुभाशुभम्।**

**यत्तस्य शकुनः पाकं निवेदयति पृच्छताम्॥** इति । प्र-मा ३-६

शकुने कर्तृभेदाः सन्ति। तत्तु एकाङ्गी चेत् फलं सुखी एव। सैन्यस्य शकुने राजा फलं अनुभवति। पुरे तद्देशदेवताकृते फलं। समूहविषये प्रधानीभूतस्य फलानुभवः प्रधानेऽपि साम्यं दृश्यते चेत् जात्या विद्यया वयसः वा निर्णयः कर्तव्यः तदुक्तम् –

**पथ्यात्मानं नृपं सैन्ये पुरे चोद्दिश्य देवताम्।**

**सार्थे प्रधानं साम्ये तु जातिविद्यावयोधिकम्॥** इति । प्र-मा ३-८

शकुनस्य भूत वर्तमान भावि निर्णयविधिस्तु यथा सूर्योदयादारभ्य घटिकात्रयं अथवा सार्धसप्तनाडिका सूर्यः पूर्वस्यां दिशि अनन्तरं घटिकात्रयं अग्निकोणे अनन्तरं घटिकात्रयं दक्षिणस्यां दिशि अनन्तरं घटिकात्रयं नैॠति कोणे अत्र दिवाकालः समाप्तः। एवं सूर्यास्तमनात् परं घटिकात्रयं अथवा सार्धसप्तनाडिका पश्चिमदिशि अनन्तरं घटिकात्रयं वायुकोणे अनन्तरं घटिकात्रयं उत्तरस्यां दिशि अनन्तरं सूर्योदयेऽप्यन्तं ऐशान्यां दिशि सूर्यसञ्चारः परिकल्पितव्यः।

**आरभ्य स्वोदयादर्कः पूर्वाद्यष्टासु दिक्ष्वपि। सञ्चरत्यर्घसंयुक्ताः सप्तनाडीर्दिवानिशम्।।** प्र-मा ३-१० एवं देवप्रश्ने –

**यामार्धमुदयात्पूर्वमारभ्यष्टासु दिक्ष्वपि ।**

**परिभ्रमति तिग्मांशु यामेष्वष्टासु सर्वदा।।** दे-प्र ३-१४

अष्टौ दिशः सार्धसप्तनाडी ६० घटिका अथवा २४ वादनानि इति ज्ञायते । अत्र सूर्यस्थितादारभ्य ज्वाला, धूमः, छाया, मृत्, वारि, भूमिः भसितः अङ्गारः इति प्रदक्षिणतया अष्टदिक्षूनां नामधेयाः सन्ति। तदुक्तम् –

**रवौ ज्वाला ततोधूमच्छायामृद्वारिभूमयः।**

**भसिताङ्गारकं चेति प्रादक्षिण्येन संस्थितम्।।** दे-प्र ३-१५

यत्र सूर्यः तिष्ठति तस्य दीप्ता इति नाम। तत्पूर्वराशेः अङ्गारः इति। दीप्तराशेः अनन्तरराशिस्तु धूमिनि। शिष्टपञ्चदिशः शान्ता इति कथ्यन्ते। सूर्योदयकाले सूर्यः पूर्वस्यां दिशि किल ? तस्मात् ईशानदिक् अङ्गारः पूर्वदिक् दीप्ता अग्निकोणस्तु धूमिनि एवम् उत्तरत्रापि अवधेयम् अग्निकोणानन्तरम् अन्ये पञ्चदिशस्तु शान्ता। नामतुल्यफलम् ऊह्यम्। अग्निज्वालानन्तरं अङ्गारः भूतसूचकः, दीप्ता वर्तमानफलदायिनी, धूमिनि भाविकाल सूचिका। अङ्गारादि दिक्षु फलं सर्वत्र दिक्षु अनुसन्धानमेव। तदुक्तम्

**अष्टासु दिक्षुपरितो हृष्टज्वालादयक्रमात् ।**

**स्वस्वेषैन्द्रयां स्वकं पश्चात् क्रमशो दिक्षु सर्वदा।।** दे-प्र ३-१६

**अङ्गारादि त्रयं दीप्तं शान्तं मृत्स्नादिकत्रयम्।**

**छायापूर्वं शुभं भस्मपश्चाच्चैवं शुभं भवेत् ।।** दे-प्र ३-१७

**शान्तदीप्तत्वमाशानां शकुनानाञ्च तद्वशात् ।**

**शुभाशुभत्वमस्त्येतदपि शास्त्रान्तरोदितम्।।** दे-प्र ३-१८

**रविमुक्तादयस्तिस्त्रो दीप्तानेष्टास्ततोपरे।**

**शान्ताः शुभाः स्वदिक् तुल्यफलं हि शकुनं मतम्।।** दे-प्र ३-१९

एवमेव प्रश्नमार्गेपि –

**मुक्तप्राप्तैष्यसूर्यासु फलं दिक्षु तथाविधम् ।**

**अङ्गारदीप्तधूमिन्यास्ताश्च शान्तास्ततोऽपराः।।** प्र-मा ३-११

**तत्पञ्चमदिशां तुल्यं फलं त्रैकाल्यमादिशेत्।**

**परिशेषदिशोर्वाच्यं यथासन्नं शुभाशुभम्।।** इति । प्र-मा ३-१२

एवं अष्टदिक्षु यथाक्रमं राजा, युवराजा, सेनापतिः, दूतः, श्रेष्ठपुरुषः, चारः, ब्राह्मणः, गजाध्यक्षः, इति क्रमशः सन्ति। एवं पूर्वादि चतुर्षु दिक्षु क्षत्रिय वैश्य शूद्र ब्राह्मणाः सन्ति इति परिकल्पना। अत्र पूर्वोक्तदिक्षु पक्ष्यादीनां शब्दः तत् प्रयुक्तपुरुष समागमः गमनसमये पूर्वस्यां दिशि शकुनरवः चेत् राजा वा क्षत्रियो वा समागच्छति । एवम् अग्निकोणे शकुनरवश्चेत् युवराजसमागमः। तदुक्तम् –

**राजा कुमारो नेता च दूतः श्रेष्ठश्चरो द्विजः।**

**गजाध्यक्षश्च पूर्वाद्याः क्षत्रियाद्याश्चतुर्दिशः।।** प्र-मा ३-१३

**गच्छतस्तिष्ठतो वापि दिशि यस्यां प्रतिष्ठितः।**

**विरौति शकुनो वाच्य-स्तद्दस्थेन समागमः।।** प्र-मा ३-१४

**प्राच्यां दिशि शकुनरवो यदि खलु भविता समागमो राज्ञा।**

**राजकुमारेणाग्नौ याम्यादिष्वैवमेव नेतृमुखैः।।** इति। प्र-मा ३-१५

केचित् दोषनिमित्तानि निरूपयन्ति। अस्मदादीनामपि यत्राकाले आगच्छ, तिष्ठ मा गच्छ ,क्वनु गच्छसि इत्यादि वचनानि अशुभसूचकानि। तदुक्तम् –

**आगच्छ तिष्ठ मा गच्छ प्रविश क्व नु गच्छसि।**

**इत्यादिवाचः प्रस्थाने भवन्त्यशुभदा दृढम्।।** इति। प्र-मा ३-४

एवं मार्जारपथच्छेदादिकम् अशुभमिति मन्यन्ते । तदुक्तम् -

**पथच्छेदोऽहिमार्जारगोधानकुलवानरैः।**

**सर्षपेन्धनपाषाणतृणानीतिश्च दोषकृत् ।।** प्र-मा ३-१८

किं बहुना एकब्राह्मणस्यापि दोषत्वं परिकल्प्यते । तदुक्तम् –

**ब्राह्मणादि चतुष्कानां दर्शने दोषदायिनः।।**

**एकद्विरेकद्वितयाः व्यक्तयोग्रे समागताः।।** दे-प्र ३-८

केचित् एवं वदन्ति अग्रहारे एकब्राह्मणदर्शनं विना बहिर्गन्तुं न शक्यते अतः अत्र अयं विचारः विद्वत् शकुनं शुभमिति सर्वसम्मतम् । **"विप्रद्वयं यात्रामुख्ये शोभनम्"** इति संहिता वचनम्। नान्दीमुखे मुहूर्तप्रकरणे सर्वत्र वैदिककार्येषु विप्रद्वयस्य आवश्यकता सर्वत्र दृश्यते । एकाकीविप्रस्य आवश्यकता अतिन्यूना एव। विप्रद्वयं शोभनमिति वचनबलात् एकविप्रस्य अशुभत्वम् ऊह्यते। वस्तुतः 'एकविप्रस्य बुधवरत्वात् न शकुनदोषः। यात्राकालेऽपि -

**विशिष्ट विप्रभाषितं शुभग्रहस्य चोदयः।**

**तयोश्च सौम्यवर्गता त्रयो महागुणाः स्मृताः।।** मा ४-३

इति माधवीयवचनात् एकविप्रसान्निध्येऽपि यात्राद्यारम्भः कर्तव्यः। सर्वकर्मारम्भ प्रथमकार्यरूपपशुदानस्य एकः ब्राह्मणः एव विहितः। एवमपि ब्राह्मणस्य भूसुरत्वात् देवत्वकल्पनया न शकुनदोषः इति बहूनामभिप्रायः। एकविप्रस्य शकुनदोषत्वं न दृश्यते। विप्रद्वयस्य मुख्यत्वं दृश्यते एव। विप्रद्वयस्य मुख्यत्वे एकविप्रस्य दोषत्वं कथमिति तेषामभिप्रायः। विप्रद्वयस्य वैशिष्ट्यमस्ति तस्मात् एकविप्रस्य दोषत्वमस्ति इति केचन वदन्ति । वस्तुतः एकविप्रस्य शकुनदोषत्वं नास्ति इति बहूनामभिप्रयः। एवं पाणिग्रहणं तस्यापि द्वयोः समागमः सन्धये शुभशकुनम् । तथापि छेद्भेदादयः दोषकराः सन्ति। आयुप्रश्ने पितृपुष्पं, तिलं, वह्निः,नूतनवस्त्रं, दर्भदद्यादिसकलं अशुभाय भवति ।

**हाहाखेदरवं क्षुतं च पतनं चैत्यध्वजादेस्तथा**

**वस्त्रच्छत्रपदत्रविक्षतिमपि ध्वंसार्थनानागिरः।**

**क्रूराणां मृगपक्षिणां प्रतिदिशं वाचश्च दीपक्षयं**

**पातं पूर्णघटादिकस्य च बुधाः कष्टं निमित्तं विदुः।।** प्र-मा २-१५०

अत्र पूर्णघटस्य पतनं दोषाय इति एकः दैवज्ञः, मृतमृताय विद्यये जलं जलेन युज्यते तस्मात् न दोषः इति केचन। कूपात् मृतघटे जलस्वीकरणसमये मृत् घटः कूपे पतति चेत् दोषो वा न वा इति प्रश्नः। तत्र ऊहापोहपटुः जले जलसमागमः मृति मृत् समागमः शुभशकुनं विवाहः शीघ्रं समागच्छति इत्युक्तवान्। एवं पिपीलिकाः भक्ष्यं स्वीकृत्य एकैकं पदे पदे गमनं दृष्ट्वा अत्र देवस्थाने विशेषावसरे जनाः

तण्डुलादिकं शिरसि धृत्वा अत्र स्थापयन्ति इति फलं वक्तुं शक्यते । दैवगत्या यत् शकुनं दृश्यते तत् दैवज्ञस्योपकाराय दैवोपकाराय च भवति। तदुक्तम् –

**प्रश्ने यदुच्यते यच्च श्रूयते यच्च दृश्यते।**

**तत्सादृश्येन सकलं प्रष्टुर्वाच्यं शुभाशुभम्॥** प्र-मा २-१३१

एवमपि केचित् वस्तुना अशुभशकुने प्रशस्ताः। तदुक्तम् -

**कार्पासौषधकृष्णधान्यलवणं जालादि हिंसार्थकम्**

**भस्मांगारमयश्च तक्रमुरगं पूतिं च विळ्छर्दिते।**

**भ्रान्तापन्नजडान्धमूकबधिरक्लीवांश्च सन्यासिनो**

**यद्यद्दृङ्मनसोऽनिष्टमखिलं कष्टं निमित्तं विदुः॥** प्र-मा ३-१७

**जन्तूनां श्रुतिताडने यदि तयोर्युद्धे क्षुते रोदने**

**क्रोधे पादविषाणपुच्छदळने दन्तक्षते मैथुने॥**

**प्रस्रावेऽपि च बन्धने स्वपुरतो दृष्टे च कोलाहले ।**

**प्राणत्याग निरोधनार्तिसमये हानिः प्रयातुर्भवेत्॥** प्र-कौ २-४

**वस्त्रादिस्खलने दुरुक्तिसमये गर्तादिपाते भये।**

**स्तम्भादैरभिघातने कृशतनौ रोगान्विते वाऽगते ॥**

**भुक्त्वा हे जन गम्यतामिति जनैर्निर्बन्धहस्तग्रहे ।**

**प्रत्याह्वानविधौ प्रयाणसमये रोगः प्रयातुर्भवेत्॥** प्र-कौ २-५ *

**उन्मत्तान्धविरूपपङ्गुजटिलव्याध्यान्विताभ्यङ्गयुक् ।**

**खञ्जैकद्विजमुक्तकेशविधवानग्नक्षुधापीडिताः॥**

**पाखण्डाऽप्रियषण्डमुण्ड्रडवाकुण्डप्रचण्डायुधाः।**

**प्रायः प्राणहराः प्रयाणसमये संदृष्टमात्राः पथि॥** प्र-कौ २-६

एवं गजतुरगवृषादीनां दर्शनं रुतं कीर्तनं च शुभाय भवति। मांसस्य तु दर्शनम् अप्रीतिकरत्वेऽपि शुभशकुनमेव। मद्यं शुभशकुनम्। एवं मधु, घृतं लक्ष्मीलक्षितलक्षणानि, क्षीरेक्षुदण्डः, पक्षिस्वामिमहोक्ष-पक्षिकुलहादयः क्ष्मादेवः युग्मेक्षणवेदाध्ययनशब्दं, मङ्गलपुष्पं, पूर्णकुम्भम् इत्यादि सर्वं शुभशकुनमेव । तदुक्तम् -

**लक्ष्मीलक्षणलक्षितक्षितिपति क्षीरेक्षुदण्डेक्षणं पक्षिस्वामिमहोक्षपक्षिकुलकक्षौद्राक्षतप्रेक्षणम्।**

**रुद्राक्षक्षितिपालकोपकरणक्ष्मादेवयुग्मेक्षणं क्षिप्रं क्षेमकरं प्रयाणसमये यातुश्च सुक्षेत्रदम्॥** प्र-कौ २-१

**वेश्यामङ्गलवाद्यघोषकुसुमच्छत्रप्रदीपानल -सिग्धान्नाम्बुजरत्नशुभ्रवसनस्त्रीमद्यभाण्डध्वजाः।**

**गोवेदध्वनिलाजपूर्णकलशश्रोत्रानुकूलस्वनाज्यद्रव्याम्बुचराः प्रयाणसमये दृष्टाः सुखार्थान्नदाः॥**

प्र-कौ २-२

**पण्यस्त्री पुरुषान्विता स्वपुरतः पुत्रान्विता वागता चैवं गोमृगभृङ्गवानररुरुश्वाश्वाण्डजा भोगदाः।**

**यद्युद्वाहगतिः प्रयातृसुखकृत् पत्नी सुपुत्रार्थदा सर्वं वस्तु शुभं सितं यदि भवेत् कृष्णं तु न प्रायशः॥**

प्र-कौ २-३

**आमं मांसमथासवं मधुघृते धौतांशुकालेपनं**

**रत्नेभद्विजवाजिनश्च नृपतं संवर्धमानं नरं ।**

**देवं पाण्डुरचामरं सुमधुरस्निग्धान्नपाने शवं**

**विप्रौ च ज्वलदग्निमत्र शुभदं विद्यान्निमित्तं बुधः॥** प्र-मा ३-१९

**प्रदक्षिणं मृगखगा यान्तौ नैव श्वजम्बुकौ।**

**अयुग्माश्च मृगाः शस्ता शस्ता नित्यं च पञ्चता॥** दे-प्र ३-१०

एवं –

**वीणावेणुमृदङ्गशंखपटहध्वानं च भेरीरवं**

**गीतं मङ्गलमङ्गनां च गणिकां दध्यक्षतेक्ष्वादिकम् ।**

**दूर्वाचन्दनपूर्णकुम्भकुसुमं मालां फलं कन्यकां**

**घण्डां दीपसरोरुहे च शुभदं विद्यान्निमित्तं बुधः।।** प्र-मा २-१५४

**छत्रं तोरणहृद्ययानशकटं स्तोत्रं च वेदध्वनिम् बद्धं चैकपशुं वृषं च मुकुरं स्वर्णं सवत्सां च गाम्।**

**भक्ष्यं चोधृतमृत्तिकां बुधवरं यच्चान्यदिष्टं श्रुतं दृष्टं श्रोत्रदृशोः शुभं तदखिलं प्रश्ने निमित्तं विदुः।।**

प्र-मा २-१५५

अत्र शकुनविषये लोक एवं प्रमाणम्। एवं शास्त्रं गुरुमुखं इति प्राज्ञाः वदन्ति। तदुक्तम् –

**लोकाच्छास्त्रमुखात्तथा गुरुमुखादन्यन्निमित्तान्तरं**

**विज्ञातव्यमतः शुभाशुभफलं प्राज्ञैः प्रयत्नादिह।**

**यद्यत् पृच्छति पृच्छकोऽन्तिकगतं तन्नाशचिन्हं भवे-**

**न्नाशः स्यादिह तस्य तस्य न चिरात्तद्वयत्यये व्यत्ययः ।।** प्र-मा २-१५६

एवञ्च शकुननिमित्तादिकं सम्यग्विचार्य ग्रहस्थित्यपेक्षां विना फलानि वक्तुं शक्यते । एवं आरूढ लग्नादिभावान् परिशील्य दूतस्य शकुननिरूपणं च कर्तुं शक्यते ।

**प्रश्ने तत्कालजं यद्यन्निर्गमे यद्यदध्वनि। तत्तत्तदावगन्तव्यं निमित्तं च मनीषिभिः॥** दे-प्र ३-२०

# द्वैतसिद्धान्ते साक्षिप्रत्यक्षस्वरूपम्

—डा. पि.पि. श्रीधरोपाध्यायः

Asst Prof of Nyaya &
Principal Investigator - Ashtadashi Project,
The Madras Sanskrit College, Chennai- 600004

**उपोद्घातः-**

आगमप्रामाण्यं समर्थयद्भिः वेदापौरुषेयत्वं समर्थनीयमेव। वेदानाम् अपौरुषेयत्वाभावे आगमस्यापि प्रामाण्यं न सिद्ध्यति। कुतः? आगमेषु परस्परविरोधः दृश्यते। बहूनि मतानि । तेषु तेषु मतेषु तेषां तेषामागमानां प्रामाण्यम्। परस्परविरुद्धमतानुसारेण बहवः परस्परविरुद्धागमाः वर्तन्ते चेत् आगमेन कस्यापि अर्थस्य सिद्धिर्न भवति। वेदस्य अपौरुषेयत्वे तु वेदमूलकत्वं यस्याऽगमस्यास्ति, तेनाऽगमेनैवार्थसिद्धिर्भवति, प्रमेयसिद्धिर्भवति। तथैव प्रत्यक्षप्रामाण्यवादिभिरपि साक्षिप्रत्यक्षस्य नियतयथार्थत्वं नियतप्रामाण्यं समर्थनीयमेव । साक्षिप्रत्यक्षस्य नियतयथार्थत्वे सति तादृशसाक्षिसिद्धस्य बाह्यप्रत्यक्षस्य प्रामाण्यं सिद्ध्यति। अन्यथा इदं प्रत्यक्षं प्रमाणं वा, तत्प्रत्यक्षं प्रमाणं न वेत्याशङ्कायां परिहारः कः? यथा वा आगमयोर्विरोधे सति कस्यचिदागमस्य प्रामाण्यं वेदमूलकतया सिद्ध्यति, तथैव नियतयथार्थभूतेन साक्षिणा यस्य प्रत्यक्षस्य प्रामाण्यं निश्चितं तदेव प्रत्यक्षं प्रमाणमिति निश्चेतुं शक्यते। यथा वा कश्चन पुरुषः सर्वान् प्रति एवं कर्तव्यमेवं वर्तितव्यमित्युपदिशति। परन्तु स्वयं सम्यक् नास्ति चेत्, स्वयं सदाचारी न्यायनिष्ठः न भवति चेत् तस्येतरान् प्रत्युपदेशाधिकारः नास्ति। तथैव साक्षी तावत् सर्वेषां प्रत्यक्षाणां प्रामाण्यनिश्चायकः। स एव साक्षी नियतयथार्थो न भवति चेत्, साक्षिणः प्रत्यक्षप्रामाण्यनिश्चायने सामर्थ्यमेव नास्ति। तस्मात् साक्षिणः प्रामाण्यं, नियतयथार्थत्वं समर्थनीयमेव।

अथ विचारोपयुक्तविषयनिरूपणदृष्ट्या अभियुक्तोक्ततत्तन्मताभिमतप्रत्यक्षलक्षणादीन् सङ्गृह्णामि। "कल्पनापोढम् अभ्रान्तं प्रत्यक्षम्" इति सौगताः। "सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म" इति जैमिनीयलक्षणम् । "इन्द्रियार्थसम्बन्धोत्पन्नम् अव्यभिचारि च तत्प्रत्यक्षम्" इति प्रोक्तमक्षपादेन लक्षणम् । "साक्षात्प्रतीतिः प्रत्यक्षम्" इति प्राभाकराः विदुः। "अर्थाकृत्यापरिणतेन्द्रियवृत्तिरूपानुपातिनी बुद्धिवृत्तिः चितिच्छायापन्नाऽध्यक्षम्" इति पातञ्जलैः कापिलैश्च। "वृत्त्यवच्छिन्नचैतन्यार्थावच्छिन्नचिदेकताज्ञान-मध्यक्षम्" इति अद्वैतिनां निर्णयः। "साक्षात्करणप्रमाकरणं प्रत्यक्षम्" इति विशिष्टाद्वैतिनः। "निर्दोषार्थेन्द्रियसन्निकर्षः प्रत्यक्षम् । इन्द्रियशब्देन ज्ञानेन्द्रियं गृह्यते। तच्च द्विविधम्। प्रमातृस्वरूपं प्राकृतं

च" इति द्वैतवेदान्तिनः। विषयं प्रति स्थितेनाक्षेण ज्ञानोत्पत्त्या अक्षाणामपि कारणत्वेन प्रत्यक्षं सम्मतम्। तथा च प्रमाणलक्षणटीकायाम् "अर्थं प्रति स्थितमक्षं प्रत्यक्षम्" इति।

चक्षुरादिपञ्चेन्द्रियाणि मनश्च ज्ञानेन्द्रियाणीति प्रायः सर्वदार्शनिकसम्मतानि। द्वैतवेदान्ते तु सप्तमं ज्ञानेन्द्रियं संलक्षितम्। तदेव साक्षी। तथा च श्रीमध्वाचार्यवचनं प्रमाणलक्षणे "प्रत्यक्षं सप्तविधं साक्षिषडिन्द्रियभेदेन" इति। अयं च साक्षी प्रमाता आत्मैव। आत्मस्वरूपम्, अन्तःकरणधर्माश्च सुखादयः, बाह्याश्चाकाशकालादयोऽस्य साक्षिणो विषयाः।

अत्र केचन (नैयायिकाः) एवं प्रलपन्ति। ते प्रत्यक्षे अन्तर्भूतमपि किञ्चित् प्रत्यक्षमित्यङ्गीकर्तुं नैव सिद्धाः। उदाहरणार्थं स्मृतिः प्रत्यक्षमेव न भवति, तस्याः प्रामाण्यं तु दूरतोऽपास्तम् इति तेषामाशयः। तत्र च कारणं स्मृतौ यद्भासते तन्नास्ति। इदानीं पाण्डवानां स्मरणं जायते। पाण्डवाः इदानीं न सन्ति। येऽविद्यमानपदार्थाः ते स्मरणे भासन्ते। तस्मात् अविद्यमानार्थविषयीकारिण्याः स्मृतेः प्रामाण्यं कथम् ? अपि च "इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम्" इत्युक्तत्वात्, स्मृत्युत्पत्तौ सन्निकर्ष एव न सम्भवति। असतः पदार्थस्य इन्द्रियेण सह सन्निकर्षाभावे तादृशवस्तुनः प्रतिभासः, प्रत्यक्षं कथं भवेत् इति।

एवं साक्षी इति पृथक् प्रत्यक्षप्रमाणं किमर्थमङ्गीकर्तव्यम्। मानसप्रत्यक्षेणैव सर्वं पूरयितुं शक्यते। दुःखादीनां ज्ञानं मनसैव जायते। किमर्थं साक्षीति पृथक् प्रमाणमङ्गीकर्तव्यम् इत्यपि चर्चा वर्तते।

**तत्र एवं समाधानं, साक्षिसमर्थनं च** –

१) अहमिति ज्ञानं सर्वस्यापि वर्तते। अस्य ज्ञानस्य आत्मा विषयः। केनेन्द्रियेण सन्निकृष्टोऽयमात्मा ज्ञानविषयो भवति। न तावत् चक्षुरादिना। तत्तदिन्द्रियरहितानामपि, सुषुप्तावपि यत्र बाह्येन्द्रियाणि मनश्चोपरतानि, अहमिति ज्ञानसद्भावात्। न चेन्द्रियविषयतामन्तरेण अपरोक्षावभासः सम्भवति। तथा च ज्ञायमान आत्मा येनेन्द्रियेण सन्निकृष्टो भवति, तत् मनआद्यतिरिक्तमेव स्यात्। तच्चेन्द्रियं स्वात्मैव यो ज्ञायमानः।

२) अन्तःकरणधर्माः सुखादयोऽपि अनेनैव स्वरूपेन्द्रियेण सन्निकृष्टाः सन्तः ज्ञातव्याः न बाह्येन्द्रियैः। बाह्येन्द्रियसन्निकर्षेण जायमानानां ज्ञानानां भ्रमत्वसम्भावनासद्भावात्, सुखादिज्ञानस्य च कदापि भ्रमत्वाभावात्। न हि सुखाद्यनुभवः कदापि बाध्यमानो दृष्टः। प्रमाजननसमर्थान्यपि बाह्येन्द्रियाणि मनसः दोषवशात् अप्रमामपि जनयन्ति। अतः सुखाद्यनुभवसाधनमिन्द्रियं तदतिरिक्तं स्यादेव। स च साक्षी एव। अस्य चार्थाव्यभिचारित्वं नियमः। तदुक्तम् आचार्यैः अनुव्याख्याने - "सुदृढो निर्णयो यत्र ज्ञेयं तत् साक्षिदर्शनम् " इति। सुदृढः = कदापि बाधरहितः। निर्णयः अवधारणात्मकः प्रत्ययः। तत्र दोषास्तावत् ज्ञानस्य बलवद्बाधकोपनिपातेन कल्प्याः। साक्षिदर्शनं च निर्णयात्मकमेव भवति। न च बाध्यते इति।

३) इदञ्च चिन्तयेत् यदाकाशज्ञानं कालज्ञानं च सर्वेषां विद्यमानं केन प्रमाणेन जायत इति। तयोः रूपाद्यभावात् न चक्षुरादिगोचरत्वम्। मनश्च स्वातन्त्र्येण बाह्यार्थेषु न प्रवर्तते। तस्य (मनसः) चक्षुरादिद्वारैव बहिः पदार्थविषयकज्ञानजनकत्वेन चक्षुराद्यविषयाणां ज्ञानजनने सामर्थ्याभावात्। अननुसंहितव्याप्तीनामपि कालाकाशादीनां प्रतीतिसद्भावात् नानुमानात् तज्ज्ञानम्। जातिबधिराणामपि उपलम्भेन नागमविषयतापि । एवं प्रसिद्धप्रमाणाविषययोः कालाकाशयोः ज्ञानसाधनेन केनचन भाव्यमेव। स च साक्षी एव ।

**"सत्यत्वं गगनादेश्च साक्षिप्रत्यक्षसाधितम् ॥" (अनु. १.४.६)**

न केवलमान्तरस्य सुखादेः। किन्तु बाह्यस्य गगनादेश्च सत्यत्वं साक्षिप्रत्यक्षसाधितम्।

ननु इह पक्षी पततीत्यत्र इहप्रत्ययविषयस्य आकाशस्य चाक्षुषत्वात् साक्षिसिद्धत्वं कथं, तच्चेत्थम् – इहप्रत्ययः चाक्षुषः अनन्यथासिद्धचक्षुरन्वयव्यतिरेकानुविधायित्वात् पक्षिप्रत्ययवत् इत्यनुमानेन इहप्रत्ययस्य चाक्षुषत्वसिद्धौ, इहप्रत्ययविषयतया आकाशस्य चाक्षुषत्वसिद्धिः इति चेन्न। तदेव हि द्रव्यं चाक्षुषं यन्महत्त्वे सति उद्भूतरूपवत्। आकाशस्तु न चाक्षुषः रूपरहितद्रव्यत्वात् आत्मपवनवत्। तर्हि आकाशस्य अप्रत्यक्षत्वे कथं इह पक्षीति इहप्रत्ययविषयाकाशसम्बन्धित्वेन पक्षिप्रतिभासः इति चेत् तच्च इत्थम् – रूपरहितत्वेन अस्माभिः आकाशस्य प्रत्यक्षत्वमात्रं न निषिध्यते। किन्तु इहेतिप्रत्ययविषयत्वेन प्रसक्तं चाक्षुषत्वमेव निषिध्यते। तथा च साक्ष्युपनीतमेवाकाशम् इहेति चाक्षुषप्रत्यये भासते। यथा घ्राणोपनीतं सौरभ्यं चक्षुषा गृहीते चन्दनखण्डे सुरभि चन्दनमिदमिति चक्षुषा भासते। यथा वा भाट्टानां मतेऽनुपलब्धिरूपषष्ठप्रमाणोपनीतो घटाभावः भूतले घटाभाव इति चाक्षुषप्रत्ययेऽवभासते। तथा साक्ष्युपनीतेनापि आकाशेन विशेषणेन विशिष्ट इहेति चाक्षुषः प्रत्ययः इति आकाशं साक्षिसिद्धम्।

तथा "कालो हि साक्षिप्रत्यक्षः सुषुप्तौ च प्रतीतितः"। सुषुप्तौ च इन्द्रियाणामुपरतत्वात् न बाह्यप्रत्यक्षानुमानागमानां तत्र प्रवृत्तिः। अस्ति तदापि कालप्रतिभासः। एतावन्तं कालं सुखमहमस्वाप्समिति सुषुप्त्युत्थितस्य परामर्शदर्शनात्। न हि अननुभूतस्य परामर्शो युज्यते। अतः परिशेषात् कालः साक्षिवेद्य एवेति। तथा च अनुमानम् - कालः बाह्यप्रत्यक्षाद्यतिरिक्तप्रमाणवेद्यः असत्स्वपि तेषु प्रतीयमानत्वात्। यद्यस्मिन्नसति प्रतीयते तत्ततोऽतिरिक्तप्रमाणवेद्यम्। यथाऽसति चक्षुषि प्रतीयमानो गन्धः तदतिरिक्तघ्राणवेद्यः इति। तथा च न केवलं वर्तमानकालस्य साक्षिवेद्यत्वम्। अपि तु अतीतानागतकालावपि साक्षिवेद्यावेव। उक्तमाचार्यैः -"अतीतानागतौ कालावपि नासाक्षिगोचरौ" इति (अनु १.४.६)

**साक्षिणो नियतयाथार्थ्यम् ।**

द्वैतवेदान्तदर्शने साक्षिजन्यं ज्ञानं न दोषजन्यम्। साक्षिणः अनादित्वात्। अत एव तस्य ज्ञानस्य अबाध्यत्वम्। ननु अनादेरप्यात्मनोऽविद्यासंसर्गः अस्त्येव। तेन च बाह्यार्थप्रतिभासः भवेदिति चेन्न। द्वैतवेदान्तदर्शने अविद्यायाः जीवानां स्वरूपभूतानन्दादिप्रकाशप्रतिबन्धकत्वरूपावरणत्वस्यैव अङ्गीकारात्। तथा च न्यायसुधायामुक्तम् - "अस्माभिः अविद्यायाः कार्यान्तरस्यैवाभ्युपगतत्वात्" इति। बाह्यार्थविषयकत्वरूपविक्षेपहेतुत्वस्यानङ्गीकारात्, साक्षिणो विक्षेपशक्तिसद्भावे तेन जायमानं ज्ञानम् अयथार्थमपि स्यात्। तेन च साक्षिणि अनाश्वासप्रसङ्गः। तथा च करणदोषाद्यनिश्चयप्रसङ्गेन ज्ञानानां भ्रमत्वाभ्रमत्वनिर्धारणाभावप्रसक्त्या अर्थतथात्वातथात्वनिर्णयाभावेन निश्शङ्कोऽविसंवादी व्यवहारो लुप्येत। न च तल्लोपोऽङ्गीकर्तुं शक्यः, सर्वलोकप्रसिद्धत्वात्। तथाविधस्य लौकिकैः परीक्षकैश्च उल्लङ्घनायोगात्। तस्मात् सर्वलोकप्रसिद्धस्य निश्शङ्कस्य अविसंवादिनो व्यवहारस्य सिद्धये वस्तु तथात्वातथात्व-निश्चयकारणभूतो ऽङ्गीकार्यः। तत्सिद्धये च साक्षिणो विश्वसनीयत्वं, तत्सिद्धये च साक्षी सदा निर्दोषो यथार्थ एवाङ्गीकार्यः। तथा चोक्तमनुव्याख्याने आचार्यैः - "तस्मात् सर्वप्रसिद्धस्य व्यवहारस्य सिद्धये। साक्षी निर्दोष एवैकः सदाऽङ्गीकार्य एव नः॥" (२.३.१४)

**साक्षिणो ज्ञानप्रामाण्यव्यवस्थापकत्वम्**

इन्द्रियलिङ्गशब्दैस्तावत् पदार्थानां ज्ञानं जायते। जातस्य ज्ञानस्य तत्प्रामाण्यस्य च ग्रहः प्रवृत्त्यर्थमावश्यकः। प्रवर्तमानस्य पुरुषस्य ज्ञानज्ञानं तत्प्रामाण्यज्ञानं च वर्तत इत्यविवादम्। तथा च ज्ञानतत्प्रामाण्यग्राहकं किमपि सर्वैरङ्गीकरणीयमेव।

द्वैतवेदान्तदर्शने तु साक्षी एव ज्ञानतत्प्रामाण्यग्राहकः। साक्षीतरप्रमाणेन ज्ञानतत्प्रामाण्यग्रहणे तस्य प्रामाण्यज्ञानस्य प्रामाण्यं प्रमाणान्तरेण ग्राह्यं, तस्यापि प्रामाण्यं प्रमाणान्तरेण इत्यनवस्था स्यात्। साक्षीतरज्ञानतत्साधनानां स्वप्रकाशत्वाभावात्। साक्षिग्राह्यत्वे तु साक्षिप्रामाण्यं साक्षिणा एव शक्यग्रहमिति नाऽनवस्था। साक्षिणश्च चेतनत्वेन अजडत्वात् स्वप्रकाशत्वञ्चोपपन्नम्।

अत्रैकः प्रश्नः – ज्ञानस्वरूपग्राहकः साक्षी तत्प्रामाण्यमपि गृह्णाति यदि, तर्हि शुक्तिरजतादि-ज्ञानग्राहकोऽपि स एव इति तत्प्रामाण्यमपि गृह्णीयात् । तथा च शुक्तिरजतादेः सत्यत्वं स्यात् इति।

अत्रैवमुत्तरम् – न साक्षी ज्ञानं गृह्णन् प्रमाणमेव एतदिति गृह्णाति इति नियमः। किन्तु अदोषं चेत् प्रमाणं सदोषं चेदप्रमाणमिति व्यवस्था। यदा प्रामाण्यं निर्दिधारयिषितं तदा परीक्षया दोषाभावं निश्चित्य साक्षिणा प्रामाण्यमवधार्यते। दोषदर्शने तु अप्रामाण्यम्। शुक्तिरजतादिज्ञाने तु परीक्षया दोषप्रतीतेः न तत्र प्रामाण्यग्रहणप्रसङ्गः। नापि शुक्तिरजतादेः सत्यत्वप्रसङ्गः।

अत्र पुनः प्रश्नः – परीक्षासहकृतः साक्षी ज्ञानप्रामाण्यं यदि गृह्णीयात्, तदा अनवस्था स्यात्। तथा हि परीक्षायाः प्रामाण्यावधारणे सत्येव तया ज्ञानप्रामाण्यावधारणं भवेत् , नान्यथा। तथा च तत्रापि परीक्षान्तरमवतरणीयमिति। एवं साक्षिप्रामाण्यावधारणार्थमपि परीक्षा, तत्रापि परीक्षान्तरमित्यनवस्था इति।

अत्र समाधानम् – परीक्षायाः साक्षिणश्च प्रामाण्यं साक्षिणैव गृह्यते। न तत्र परीक्षापेक्षा। तस्मान्नानवस्था। तदुक्तमनुव्याख्याने - "परीक्षादेश्च सत्यत्वं तेन ह्येवं मतं भवेत्" इति (१.४.६)।

अत्र न्यायसुधा च – दोषाभावावधारणार्थं खलु न्यायानुसन्धानं परीक्षा। सन्दिग्धश्चार्थे न्यायविषयः। सन्देहश्च उभयकोटिप्रापकसद्भावे भवति। एवञ्च यत्र यत्र दोषसम्भावनया (दोष)तत्सन्देहः तत्र तत्रैव परीक्षापेक्षा, नान्यत्र । न च सर्वत्र दोषसन्देहोऽस्ति। साक्षिसिद्धेऽर्थे तत्प्राप्त्यभावात्। अतो न परीक्षानवस्था। साक्षिसिद्धेऽपि सन्देहे तदुच्छेदोपायाभावेन व्यवहाराभावप्रसङ्ग इति।

ज्ञानमेव स्वं स्वप्रामाण्यं च गृह्णातीति ज्ञानस्य स्वप्रकाशत्वं वदतां प्राभाकराणां पक्षः। अनुमानमेव ज्ञानतत्प्रामाण्यग्राहकमिति भाट्टानां पक्षः। परन्तु ज्ञानस्य जडत्वेन स्वप्रकाशत्वानुपपत्तेः। तदभावे च अनवस्थायाः दुष्परिहरत्वात्। न ज्ञानप्रामाण्यव्यवस्थापकं किञ्चित्तेषां मते। चैतन्यस्य निर्दोषस्य स्वप्रकाशस्य ज्ञानतत्प्रामाण्यग्राहकत्वे तु अनुपपत्तेरभावात्। एवंरूपस्य साक्षिणोऽङ्गीकारेण दर्शनप्रपञ्चे द्वैतवेदान्तदर्शनस्यासाधारणत्वं महत्त्वं सम्पन्नम्।

**साक्षिणोऽतीतानागतकालतत्सम्बन्धिपदार्थग्राहित्वम्**

१) अस्ति किल सर्वेषामतीतानागतकालज्ञानम्। अन्यथा कथं लिङन्तलृडन्तपदानाम् अवबोधः? मुक्तो भविष्यामीति विश्वासेन किल साधकः अध्ययनादौ प्रवर्तते। उत्तरकालज्ञानाभावे कथं मोक्षज्ञानं भवेत्? अनेन ज्ञायते अस्ति सर्वेषामतीतानागतकालज्ञानमिति। स च कालो न प्रमाणान्तरगोचर इति साक्षिगोचर एव भवेत्।

२) पदानां पदार्थेषु शक्तिग्रहस्तावत् सर्वापेक्षितः। तेन विना वाक्यैः पदार्थसंसर्गविशेषलक्षणवाक्यार्थस्य बोधासम्भवात्। शक्तिग्रहश्च शक्तिविषयपदार्थबोधमपेक्षते। यतः सम्बन्धज्ञानस्य सम्बन्धिज्ञानपूर्वकत्वनियमात्। एष च पदार्थग्रहः प्रमाणान्तरादेव भवेत्। न तु पदादेव। पदात् पदार्थबोधे जाते सम्बन्धिज्ञानस्य जातत्वेन तत्र वाचकत्वशक्तिग्रहः, शक्तिग्रहे सति पदात् पदार्थबोधः इति अन्योन्याश्रयप्रसङ्गात्।

यत्र चातीतानागतार्थसंसर्गः वाक्यार्थः तत्र अतीतानागतार्थग्रहणमावश्यकम्। इदं च ग्रहणं साक्षिणा एव भवेत्, न तु मानान्तरेण। सुखकालाकाशादिग्राहकप्रमाणत्वेन सिद्धस्य साक्षिणः

एतत्सामर्थ्यकल्पनं सुकरम्। साक्षिणमनङ्गीकुर्वतां तु अतीतानागतार्थग्रहणोपाय एव नास्तीति पदार्थशक्तिग्रहः दुरुपपादः स्यात्।

३) अनुमानस्य व्याप्तिः पक्षधर्मता इति द्वयं सामर्थ्यं किल। तस्मात् अतीतानागतवर्तमानेषु सर्वेषु धूमादिषु तथाविधैः सर्वैः वह्न्यादिभिः व्याप्तिः ग्राह्यैव। तदर्थं च अतीतादिसकलधूमवह्न्यादीनां ज्ञानं पूर्वं भवेदेव। प्रसिद्धं चक्षुरादिप्रमाणं तज्ज्ञानोत्पादनेऽसमर्थमिति सर्वसम्मतम्। तथा च साक्षिण एव अतीतादि-सकलधूमवह्न्यादिज्ञानजनकत्वमङ्गीकरणीयम्। अन्यथा अनुमानप्रमाणस्यैव भङ्गः स्यात्।

४) किञ्चास्ति तावत् सर्वेषां सर्व इति शब्दस्य शक्तिग्रहः। अन्यथा "सर्वं खल्विदं ब्रह्म" इत्यादि व्यवहारविलोपप्रसङ्गात्। शब्दशक्तिग्रहश्चार्थग्रहापेक्ष इति सर्वेषां सामान्यतः सर्वपदार्थज्ञानमस्तीत्यङ्गी-कार्यम्। अतीतादिसर्वगोचरं च न साक्षीतरप्रमाणमस्तीति साक्षिण एव सामान्यतः सर्वपदार्थग्रहजनकत्वमङ्गीकार्यम्। तदुक्तमनुव्याख्याने - "अतः सर्वे पदार्थाश्च सामान्यात् साक्षिगोचराः। सर्वमित्येव विज्ञानं सर्वेषां कथमन्यथा॥" (३.२.१)

**उपसंहारः**

आत्मस्वरूपकालाकाशसुखदुःखादिग्राहकत्वेन सिद्ध्यन् साक्षी चैतन्यरूपः निर्दोषः स्वप्रकाशश्च। तेन च लोकसिद्धव्यवहाराद्युपयोगिज्ञानप्रामाण्यग्रहः सूपपादः। एतादृशं बहूपकारिणं बहुविप्लवपरिहारिणं साक्षिणं लक्षितवता द्वैतवेदान्तदर्शनेन श्रीमध्वाचार्यप्रवर्तितेन तत्त्वबुभुत्सोः लोकस्य महानुपकारः कृतः॥

******

# आयुर्वेदस्य दर्शनत्वविचारः।

**Prof. S. Venugopalan.**
Department of Sanskrit.
Sri Jayendra Saraswathy Ayurveda College,
Nazarathpet. Chennai. 600123.

अत्र सर्वदर्शनसङ्ग्रहः प्रधानतया विचारविषयः वर्तते। दर्शनानि आस्तिकनास्तिकभेदेन द्विविधानि। तत्र आस्तिकदर्शनेषु योगदर्शनं पातञ्जलं चित्तवृत्तिनिरोधं प्रधानतया विषयीकरोति। चित्तवृत्तिनिरोधः योगिनां कार्यम्। योगोऽभ्यासनीयः कश्चन विषयः। "अभ्यासवैराग्याभ्यां तन्निरोधः" (पा.यो.१.१२) इति निरोधमार्गः उपदिश्यते भगवता। तत्र अभ्यासः बहुविधः। तत्र प्रधानतया चित्तस्य स्वास्थ्यं परमं मुख्यं कार्यमस्ति। स्वास्थ्यमिति यदैव चिन्त्यते तदा इदं चित्तं मनश्शब्दापरपर्यायं सर्वदा शरीरावच्छिन्नतयैव अनुभूयमानं दृश्यते। ततश्च स्वास्थ्यं चित्तस्य शरीरद्वारा एव सम्पादनीयम् इति ज्ञायते। आयुर्वेदग्रन्थानां तद्गतत्त्वानां च परिशीलने बहुत्र वयं चित्तस्वास्थ्यं कथं प्रधानतया शरीरस्वास्थ्य-हेतुर्भवति इति ज्ञातुम् प्रभवामः। तत्र वाग्भट्टाचार्यस्य अष्टाङ्गहृदये यदा वयं मङ्गलश्लोकं परिशीलयामः तदा अयं विषयः स्पष्टतया ज्ञायते। तथा च –

**"रागादिरोगान् सततानुषक्तान् अशेषकायप्रसृतानशेषान्।**
**औत्सुक्यमोहाऽरतिदाञ्जघान योऽपूर्ववैद्याय नमोऽस्तु तस्मै"॥** इति। (अ.हृ.१/१)

अत्र अरुणदत्तकृतसर्वाङ्गसुन्दराख्यायां व्याख्यायाम् आरम्भवचानि – "रुजन्तीति रोगाः - देहमनसी सन्तापयन्ति इत्यर्थः। ननु मनःस्थितत्वात् मन एव ते रुजन्तीति वक्तुं युक्तम्। देहमनोलक्षणयोः वस्तुनोः आधाराधेयभावेन स्थितत्वात् द्वयोरपि सन्तापः युक्तः; यथा आधेयेन अयोगोलकेन सन्तप्तेन तदाधारस्य कटाहादेः सन्तापः। आधारेण कटाहादिना सन्तप्तेन आधेयस्य घृतादेः सन्तापः। तदेवं रोगादयः द्वयं रुजन्तीति न्याय्यमेतत्"।... "तथा औत्सुक्यमोहारतिदाः इति रागादिरोगाणां विशेषणं दत्तम्। तत्र औत्सुक्यं नाम विषयोत्कण्ठागतोऽभिलाषः। मोहः नाम कार्योऽकार्योऽनभिज्ञत्वम्। अरतिः नाम अनवस्थितिः स्थानासनादिषु"। तथा च रोगाः शरीरे समवक्रान्ताः वस्तुतः मनसि एव आदौ आविर्भवन्ति। तत एव शरीरं ते रुजन्ति इति ज्ञातुं शक्नुमः। आधुनिक वैद्याः अपि – Diseases are psychosomatic इति निर्दिशन्ति। तत्र योगदर्शनेऽपि ईश्वरनिरूपणावसरे **"तज्जपस्तदर्थभावनम्"** (पा.यो.१.२८) इति निरूप्य ततः परं **"ततः प्रत्यक्चेतनाधिगमः अप्यन्तरायाभावश्च" (पा.यो.**१.२९)इति सूत्रे

अन्तरायत्वेन परिगणिताः **"व्याधि-स्त्यान-संशय-प्रमाद-आलस्य-अविरति-भ्रान्तिदर्शन-अलब्धभूमिकत्व-अनवस्थितानि चित्तविक्षेपाः तेऽन्तरायाः"** (पा.यो.१.३०) इति सूत्रितं भगवता पतञ्जलिना। एवमेव एतैः सह **"दुःख दौर्मनस्य-अङ्गमेजयत्व-श्वास-प्रश्वासाः विक्षेपसहभुवः"** (पा.यो.१.३१) इत्यपि। एतेन स्पष्टं ज्ञायते, आयुर्वेदद्वारा चित्तस्वास्थ्यं, ततः योगसिद्धिः, योगसिद्धिद्वारा शरीरस्य रोगशान्तिः इति उभयथा परस्परम् अनयोः सम्बन्धस्य ज्ञायमानत्वात् दर्शनत्वेन परिगणयितुं योगदर्शने ये ये विषयाः विचार्यन्ते ते विषयाः आयुर्वेदेऽपि विचार्यन्ते इत्यतः आयुर्वेदोऽपि दर्शनत्वेन संज्ञां लब्धुं योग्यं शास्त्रमेव।

तथा च दर्शनग्रन्थेषु सामान्यतया के विषयाः प्रतिपाद्यन्ते? इति चिन्तयामः चेत् प्रधानतया प्रपञ्चसृष्टिविकासक्रमः, सुखप्राप्तये, दुःखनिवृत्तये च उपायाः, आत्मा, मनः, ईश्वरः, मोक्षः, प्रमाणानि, प्रमेयाणि च इति एतेषु विषयेष्वेव विचाराः दृश्यन्ते। एते सर्वेऽपि विषयाः आयुर्वेदेऽपि विचार्यन्ते। तत्रापि प्रधानतया अस्य शास्त्रस्य सिद्धान्तानां प्रतिपादनाय अत्यावश्यकानां विषयाणां विचारः यथा आत्मा, मनः, इन्द्रियाणि, तेषां कार्याणि इति सर्वोऽपि विषयः अत्र विचार्यते। ततः किञ्चित् इव अत्र परिशीलयामः।

अत्र वस्तुतः आयुर्वेदग्रन्थेषु अतिप्राचीनः समुपलभ्यमानः ग्रन्थः, चरकाचार्यस्य चरकसंहिता एव। स च ग्रन्थः अग्निवेशमुनिना विरचितः। सः च पुनर्वसु आत्रेयस्य अन्यतमः शिष्यः। तदुच्यते तत्रैव चरकसंहितायाम्,

**"अथ मैत्रीपरः पुण्यमायुर्वेदं पुनर्वसुः। शिष्येभ्यो दत्तवान् षड्भ्यः सर्वभूतानुकम्पया॥"**

**"अग्निवेशश्च भेलश्च जतूकर्णः पराशरः। हारीतः क्षारपाणिश्च जगृहुः तन्मुनेर्वचः॥"**

(च.सं.सू.1/31)

**बुद्धेर्विशेषः तत्रासीत् नोपदेशान्तरं मुनेः। तन्त्रस्य कर्ता प्रथमम् अग्निवेशो यतोऽभवत्॥"**

(च.सं.सू.1/32) इत्येवं रूपेण प्रप्रथमम् अग्निवेशेन आयुर्वेदसिद्धान्तः ग्रन्थरूपेण भुवम् आनीतः इति। कालान्तरे तस्मिन् ग्रन्थे कतिपयभागेषु नष्टेषु सत्सु चरकाचार्यः तथा दृढबलाचार्यः इति द्वाभ्यामाचार्याभ्यां अग्निवेशकृतं तन्त्रं प्रतिसंस्कृतम्। तदुच्यते–

**"अग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते। यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्"** (दृढबलः) इति। अत्र चरकटीकायां चक्रपाणिदत्तः एवं ब्रवीति; **"पातञ्जलमहाभाष्यचरकप्रतिसंस्कृतैः। मनोवाक्कायदोषाणां हर्त्रेऽहिपतये नमः॥"** (चक्रपाणिः) इति। भगवान् पतञ्जलिरेव योगदर्शनं चित्त-स्वास्थ्याय, महाभाष्यं वाक्स्वास्थ्याय, तथा चरकाचार्यत्वेन पुनरवतीर्य भूमौ कायस्वस्थ्यार्थम् आयुर्वेदशास्त्रं च प्रणिनायेति। तदुच्यते **"कायवाग्बुद्धिविषयाः ये मलाः समुपस्थिताः। चिकित्सा-लक्षणाध्यात्मशास्त्रैस्तेषां विशुद्धयः॥"** (वाक्यपदीयम्) इति। अथ कुतः आयुर्वेदः उपदेष्टव्यः इति आदौ

चरकाचार्यः विचारयन् इदमेव ब्रवीति, स्वास्थ्यं धर्माद्यनुष्ठाय अत्यावश्यकम् इति ब्रुवन्, **"धर्मार्थकाममोक्षाणामारोग्यं मूलमुत्तमम्। रोगाः तस्यापहर्तारः श्रेयसो जीवितस्य च॥"**(च.सं.सू.१.१) इति उपोद्घाततया वक्ति। तत्रैव दृश्यते **"धर्मार्थं नार्थकामार्थं आयुर्वेदो महर्षिभिः। प्रकाशितो धर्मपरैः इच्छद्भिः स्थानमक्षरम्॥"**(चक्रपाणिः) इति च।

तत्र 'अक्षरं स्थानम्' इति कथ्यमानः पदार्थः मोक्ष एव। अतः मोक्षविषये कथं योगः उपायः भवति इति आयुर्वेदे यदुच्यते तदत्र किञ्चित् परिशीलनीयं वर्तते। ततः पूर्वम् आयुर्वेदस्य दर्शनत्वोप-स्थापनाय आत्मविषयकः विचारः यः आयुर्वेदीयः सः किञ्चिदिव प्रस्तूयते। तत्र चरकसुश्रुतयोः वैशेषिकसाङ्ख्यदर्शनयोः प्रमेयानि उद्दिष्टानि वर्तन्ते, वैशेषिकोक्ताः षट् पदार्थाः, नव द्रव्याणि च चरकसंहितायां सूत्रस्थानस्य प्रथमाध्याये निर्दिश्यन्ते, तथापि चरकसुश्रुताभ्यां बहुत्र साङ्ख्यमतम् आदृतम्। क्वचित् क्वचित् साङ्ख्याद्भिन्नं पृथगेव आयुर्वेदमतम् उपस्थाप्यते। तत्र चरके मूले चतुर्विंशतितत्त्वानि एव आद्रियन्ते। तद्यथा -

**"खादयश्चेतनाषष्ठा धातवः पुरुषः स्मृतः। चेतनाधातुरप्येकः स्मृतः पुरुषसंज्ञकः॥"** (च.शा.1/16)।

"**पुनश्च धातुभेदेन चतुर्विंशतिकः स्मृतः। मनोदशेन्द्रियाण्यर्थाः प्रकृतिश्चाष्टधातुकी॥**"(च.शा.16-17) इति।

तत्र चरकस्य शारीरस्थाने अव्यक्तस्वरूपम् एकमेव तत्त्वं गृहीतम्। तत्तु आत्मा एव यः चेतनाधातुः, तस्माच्च अव्यक्तपुरुषात् महदादितत्त्वानि सम्भूतानि। एवं मूलप्रकृतिपुरुषयोः एकस्मिन् अव्यक्ते अन्तर्भावः चरकमते। सुश्रुते तु प्रकृतिपुरुषयोः पृथङ्निर्देशात् पञ्चविंशतितत्त्वानि इति अनयोर्मध्ये भेदः। तत्र चरकटीकायां चक्रपाणिदत्तः विषयेऽत्र इत्थं ब्रवीति। "यद्यपि पञ्चविंशतितत्त्वमयोऽयं पुरुषः साङ्ख्यैः उच्यते - मूलप्रकृतिरविकृतिः (च.शा.1/17) इत्यादि। तत्र न प्रकृतिः न विकृतिः पुरुषः इति पुरुषतत्त्वं पृथगेव निर्दिश्यते, तथापि इह प्रकृतिव्यतिरिक्तम् उदासीनं पुरुषम् अव्यक्तसाधर्म्यात् अव्यक्तायां प्रकृतौ एव प्रक्षिप्य अव्यक्तशब्देनैव गृह्णाति। तेन चतुर्विंशतिकः पुरुषः इत्यविरुद्धम्। उदासीनस्य हि सूक्ष्मस्य भेदप्रतिपादनम् इह अनतिप्रयोजनम् इति न कृतम्। **दशेन्द्रियाणि** इति पञ्चकर्मेन्द्रियाणि, पञ्च बुद्धीन्द्रियाणि। **अष्टधातुकी** इति खादिपञ्चक-बुद्ध्यव्यक्ताहङ्काररूपा" इति।

तत्र आत्मस्वरूपम् इत्थं प्रतिपाद्यते चरकस्य सूत्रस्थाने।

"**निर्विकारः परस्त्वात्मा सत्त्वभूतगुणेन्द्रियैः। चैतन्ये कारणं नित्यः द्रष्टा पश्यति हि क्रियाः॥** (च.सू.१.५५)

**खादीनि बुद्धिरव्यक्तम् अहङ्कारस्तथाऽष्टमः। भूतप्रकृतिरुद्दिष्टा विकाराश्चैव षोडश॥**

**बुद्धीन्द्रियाणि पञ्चैव पञ्च कर्मेन्द्रियाणि च। समनस्काश्च पञ्चार्थाः विकारा इति संज्ञिताः॥**

**इति क्षेत्रं समुद्दिष्टं सर्वमव्यक्तवर्जितम्। अव्यक्तमस्य क्षेत्रस्य क्षेत्रज्ञमृषयो विदुः॥**

**जायते बुद्धिरव्यक्तात् बुद्ध्याऽहमिति मन्यते। परं खादीन्यहङ्कारात् उत्पद्यन्ते यथा क्रमम्॥**

**ततः संपूर्णसर्वाङ्गः जातोऽभ्युदित उच्यते**। (च.शा.१.६३-६७) इति सृष्टिक्रमे आयुर्वेदस्य अभिप्रायं प्रपञ्च्य तत्र आत्मनः स्वरूपमपि निरूपितम्। तत्र चरकटीकाकारः - "**खादीनि** सूक्ष्मभूतखादीनि तन्मात्रशब्दाभिधेयानि। **बुद्धिः** महच्छब्दाभिधेया। **अव्यक्तं** मूलप्रकृतिः। **अहङ्कारः** बुद्धिविकारः। स च त्रिविधः, भूतादिः, तैजसः, वैकारिकश्चेति। भूतानां स्थावरजङ्गमानां प्रकृतिर्भूतप्रकृतिः। अत्र च अव्यक्तं प्रकृतिः एव परम्, बुद्ध्यादयस्तु स्वकारणविकृतिरूपा अपि स्वकार्यापेक्षया प्रकृतिरूपा इह प्रकृतित्वेनोक्ताः। विकाराः एव षोडश, परं न प्रकृतयः। बुद्धेः इन्द्रियाणि **बुद्धीन्द्रियाणि**। **पञ्चार्थाः** इति स्थूला आकाशादयः शब्दादिरूपाः। गुणगुणिनोः हि परमार्थतो नास्त्येव भेदः अस्मिन् दर्शने। **अव्यक्तवर्जितमिति** प्रकृत्युदासीनवर्जितम्। प्रकृतेश्च उदासीनपुरुषचैतन्येन चैतन्यमस्त्येव। **बुद्ध्याऽहमिति मन्यते** इति बुद्धेर्जातेन अहंकारेण अहमिति मन्यते इत्यर्थः। **खादीनि** इति खादीनि सूक्ष्माणि तन्मात्ररूपाणि, तथा एकादशेन्द्रियाणि। **यथाक्रममिति** यस्मादहङ्कारादुत्पद्यते तेन क्रमेण, तत्र वैकृतात् सात्त्विकाहङ्कारात् तैजसस्साहाय्यात् एकादशेन्द्रियाणि भवन्ति। भूतादेस्त्वहङ्कारात् तस्मात् तैजसस्साहाय्यात् पञ्च तन्मात्राणि। **ततः** इति आहङ्कारिककार्यानन्तरं तन्मात्रेभ्यः उत्पन्नस्थूलभूतसम्बन्धात्। **सम्पूर्णसर्वाङ्गः** जातः इति आदिसर्गे जातः ॥ एतत् चरके एवं दृश्यते, सुश्रुतः तु, अव्यक्तं, महान्, अहङ्कारः, पञ्चतन्मात्राणि चेति अष्टौ प्रकृतयः। शेषाः षोडश विकाराः। तत्र सर्व एव अचेतनः एष वर्गः, पुरुषः, पञ्चविंशतितमः कार्यकारणसंयुक्तः चेतयिता भवति। सत्यपि अचैतन्ये प्रधानस्य पुरुषकैवल्यार्थं प्रवृत्तिमुपदिशन्ति क्षीरादींश्च हेतूनुदाहरन्ति।(सु.शा.1.8)। एतैः इदं ज्ञायते यत् आत्मनः अव्यक्तस्वरूपात् सृष्टिः सम्भूता इति वक्तुं न शक्यते। चरकसुश्रुतानुसारेण मूलप्रकृतेः एव महदादिसर्गः भवति। सृष्ट्युत्पत्तौ आत्मनः कर्तृत्वं नास्ति। पुरुषस्तु कार्येण महदादिविकारगणेन कारणेन मूलप्रकृत्या च चेतयिता भवतीति साङ्ख्यमतमेव आयुर्वेदे स्वीकृतम्। चरकमते तु प्रकृत्युत्पन्नस्य शरीरस्य चैतन्यं नास्ति। आत्मना शरीरं चेतनं भवति। आत्मनो भोगायतनमेव शरीरम्। ज्ञानं, सुखदुःखे, कर्मफलम् इत्येतानि आत्मनि संश्रितानि। आत्मनो भोगार्थम् एव सर्वं शरीरादिकं जातम्। अन्यथा सर्वम् इदं निरर्थकं निष्प्रयोजनम् स्यात्। अतः सर्वसर्गस्य पुरुषः निमित्तकारणं इति सिद्धान्तः चरकाचार्यस्य मतम्।

**साङ्ख्यायुर्वेदयोः मतभिन्नत्वम्**

तत्र चरकसुश्रुतादिभिः बहुशः साङ्ख्यमतमेव स्वसिद्धान्तावतरणाय स्वीकृतम्। क्वचित् वैशेषिकादपि। परन्तु बहुत्र साङ्ख्यसिद्धान्तात् भेदः अपि दृश्यते।

उदाहरणार्थं पुरुषतत्त्वं स्वीकुर्मः, सांख्ये पुरुषः निर्गुणः उदासीनः, आयुर्वेदे तु सगुणः कर्ता च। यथा चेतनपुरुषसंसर्गात् अचेतनाऽपि प्रकृतिः सचेतना इव भवति, एवं त्रिगुणात्मकप्रकृतिसंसर्गात् पुरुषोऽपि सत्त्वादिगुणयुक्तो भवति। यथा तडागोदके प्रतिबिम्बितः चन्द्रः तडागोदकप्रकम्पनेन प्रकम्पित

इव भवति एवं सत्त्वादिरूपे महदादौ प्रतिबिम्बिताः पुरुषाः सत्त्वादिमया इव भवन्ति। पुरुषाणां सत्त्वादिमयत्वं न वास्तवम्, तथापि प्रकृतिसंयुक्तस्यैव पुरुषस्य आयुर्वेदे विचारः क्रियते। तथा च आयुर्वेदे पुरुषः न सर्वगतः। किन्तु असर्वगतः। भूतचिन्ता आयुर्वेदे प्रधाना। प्रकृतेः अखिला सृष्टिः सञ्जाता इति स्वीकारेऽपि आयुर्वेदे सकलसृष्ट्युत्पादविचारस्य प्रयोजनं नास्ति। सर्वद्रव्याणां पाञ्चभौतिकत्वात् पञ्चभूतविचारः आयुर्वेदे प्रधानः, प्रकृतेः सत्त्वादिगुणाः पञ्चभूतेषु सन्ति। पञ्चभूतेभ्यः यत् द्रव्यजातं संजातं तदपि कारणानुरूपं त्रिगुणलक्षणमेव भवति। एवं भूतजन्यानां द्रव्याणाम् आयुर्वेदे प्रधान्येन विचारः क्रियते चिकित्सोपयोगित्वात्।

अत्र सिद्धान्तः सङ्ग्रहेण परिचीयते। इन्द्रियाणि भौतिकानि, इन्द्रियार्थाः अपि पाञ्चभौतिकाः इन्द्रियाणां स्वार्थग्रहणम् विद्यते। तेन कर्मेन्द्रियाणि अपि ज्ञानेन्द्रियाणि इव पाञ्चभौतिकान्येव। मनसः भौतिकत्वविषये आयुर्वेदे स्पष्टं वचनं किमपि न दृश्यते। पाञ्चभौतिकाहारदोषैः मनसि उन्मादादि विकारदर्शनात्, सात्त्विकाहारेण मनसो वैमल्यदर्शनात्, अन्नमयं हि सौम्य ! मनः इति उपनिषद्वचनाच्च मनसः भौतिकत्वम् अनुमेयमेव।

पुरुषतत्त्वविचारे अत्र विशेषः दृश्यते। विभिन्नदृष्ट्या पुरुषः त्रिधातुकः, षड्धातुकः, चतुर्विंशतिधातुकः इति त्रेधा व्यवहारः। **"सत्त्वम्, आत्मा, शरीरञ्च त्रयमेतत् त्रिदण्डवत्"** (च.स.१.४६) इति चरकवचनम्, अतः त्रिधात्वात्मकः पुरुषः षड्धात्वात्मकः तु पञ्चमहाभूतानि, जीवात्मा चेति बहुत्र चिकित्सादृष्ट्या षड्धातुकत्वमेव स्वीक्रियते। परमसिद्धान्तः चतुर्विंशतितत्त्वात्मकः पुरुषः।...चतुर्विंशतिको ह्येष राशिः पुरुषसंज्ञकः (च.शा.१.३५) इति। लोकपुरुषसाम्यवादः आयुर्वेदे प्रसिद्धः। लोको नाम सृष्टिः, सम्मितो नाम तुल्यः। पुरुषोऽयं लोकसम्मितः इत्युवाच भगवानात्रेयः यावन्तो हि लोके (मूर्तिमन्तः) भावविशेषाः तावन्तः पुरुषे, यावन्तः पुरुषे तावन्तः लोके।

एवं मनसः विषयेऽपि महान् विचारः दृश्यते। तत्र मुख्यांशः एवम् - धीधृतिस्मृतयः इति तिस्रः मनसः शक्तयः गुणाः वा अभिहिताः। धीः नाम सारासारविवेकशक्तिः। तया आचारविचारेषु समत्वं भवति। विषमाभिनिवेशः बुद्धिभ्रंशात् भवति। धृतिः नाम स्थैर्यं संयमो वा, अहितात् नियन्तुं धृतिरेव समर्था। धृतिभ्रंशात् चित्तं विषयप्रवणं भवति। अहितकर्मणि च प्रवर्तते। अतश्च धृतिः नियमात्मिका इत्युच्यते। स्मृतिः स्मरणशक्तिः। अनुभवः यथार्थोऽयथार्थो वा स्मृतौ स्थापितो भवति। रजोमोहादिदोषैः स्मृतिभ्रंशः भवति। स्मृतिभ्रंशात् आचारविचारयोः प्रमादाः भवन्ति। धीधृतिस्मृतिभ्रंशात् पुरुषः यत् अशुभं कर्म कुरुते तत् प्रज्ञापराधः इत्युच्यते।

**धीधृतिस्मृतिविभ्रंशः सम्प्राप्तिः कालकर्मणाम्। असात्म्यार्थागमश्चेति ज्ञातव्या दुःखहेतवः॥**

(च.शा.१.९८) इति दुःखहेतौ विद्यमाने सति पुरुषस्य चेष्टास्सर्वा अपि विपरीता एव भवन्ति। तदुच्यते

**धीधृतिस्मृतिविभ्रष्टः कर्म यत् कुरुतेऽशुभम्। प्रज्ञापराधं तं विद्यात् सर्वदोषप्रकोपणम्॥**

(च.शा.१.१०२) इति, मनोविकारा अपि अत्र विचार्यन्ते।

आयुर्वेदे चतुश्चत्वारिंशत् वादमार्गाः उक्ताः ये च बहवो न्यायदर्शने वर्णितैः मार्गैः समतां यान्ति।

योगदर्शनवत् आयुर्वेदोऽपि चेतसो नियन्त्रीकरणात् वेदनाऽज्ञानं वर्णयति -

**योगे मोक्षे च सर्वासां वेदनानामवर्तनम्। मोक्षे निवृत्तिर्निःशेषा योगो मोक्षप्रवर्तकः॥** (च.शा.१)

अन्यच्च -

**आत्मेन्द्रियमनोर्थानां सन्निकर्षात् प्रवर्तते। सुखदुःखमनारम्भादात्मस्थे मनसि स्थिरे॥**

**निवर्तते तदुभयं वशित्वं चोपजायते। सशरीरस्य योगज्ञास्तं योगमृषयो विदुः॥** (च.शा.१)

योगसाधनेन यत् शुद्धसत्त्वसमाधानं जायते, तद्विषये उच्यते -

**आवेशश्चेतसो ज्ञानमर्थानां छन्दतः क्रिया। दृष्टिः श्रोत्रं स्मृतिः कान्तिः इष्टतश्चाप्यदर्शनम्॥१४०॥**

**इत्यष्टविधमाख्यातं योगिनां बलमैश्वरम्। शुद्धसत्त्वसमाधानात्तत्सर्वमुपजायते॥१४१॥** (च.शा.१)

मोक्षनिर्वचनमुच्यते -

**मोक्षो रजस्तमोऽभावात् बलवत्कर्मसङ्क्षयात्। वियोगः सर्वसंयोगैरपुनर्भव उच्यते॥१४२॥** (च.शा.१)

प्रसङ्गागतत्वात् अनतिविस्तरेण मोक्षोपायाः अप्युच्यन्ते -

**सतामुपासनं सम्यगसतां परिवर्जनम्। व्रतचर्योपवासौ च नियमाश्च पृथग्विधाः॥१४३॥**

**धारणं धर्मशास्त्राणां विज्ञानं विजने रतिः। विषयेष्वरतिर्मोक्षे व्यवसायः परा धृतिः॥१४४॥**

**कर्मणामसमारम्भः कृतानां च परिक्षयः। नैष्कर्म्यमनहङ्कारः संयोगे भयदर्शनम्॥१४५॥**

**मनोबुद्धिसमाधानमर्थतत्त्वपरीक्षणम्। तत्त्वस्मृतेरुपस्थानात् सर्वमेतत् प्रवर्तते॥१४६॥** (च.शा.१)

एवंविधप्रसङ्गैः आयुर्वेदः आरोग्यसाधनेन वस्तुतः मोक्षप्राप्तिमिच्छतीति वक्तुं शक्नुमः।

आयुर्वेदे विविधाः तन्त्रयुक्तयः उच्यन्ते । (च.सि.१२, सु.उ.६६) इत्यादिषु। यथैव योगशास्त्रे वायुनिरोधात् सर्वरोगनियन्त्रणमुक्तम् , तद्वदेव आयुर्वेदे वायोः महती प्रसक्तिर्भवति। यथोच्यते चरके **वायुस्तन्त्रयन्त्रधरः** इत्यादौ। एवमादिभिः सन्दर्भैः आयुर्वेदस्य दर्शनत्वं सिध्यति इति शम्।

# सर्वदर्शनसङ्ग्रहे चार्वाकमतस्य विमर्शः

**Dr Sharda Narayanan**

Dr MGR Janaki College, Chennai

1. **प्रस्तावना** Introduction

चार्वाकाः लोकायताः विषयसुखमेव पुरुषाणां प्रवृत्तौ हेतुं मन्यन्ते। विमर्शनं विना साक्षात् यत् निश्चितं भवति तदेव तेषां ज्ञानसंज्ञां लभते। अन्यत् सर्वं वृथा मृषा च बालजल्पनमिव निरर्थकं मन्यते।

चारु+ वाक् इति संयुज्य चार्वाक इति पदं व्यवह्रियते येन ते पटु भाषन्ते इति ज्ञायते। सामान्यजनेषु अपण्डितेषु प्रसिद्धाः इति भासते। शास्त्रविषयेषु वैदिकपद्धतिं निराकुर्वन्ति बहु दूषयन्ति च। सर्वेषु आस्तिकदर्शनेषु नास्तिकधुरन्धरस्य चार्वाकस्य पूर्वपक्षं पुरस्कृत्य उत्तरपक्षः प्रस्तूयते यतः सिद्धान्तं स्थापयितुम् अयं मार्गः अनिवार्यो भवति।

चार्वाकमतस्य प्रसिद्धिः अतिप्राचीना सहस्रेभ्यो वर्षेभ्यः पूर्वमेव प्रचलिता। तां च सामान्यजनानां वाणीं मन्यामहे। शास्त्रेषु तदाक्षेपाणां वयं द्वैविध्यं पश्यामः। प्रथमतः ते धर्मं निराकृत्य तद्विरोधे यत्किमपि वक्तुं प्रवृत्ता भवन्ति। तथापि ते किञ्चित् वैज्ञानिकमार्गमाश्रित्य स्वतन्त्रम् आलोचयन्ति इति द्वितीयम्। लोकस्य वैज्ञानिकपद्धतिमनुसृत्य विचारेण भवितव्यम् इत्यपि उपकारो भवत्येव। दर्शनेषु चार्वाकमतस्यापि समाधानमुक्त्वा सिद्धान्तस्थापनं भवति इति अस्माकं ग्रन्थपरम्परायां तस्मात् प्रोत्साहः लभ्यते। ग्रन्थेषु प्रायेण चार्वाकमतस्य उल्लेखने बहवः आरोपाः भूयांसि दूषणानि च वर्ण्यन्ते परन्तु चार्वाकाः कथमपि स्वमतं न समर्थीकुर्वन्ति। यावत् पर्यन्तं प्रश्नाः न उद्यन्ति तावदेव तेषां मतं चारु दृश्यते – अन्ततः प्रतिप्रश्नस्य उत्तरं नैव दृश्यते। बालानां विचार इव बालिशत्वं भजते।

2. **चार्वाकमतस्य वर्णनम्** Tenets of Cārvāka

चार्वाकाः बृहस्पतिमतानुसारिणः नास्तिकशिरोमणयः मन्यन्ते येषां चेष्टितं दुरुच्छेदं हि मन्यते। तद्दर्शने शरीरातिरिक्त आत्मा नाभ्युपगम्यते। शरीर एव सज्जनो दुर्जनो वा यस्य विषयसुखमेव परमार्थतः जीवनस्य लक्ष्यं प्रवृत्तिप्रेरकं च। शरीरस्य भोगायतनस्य मरणमेव अन्तः। मुक्त्याः सद्भाव एव नास्ति। भोगायतनस्य असङ्ख्याः कामाः समुद्भवन्ति येषां प्राप्तये अर्थोऽपि इष्यते। अतः अर्थकामौ द्वावेव पुरुषार्थौ। अत्र धर्मस्य मोक्षस्य वा अवकाशो नास्ति। पुण्यकार्येषु धार्मिकजनाः कुतः सुखमनुभवन्ति इति चार्वाकाः नैव चिन्तयन्ति, केवलं धर्मस्य निषेधे एव तेषां मतिः प्रचलति। **भस्मीभूतस्य देहस्य पुनरागमनं कुतः** इति श्रूयते।

अस्मिन् मते मनुष्यस्य जीवने सर्वासां प्रवृत्तीनाम् उद्देशः विषयसुखेष्वेव भवेत्। इतरस्य अप्रयोजनत्वात्। लोके दुःखमपि बहु अनुभूयते इति सुखं न त्यजेत् मेधावी। यथा कश्चित् मत्स्यार्थी सकण्टकान् एव मीनान् प्राप्नोति, गृह्णाति, कण्टकान् उद्यमेन परिहृत्य यथेच्छं स्वादु भक्षयति। धान्यप्राप्तावपि कृषिकः बहु कष्टम् अनुभूय तुषकादीनि निष्कास्य यावदादेयं धान्यम् आदाय एव निवर्तते। लोके सुखदुःखयोः मिश्रणमेव पश्यामः तथापि सुखप्राप्तिरेव पुरुषार्थो मन्यते। दुःखभयात् लोके मूर्खा एव सुखं त्यजेयुः।

अत्र सुखप्राप्तौ स्वार्थपराः चार्वाकाः पापपुण्यं न पश्यन्ति। अतः धर्मः अनपेक्षितः, धर्मप्रबोधिकाः श्रुतयोऽपि निरर्थिकाः। वैदिकपरम्परां चार्वाकाः नितरां निन्दन्ति। इतरेषु दर्शनेषु पञ्चभूतानाम् अङ्गीकारेऽपि चार्वाकमते चत्वारि एव तत्त्वानि अङ्गीकृतानि पृथिवी, आपः, तेजो वायुश्च। आकाशः कुतो वा नाभ्युपगम्यते इति नैव स्पष्टीक्रियते। वैज्ञानिकदृष्ट्याऽपि आकाशे एव सर्वं प्रतिष्ठितं भवति, सर्वस्य आधारापेक्षत्वात्। परन्तु यत्किमपि विमर्शेन प्राप्यं तत् चार्वाकेन शीघ्रं त्यज्यते इति प्रतीयते।

शरीरे चतुर्णां भूतानाम् समागमे चैतन्यं स्वयं समुद्भवति यथा किण्वादिभ्यो द्रव्येभ्यो मदशक्तिः यथा वा ताम्बूलचर्वणे ताम्बूलरागम्। अत एव उच्यते, "अहं स्थूलः" "अहं कृशः" इत्यादि। यदुच्यते, "मम शिरः" "मम हस्तः" इति, तदौपचारिकम् इत्यवगन्तव्यम्।

प्रमाणविषयेऽपि अहो चार्वाकमतस्य वैचित्र्यम्। ते प्रत्यक्षमेकमेव प्रमाणं मन्यन्ते। अनुमानादेः अनङ्गीकारेण प्रामाण्याभावः। यत्र लोके पशवोऽपि कदाचित् अनुमानं प्रयुञ्जते, बृहस्पतिशिष्याः तं प्रमाणं नाभ्युपगच्छन्ति।

### 3. **अनुमानविषये चार्वाकमतम्** Cārvāka on Inference

अनुमानादि प्रमाणं भ्रान्तिविजृम्भणम् इति लोकायताः। अनुमाने पक्षधर्मताज्ञानं व्याप्तिज्ञानेन सह साध्यं साधयति। अत्र व्याप्तिज्ञानं मुख्यतः गमकं भवति। अत्र चार्वाकाः पृच्छन्ति केन प्रमाणेन व्याप्तिर्दृश्यते इति। व्याप्तिः ज्ञातुं न शक्यते इति तेषां मतम्। हेतुस्तु दृश्यते एव परन्तु केन सम्बन्धेन साध्यं परामृश्यते इति ज्ञातुं न शक्यते एव। अत्र किम् प्रमाणं भवितुमर्हति? न प्रत्यक्षं यतः प्रत्यक्षे विषयस्य इन्द्रियसन्निकर्षः अपेक्षितः। प्रत्यक्षं बाह्यम् आन्तरं च भवति। व्याप्त्या सह बाह्येन्द्रियसन्निकर्षो न संभवति। अन्तःकरणम् मनः। तस्य बाह्ये अर्थे बाह्येन्द्रियैर्विना स्वातन्त्र्येण प्रवृत्तिर्न संभवति। चक्षुरादीनां स्वविषयेषु सन्निकर्षः संभवति, परन्तु मनसः बाह्यवस्तुषु सन्निकर्षः बहिरिन्द्रियद्वारा एव भवति।

व्याप्त्यवगमे अनुमानमेव उपायो न भवितुमर्हति अनवस्थाप्रसङ्गात्। न शाब्दं, वैशेषिकमते तस्यापि अनुमाने अन्तर्भावात्। अतः यदा व्याप्तिरेव ज्ञानागोचरा, अनुमानं न प्रमाणम्। धूमदर्शनाद् वह्निज्ञानं याद‍ृच्छिकमुच्यते। अनुमानम्, शाब्दम्, अर्थापत्तिः इत्यादि भ्रान्तिसंश्रितं वस्तुतः अप्रमाणमेव।

पाप-पुण्य-अदृष्ट-कर्मफल-आदीनां निषेधे जगद्वैचित्र्यस्य कारणत्वं न वक्तुं शक्यते इति चेत्, न। तत्रापि न कोऽपि क्लेशः। स्वभाव एव सर्वस्य कारणमिति मन्तव्यम्।

### 4. **दर्शनेषु अनुमानविचारः** Inference in Darśana

बाह्यविषयस्य प्रत्यक्षे इन्द्रियार्थसन्निकर्षः अपेक्षितः। स सन्निकर्षः न्यायमते षड्विधः, मीमांसाशास्त्रे च त्रिविधः। एवं द्रव्य-गुण-कर्म-सामान्य-समवाय-अभावाः न्यायमते प्रत्यक्षेण गृह्यन्ते। भाट्टमीमांसायां समवायः नाभ्युपगम्यते परन्तु तादात्म्यसंबन्धः प्रसिद्धः। तत्र अभावं प्रत्यक्षविषयं नाङ्गीकुर्वन्ति परन्तु अनुपलब्धिप्रमाणेन गृह्णन्ति। उभयमतेऽपि सामान्यं प्रत्यक्षेणैव गृह्यते। येनेन्द्रियेण या व्यक्तिर्गृह्यते तेनैव तन्निष्ठा जातिः अभावश्च गृह्यत इति न्यायसिद्धान्तः।

प्रत्यक्षं द्विविधमुच्यते। निर्विकल्पकं सविकल्पकं च। इन्द्रियार्थसन्निकर्षात् यो विशदावभासः जायते यस्य शाब्दी वर्णना न शक्या स निर्विकल्पकप्रत्यक्षमुच्यते। सविकल्पकज्ञाने नाम-रूप-गुण-सामान्य-क्रिया-अन्वितधर्मैः वर्णनं शक्यते। प्रत्यभिज्ञाऽपि स्मृतिसहिता प्रत्यक्षे एव अन्तर्भवति।

अनुमितिकरणम् अनुमानम्। अनुमानविषये न्यायमते उच्यते परामर्शजन्यं ज्ञानम् अनुमितिः। “प्रत्यक्षज्ञानं प्रति इन्द्रियार्थसन्निकर्षो व्यापारः। चाक्षुषादिप्रत्यक्षं फलम्। अनुमितिं प्रति पक्षधर्मताज्ञानानन्तरं जायमानं व्याप्तिज्ञानं करणम्। परामर्शो व्यापारः। अनुमितिः फलम्। फलोपधायकं करणं (फलायोगव्यवच्छिन्नं कारणं करणम्) इति मतानुसारेण लिङ्गपरामर्शो वा करणम्। उभयथाऽपि पक्षधर्मताज्ञानं परामर्शस्य प्रत्यक्षज्ञानमेव। तज्जन्यत्वम् अनुमिताविति प्रत्यक्षनिरूपणानन्तरमनुमितिः निरूप्यते। चार्वाकव्यतिरिक्तसर्वदार्शनिकैः अनुमानप्रमाणम् अङ्गीकृतम्।” (न्यायप्रदीपः p 97)

अत्र पर्वते धूमदर्शनात् वह्न्यनुमाने पक्षः पर्वतः, धूमः लिङ्गं वह्निश्च साध्यम्। धूमदर्शनं प्रत्यक्षेण भवति। वह्निः साक्षात् अतीन्द्रियः, परामर्शज्ञानेन अनुमीयते। अत्र परामर्शः व्याप्तिज्ञानम्। व्याप्तिः कथं ज्ञायते इत्युक्ते सामान्यलक्षणप्रत्यासत्त्या, परम्परया ज्ञायते। अत्र केचन नैयायिकाः व्याप्तिज्ञानं अलौकिकप्रत्यक्षं वदन्ति। केचन नैयायिकाश्च हेतु-साध्ययोः पुनः पुनः साहचर्यदर्शनात् व्याप्तिज्ञानं मानसप्रत्यक्षं वदन्ति। चार्वाकमते विशिष्टहेतुसाध्ययोः दर्शनात् व्याप्तिज्ञानमपि तयोरेव विशिष्टं भवितुमर्हति इति आक्षेपः। अतः नूतनस्थले, पूर्वमदृष्टे पक्षे अप्रयोज्यं व्याप्तिज्ञानम् इति। तन्न। यद्यपि हेतु-साध्यौ प्रतिपक्षं भिन्नौ भवतः। सामान्यलक्षणाप्रत्यासत्तिद्वारा व्याप्तिज्ञानं सर्वत्र भवितुमर्हति। अतः न्यायमते चार्वाकमताक्षेपस्य समाधानं दत्तम्। (Pandurangiः p 76)

अपि च न्यायवैशेषिकदर्शनानुसारेण लोकस्य प्रवृत्ति-निवृत्ती सविकल्पकज्ञानमाश्रित्य प्रचलतः यस्मिन् धर्म-धर्मि-भावः गृह्यते। धर्मधर्मिभावे गृहीते धर्मधर्मिणोः सम्बन्धोऽपि अवगन्तव्यः। अयं

सम्बन्धः विषय-विषयिभावसम्बन्धः इत्यपि उच्यते। तस्य स्वरूपसम्बन्धः इत्यपि संज्ञा। प्रत्यक्षेण विषय-विषयिणोः ग्रहणे सविकल्पकज्ञाने विषय-विषयिभावसम्बन्धोऽपि गृह्यते। तत्र परामर्शोऽपि कारणरूपेण कश्चित् स्वाभाविकः सम्बन्धो भवति यथा हेतु-साध्ययोः कार्यकारणभावः। (Jha: p xi)

मीमांसादर्शने शाबरभाष्ये "अनुमानं ज्ञातसम्बन्धस्य एकदेशदर्शनात् एकदेशान्तरे असन्निकृष्टेऽर्थे बुद्धिः" इति वर्तते। अत्र सविकल्पकज्ञाने यथा प्रत्यभिज्ञायां तथैव सम्बन्धज्ञानं करणं भवतीति दृश्यते। मानमेयोदये च "व्याप्यदर्शनात् असन्निकृष्टार्थज्ञानम्" इति। उभयत्र सम्बन्धज्ञानादेव अनुमानप्रवृत्तिः। स एव परामर्शः। "व्याप्य"शब्दप्रयोगात् व्याप्तिसम्बन्धः अनुमाने आवश्यकः इति ज्ञायते। व्याप्तिश्च स्वाभाविकः सम्बन्धः। अतो यत्र न उपाधिः तत्रैव अविनाभावसम्बन्धो भवति।

### 5. **उपसंहारः** <u>Conclusion</u>

चार्वाकाः दृष्टसुखम् इच्छन्ति, श्वोभाविनि स्वर्गे नरके वा न विश्वसन्ति। वृथा धर्मविचारे न प्लवन्ति। मरणमेव सर्वस्य ध्वंसं मन्यमानाः आजीवनं यथाशक्ति सुखेन जीवितुम् इच्छन्ति। येषां विचारशक्तिः नातिसमर्था तेषाम् अयमेव विचारः रमणीयः। परन्तु लोके बहवो जनाः सन्ति येषां विचारः परोक्षविषयेषु अतीन्द्रियपदार्थेषु च प्रविशति। जिज्ञासया प्रेरिताः ज्ञानविकासं कारयन्ति। दर्शनानि शब्दप्रमाणं शास्त्रमूलं वेदं प्रमाणं मत्वा प्रचलन्ति भारतदेशस्य विचारधारां पोषयन्ति। लोके सर्वस्य वस्तुनः कारणसामग्रीम् अवगन्तुं प्रस्थिताः मेधाविनः भौत-गणित-आयुर्वेद-ज्योतिष-साहित्य-भाषा-सङ्गीत-शास्त्रेषु पारङ्गताः बभूवुः। सर्वस्य वस्तुनः सर्वे गुणाः स्वभावत एव इति सुखं चिन्त्यमाने सति विचारे जनाः न परिश्रमन्ति इति ज्ञायते। विना परिश्रमं आर्थिकवैभवमपि स्तब्धमेव भवति। परन्तु भारतवर्षे आर्थिकवैभवं समृद्धिश्च अतिश्लाघ्या आसीदिति प्रसिद्धम्। अतः चार्वाकमतस्य अनुयायिनः सर्वथा विरला एव आसन्निति भासते।

## 6. Bibliography

Agarwal, Madan Mohan (Ed.) (2002) **Sarva-darśana-saṃgraha** of Sri Mādhavācārya. Chaukhambha Sanskrit Pratishthan. Delhi.

Jha, V.N. (1990) **The Philosophy of Relations**. Sri Satguru Publications. Delhi.

Pandurangi, K.T. (Ed.)(2006) **Pūrvamīmāṃsā from an Interdisciplinary Point of View**. Centre for Studies in Sanskrit, PHISPC. New Delhi.

Raja, C. Kunhan & Sastri, S.S. Suryanarayana (Ed.) (3rd edition 2004) **Mānameyodaya**. The Adyar Library and Research Centre. Chennai.

Ranganatha Sharma, N., Bhimabhatta, S.V. & Ayyangar, N.T. Srinivasa (Ed.) **Nyāyapradīpaḥ** (Sanskrit). Karnataka Secondary Education Board, Text Books Division. Bengaluru.

# भासनाटकचक्रस्थ पञ्चरात्रे शैक्षिकतत्त्वानि

**वा. फणिप्रसादः**

विद्यावारिधिः, शिक्षाशास्त्रम्

करदूरवाणी सं. 8125435617

7550100363

**यस्याभवद् भक्तजनार्तिहन्तुः पितृत्वमन्येष्वविचार्य तूर्णम् ।**

**स्तम्भेऽवतारस्तमनन्यलभ्यं लक्ष्मीनृसिंहं शरणं प्रपद्ये ॥**

**उपोद्घातः-**

अत्र भगवन्तं श्रीलक्ष्मीनृसिंहं प्रणम्य विशदीक्रियन्ते शैक्षिकतत्त्वानि भासनाटकचक्रस्थ-पञ्चरात्रतः। भारतभूमिः कर्मभूमिः ज्ञानभूमिश्च । अत्र सर्वत्रापि शिक्षायाः वैशिष्ट्यमुपलभ्यते । संस्कृतसाहित्यजगति एकैकोऽपि ग्रन्थः शैक्षिकविचारयुक्तो भवति, यतो हि अस्माकं तु श्रुतिपरम्परा इति कारणात् । श्रुतिस्तु गुरुपरम्पराप्राप्तेति कारणेन अस्माकं गुरुपरम्पराऽपि श्लाघ्या । गुरुरेव शिक्षायाः आदावन्ते च भवति । गुरुजनपदनतशिष्यः किं न आप्नोति लोकेऽस्मिन् । विना गुरुं शिष्य औन्नत्यं न लभते । उत्तमेन शिष्येण गुरोः प्रतिष्ठा रक्ष्यते च । ननु भासनाटकचक्रस्थ पञ्चरात्रनाटकात् कानिचन शैक्षणिकतत्त्वानि उच्यतेऽत्र ।

**१. गुरोः वैशिष्ट्यम् / औन्नत्यम्**

अत्र दुर्योधनः स्वगुरुं द्रोणाचार्यम् एवं श्लाघते -

**कृतश्रद्धो ह्यात्मा वहति परितोषं गुरुजनो जगद् विश्वस्तं मे निवसति गुणो नष्टमयशः ।**

**मृतैः प्राप्यः स्वर्गो यदिह कथयत्येतदनृतं परोक्षो न स्वर्गो बहुगुणमिहैवैष फलति ॥**

यः कृतश्रद्धः गुरुजनानामात्मपरितोषं कारयति स तु स्वर्गमत्रैव लभते इति ।

द्रोणाचार्यः भीष्मपितामहस्य औन्नत्यं कथयति -

**दैवतं मानुषीभूतमेष तावन्नमस्यताम् । अन्यायाचरणं मन्ये भीष्ममुत्क्रम्य वन्दितुम् ॥**

तदा भीष्मपितामहः स्वयं गुरोः द्रोणाचार्यस्य औन्नत्यमेवं वर्णयति -

**अहं हि मात्रा जनितो भवान् स्वयं ममायुधं वृत्तिरपह्नवस्तव ।**

**द्विजो भवान् क्षत्रियवंशजा वयं गुरुर्भवान् शिष्यमहत्तरा वयम् ॥**

अहं मातृगर्भे जनितः, भवान् उत्तमः अयोनिजः, अहं क्षत्रियः, भवान् तु द्विजोत्तमः, अतो गुरुवन्दनैव आदौ स्यादिति अत्र पितामहः कथयति ।

**२. गुरोः दायित्वम् -**

शिष्यस्य सत्पथप्रदर्शनं गुरोः कर्तव्यमस्ति । शिष्यकृतानां पापानां फलं गुरुमेव प्राप्नोति । विषयेऽस्मिन् गुरु द्रोणाचार्यः एवम् वदति -

**अतीत्य बन्धूनवलङ्घ्य मित्राण्याचार्यमागच्छति शिष्यदोषः ।**

**बालं ह्यपत्यं गुरवे प्रदातुर्नैवापराधोऽस्ति पितुर्न मातुः ॥** इति ।

यदि शिष्यः पापमाचरति तस्य संपूर्णदायित्वं गुरुरेव वहतीत्यत्र विषयः ।

तदेव अन्यत्र संस्कृत सुभाषितेषु उच्यते एवम् -

**राजानं राष्ट्रजं पापं राजपापं पुरोहितम् । भर्तारं स्त्रीकृतं पापं शिष्यपापं गुरुं व्रजेत् ॥**

**३. गुरु- शिष्य संबन्धः -**

यदा दुर्योधनः स्वमातुलं शकुनिमेव प्रष्टुमिच्छति राज्यदानाय, तदा स्वशिष्यस्य रक्षणाय गुरुः द्रोणाचार्यः शकुनिं शान्तयितुमिच्छति । भीष्मपितामहः (आत्मगतमेवं वदति)

**एष शिष्यस्य वात्सल्याच्छकुनिं याचते गुरुः ।**

**एवं सान्त्वीकृतो ह्येष नैव मुञ्चति जिह्मताम् ॥**

अन्यत्र गुरुः द्रोणाचार्यः स्वशिष्याय एवमुपदिशति -

**त्वं वञ्च्यसे यदि मया न तवात्र दोषः त्वां पीडयामि यदि वास्तु तवैव लाभः ।**

**भेदाः परस्परगता हि महाकुलानां धर्माधिकारवचनेषु शमीभवन्ति ॥**

यद्यहं त्वां वञ्चयामि तत्र तव कोऽपि न दोषः भविष्यति, एवं यदि त्वामहं पीडयामि तदपि तव लाभायैव भवति । अतः गुरोः वाचमनुसरत्विति दुर्योधनमुपदिशति गुरुर्द्रोणाचार्यः ।

प्रथमाङ्के यदा द्रोणाचार्यः स्ववाञ्छितगुरुदक्षिणा विषये वदति तदा एवं दुर्योधनं पृच्छति -

**द्रोणाचार्यः** - पुत्र दुर्योधन ! अहं तव प्रभावी ननु !

**दुर्योधनः** - न ममैव, कुलस्यापि मे भवान् प्रभुः।

**द्रोणाचार्यः** - एतत् तवैव युक्तम्।

अनेन संभाषणेन दुर्योधनस्य गुरुभक्तिः, गुरोः स परतन्त्रः च आसीदिति अस्माभिः ज्ञायते । दुर्योधनः न केवलं स्वस्य दासत्वम् , अपितु संपूर्णकुरुकुलस्यापि भवान् प्रभुः, वयं भवन्तमनुवर्तयामः इति भक्त्या गुरुं प्रभावयति ।

एवं द्वितीयाङ्के गोग्रहणाय कौरवाः उत्तरकुमारस्य देशं युद्धाय गच्छन्ति तदा द्वादशवर्षानन्तरमपि द्रोणाचार्यः दूरात् धनुष्टङ्कारं श्रुत्वैव अवगच्छति - "सः मे शिष्यः अर्जुनः बाणान् मुञ्चतीति"। तदुक्तम् –

**धनुर्घोषं द्रोणस्तदिदमिति बुद्धा प्रतिगतः**
**ध्वजे बाणं दृष्ट्वा कृतमिति न भीष्मः प्रहरति ।**
**शरैर्भग्नैः कर्णः किमिदमिति चान्ये नृपतयो**
**भयेप्येको बाल्यान्नभयमभिमन्युः गणयति ॥**

उत्तमः गुरुः सर्वदा स्वशिष्यान् संपूर्णतया अवगच्छतीति विषयः अस्य श्लोकस्य प्रथमपादेनैवावगम्यते ।

**४.गुरुदक्षिणा** -

प्राचीनकाले गुरुकुलवासानन्तरं वा उत क्रतोः अन्ते वा अन्येषु शुभसन्दर्भेषु वा गुरुदक्षिणा प्रदाननियम आसीत् । श्रीकृष्णः अपि स्वगुरवे सान्दीपनिमहर्षये तस्य पुत्रं जीवितमानीय अददात् इति ज्ञातो वृत्तान्तः एव । अत्र प्रथमाङ्के यदा दुर्योधनः द्रोणाचार्यमुद्दिश्य स्वगुरुदक्षिणाप्रदानाय प्रार्थयति तदा गुरुः द्रोणाचार्यः "मयाऽर्थ्यमानां गुरुदक्षिणां त्वं दातुं प्रभवसि वा ?" इति शङ्कां यदा प्रकटयति तदा एवमुच्यते दुर्योधनेन -

**प्राणाधिकोऽस्मि भवता च कृतोपदेशः शूरेषु यामि गणनां कृतसाहसोऽस्मि ।**
**स्वच्छन्दतो वद किमिच्छसि किं ददानि हस्ते स्थिता मम गदा भवतश्च सर्वम् ॥ २९**

प्राणेभ्योऽपि अधिकः प्रियशिष्योऽहं भवतः । सर्वविधशिक्षाः भवतैव मम शिक्षिताः । वीरेष्वहम् अग्रगण्यः, युद्धे च साहसम् अकरवम् । केवलं गदा मम हस्ते विद्यते अन्यत् सर्वं भवता प्रसादितम् इति गुरोः प्रशंसां करोति दुर्योधनः।

ततः सलिलकुम्भं गुरवे प्रदाय अहं भवता याचमानां गुरुदक्षिणां ददामीति पूर्वजिह्मतां प्रयच्छामि इति एवं कथयति ।

**यदि विमृशसि पूर्वजिह्मतां मे यदि च समर्थयसे न दास्यतीति ।**
**शर शत कठिनं प्रयच्छ हस्तं सलिलमिदं करणं प्रतिग्रहाणाम् ॥** इति

**५. गुरुभक्तिः** -

दुर्योधनः द्रोणाचार्याय स्वगुरुभक्तिम् शकुनिं प्रति एवमुक्त्वा प्रकटयति -

**गुरुकरतलमध्ये तोयमावर्जितं मे श्रुतमिह कुलवृद्धैर्यत् प्रमाणं पृथिव्याम् ।**
**तदिदमपनयो वा वञ्चना वा यथा वा भवतु नृप ! जलं तत् सत्यमिच्छामि कर्तुम् ॥**

हे गान्धार नृप ! मे मातुल ! मया गुरोः हस्ते प्रदत्तं जलं सत्यं कर्तुमिच्छामि । तेन अपनयः वा वञ्चना वा उत किमपि वा भवतु, गुरवे उक्तं मम वाचमहं सत्यं करिष्यामि इति ।

**६. सच्चरित्र निर्माणम् -**

प्रथमाङ्के यदा यागशाला विदग्धा भवति तदा केचन ब्राह्मणाः संभाषन्ते। तस्मिन् सन्दर्भे कविः सन्दर्भानुसारं दह्यमानां सभां एवं वर्णयति -

**शुष्केनैकेन वृक्षेण वनं पुष्पित पादपम् । कुलं चारित्रहीनेन पुरुषेणैव दह्यते ॥** इति ।

अत्र प्रथमः ब्राह्मणः एवं भाषते - यथा एकेन शुष्केन वृक्षेण संपूर्णं पुष्पितपादपयुक्तं वनं दग्धं भवति, तदा चरित्रहीनेन पुरुषेण कुलं विनष्टं भवति इति ।

सन्दर्भेणानेन सच्चरित्रनिर्माणमेव स्वस्य एवं स्वकुलस्यापि क्षेमदायकमिति ज्ञायते । अयमेव विषयः सुभाषिते उक्तः-

**यथा ह्येकेन वृक्षेण दह्यमानेन वह्निना ।**
**दह्यते हि वनं सर्वं कुपुत्रेण कुलं यथा ॥** इति ।
**यथाह्येकेन वृक्षेण पुष्पितेन सुगन्धिना ।**
**वासितं तद्वनं सर्वं सुपुत्रेण कुलं यथा ॥** इति च।

**७. वैदिक कर्मणः (क्रतोः) विशिष्टता**

वेदकाले यज्ञ यागादीनां निर्वहणं वैदिकानां कर्तव्यमासीत् । तस्मिन् काले राजानः च अश्वमेध, पुत्रकामेष्टि, राजसूय इत्यादि यागान् विविध फलप्राप्तये निर्वर्त्य स्व सर्वस्वं ब्राह्मणेभ्यः अर्थिभ्यः संप्रदाय तोषितवन्तः एवं च स्वस्य ख्यातिं चरित्रपुटेषु आचन्द्रार्कं शाश्वती कृतवन्तः च । प्राप्तायाः वैदिक शिक्षायाः उपयोगः यज्ञादि कर्मणैव सार्थकतां यान्ति । अत्र कर्णः इक्ष्वाकु कुलस्य ख्यातिम् एवं वर्णयति -

**"इक्ष्वाकु शर्य्याति ययाति राम मान्धातृ नाभाग नृगाम्बरीषाः ।**
**एते सकोशाः पुरुषाः सराष्ट्राः नष्टाः शरीरैः क्रतुभिर्धरन्ते ॥** इति ।

इक्ष्वाकुवंशजाः राजानः स्वकृत क्रतुभिरेव प्राप्तख्यातिमन्तः सन्तीति अस्यार्थः । अत्र क्रतुनिर्वहणं वैदिककाले मुख्यमासीदिति ज्ञास्यामः ।

**उपसंहारः** -

इतोऽपि बह्नि शैक्षिकतत्त्वानि अनेकेषु संस्कृतनाटकेषु विविध ग्रन्थविशेषेषु विलीनानि सन्ति। उत्तमविचाराणां चयनं तेषां समीकरणं प्रस्तुतीकरणं च अत्र शोधकर्त्रा अनुष्ठितम् । शैक्षिकविचाराणां आधारभूतसंस्कृतवाङ्मयस्य साहित्यानामध्ययनेन नूतनशैक्षिकविचाराणामाविष्कारः भविष्यतीति आशास्महे।

# भासरूपकेषु जीवितदर्शनम्

**Dr. N.A. Shihab,**
Assistant Professor, Department of Sahitya,
Govt. Sanskrit College, Thripunithura

संस्कृतनाटककाराणां मध्ये भासः प्रथमगणनीयो भवति। नाटकविषये तस्य योगदानं महत्तरं भवति। साहित्यस्य प्रयोजनं रसास्वादनमिति, दृश्यमाध्यमेन सामाजिकमनसि रसास्वादनेन सह जीवितदर्शनमपि प्रदातव्यमिति मतिरासीत् महाकवेः। व्यक्तेः समाजस्य च जीवितं कथं भवेत् , के के सदाचाराः पालनीयाः, अस्माकं जीवितलक्ष्यं किम् इत्यादिविषयेषु सुस्पष्टविचाराः आसन्। सार्वकालिकप्रसक्तम् इदं भासस्य जीवितदर्शनं भासरूपकेषु द्रष्टुं शक्यते।

**उत्साहस्य दर्शनम्।**

**उत्साहिनं पुरुषसिंहमुपैति लक्ष्मीः** - इति उक्तेः प्रचारः कविना भासेन निजनिर्मितनाटकद्वारा कृतः। आत्मविश्वासः सर्वेभ्यः प्रदीयते भासेन। नायिकायाः कुरङ्गिमहाभागायाः अन्तपुरप्रवेशनवेलायां नायकस्य अविमारकस्य मनसि समायाता चिन्ता कविना भासेन एवं प्रकटीकृता- **किमिह बहुविचारैः को मया दुष्करोऽर्थः। यत्नैः शुभैः पुरुषता भवतीह नृणाम्।** प्राचीनकाले भारते स्थितस्य आत्मीयतायाः अतिप्रसरः भासनाटकेषु नैव दृष्टिपदमायाति, अपि तु भौतिकवृत्त्यर्थमाह्वानमेव वयं श्रृणुमः। पञ्चरात्रस्य प्रथमाङ्के भासेन इत्थमुद्घोषितम् - **विक्रमेण महीं जय**। आसीत् भासमतम् - आलस्यं शरीरस्थो महान् रिपुरिति। पञ्चरात्रं नाम नाटकाद् अस्माभिरवगम्यते यत् **महत्सु नीचेषु च कर्म** एव **शोभते**। सर्वत्र सम्पदां वृद्धिः आपदां विनाशाय च आशीर्वचनं कर्णभारस्य भरतवाक्ये द्रष्टुं शक्यते।

**सद्दर्शको भासः।**

सदा सदभिमुखमेव भासस्य दर्पणं सञ्चरति। भासेन सर्वत्र सदेव अस्माभिर्दृश्यते। महाभारते रामायणे च दुर्योधनप्रभृतीनि यानि असत् पात्राणि सन्ति तानि यदा भासनाटके समायान्ति तदा तेषु वर्तमानान् सदंशान् एव वयं प्रत्यक्षीकुर्मः। ऊरुभङ्गे वर्तमाने दुर्योधनः कर्णभारे कर्णः अपि अस्माकं मनसि दुःखस्य अग्निशकलानि प्रक्षिपति। रामस्य वनवासः अनिर्वार्यदुरन्तः आसीत् , तस्मिन् विषये कैकेयी केवलं निमित्तमात्रमिति । एवं भासः स्वपात्राणि आदर्शयुक्ती करोति।

**समाजस्य सहवर्त्तित्वम्।**

समाजस्य वृद्धये व्यक्तिः, कुटुम्बः, समाजः च परस्परस्नेहेन वर्तितव्यम्। इदं सुमहत्तत्त्वं भासः परोक्षेण अपरोक्षेण कथापात्रद्वारा अस्मान् प्रबोधयति। एष एव दूतवाक्यस्य कृष्णस्य प्रसिद्धोपदेशः। **कर्तव्यो भ्रातृषु स्नेहो विस्मर्तव्यो गुणेतरः। सम्बन्धो बन्धुभिः श्रेयान् लोकयोरुभयोरपि।** यद्यपि भासोत्तरनाटकेषु सपत्नीनां मध्ये जायमानः कलहः अस्माभिः दृश्यते। तथापि भासनाटकेषु ताः परस्परं स्निह्यन्ति पत्यै त्यागं निर्वोढुं प्रयतन्ते च। यदि व्यक्तीनां मिथः स्नेहः भवेत् तर्हि सर्वेऽपि भिन्नाः नश्येयुः। चारुदत्तं नाम नाटके सज्जलकः कृताभ्यस्तब्राह्मणो भवति। असौ सज्जलकः वसन्तसेनायाः परिचारिकायां स्निह्यति। यदि धनं भवेत् तर्हि तां परिणेतुमसौ शक्तो भविष्यति। किन्तु स निराशो नैव भवति, प्रत्युत आर्यचारुदत्तगृहात् आभरणानि चोरयित्वा तां परिचारिकां वसन्तसेनायाः मोचयितुं यत्नमाचचार, विजयं च अलभत। स्नेहः न केवलं मनुष्येषु कार्यः, अपि तु चरेषु अचरेषु च सर्वेष्वपि प्रपञ्चेषु स्नेहो विधातव्यः। रामः सीतां प्रति एवम् अवोचत् सुतामिव, स्निह्यमानान् हरिणान्, वृक्षान् विन्ध्यापर्वतं प्रत्यपि यात्रानुमितिं प्रयच्छतु।

**सत्यधर्मपरिपालनम्।**

एष एव कवेः भासस्य विश्वासः स तु मरणेन जीवस्यास्य गतिः नैव परिसमाप्तिमेति। प्रत्युत अस्मिन् जन्मनि जन्मान्तरे वा कृतकर्माणि एव जीवस्य गतेः नियामकम्। तत्त्वमिदं प्रबोधयन् भासः सत्यधर्मस्य प्राधान्याधिक्यम् अददात्। पञ्चरात्रं नाम नाटके दुर्योधनं धार्मिकं कृत्वा तेन एव वादयति।

**बाढं दत्तं मया राज्यं पाण्डवेभ्यो यथापुरम्।**
**मृतेऽपि हि नराः सर्वे सत्ये तिष्ठति तिष्ठति॥**

गुणपक्षपाती भासः दूतवाक्यं नाम नाटकेन अधर्मकृतः सभाव्यमानं दोषमधिकृत्य एवं प्रबोधयति यः सुहृदो बान्धवान् वा वञ्चयति तस्य सर्वे यत्नाः विफलाः भविष्यन्ति। धर्मं समाचार, कुरु स्वजनव्यपेक्षतां यत् काङ्क्षितं मनसि सर्वमिहानुतिष्ठ इत्युक्त्वा दूतघटोत्कचं परिसमाप्तिमेति। धर्माचरणस्य प्राधान्यं प्रौढ्या भाषया कर्णभारे वयं श्रृणुमः।

**धर्मो हि यत्नैः पुरुषेण साध्यो भुजङ्गजिह्वाचपला नृपश्रियः।**
**तस्मात्प्रजापालनमात्रबुद्ध्या हतेषु देहेषु गुणा धरन्ते॥**

अविमारकाय अविमारकं नाम नाटके राज्ञा कुन्तीभोजेन प्रदत्तोपदेश एव आसीद् अचञ्चलसत्येन दशरथप्रतिमो भव। स्वस्य मोचनाय वसन्तसेनायाः आभरणानि अपहृतवन्तं सज्जलकं प्रति परिचारिकाया उक्तिरेषा आसीत् – झटित्येव आभरणानि प्रतिदातव्यानि नो चेत् वसन्तसेनां च पुनर्वञ्चयित्वा पुनरेव दासभावो भवेत्।

**त्यागस्य महत्त्वम्।**

पौराणिककालादारभ्य भारतीयदार्शिनिकैः चिन्तकैश्च दत्तप्रधान्यगुणेषु अन्यतमो भवति त्यागः। यदा अन्येभ्यः सामाजिकेभ्यश्च त्यागं स्वीकरोति तदा एव अस्य समाजस्य सुस्थितिर्जायते। निजनिर्मितनाटकद्वारा भासेन यः आदेशः प्रदत्तः स तु जनानां त्यागस्य महत्त्वं पाठनीयमिति।

मध्यमव्यायोगं नाम नाटकेन ग्रन्थकृता या गीयते सा त्यागस्य महिमा एव। अत्र तु गृहस्थो ब्राह्मणः निजकुटुम्बानां रक्षणार्थं हिडुम्बायै स्वशरीरं दातुं प्रयतते। अपि तु भर्त्तुः प्राणरक्षणाय तस्य जाया स्वप्राणत्यागाय मतिमकरोत्। किं च दम्पत्योः पुत्रत्रयः अपि इमं महत्त्यागं कर्त्तुमुद्युक्ता आसीत्। अन्ततो गत्वा त्यागस्यावसरः मद्ध्यमपुत्रस्य अलभत। काले च तास्मिन् तेनोक्तं यत् धन्यो अस्मिन् यत् गुरुप्राणाः स्वैः प्राणैः परिरक्षिताः। प्रतिज्ञायौगन्धरायणं नाम नाटके यौगन्धरायणस्य त्यागस्य सदृशः त्यागो लोकचरित्रे अपूर्वमेव अस्माभिर्दृश्यते।

**दानमहिमा।**

भासस्य मुख्यता प्रदत्तगुणेषु अन्यतमो भवति दानम्। महता दानेन शाश्वतकीर्त्तिं लब्धस्य कर्णस्य महत्त्वमभिवदन्नेव कर्णभारं नाम नाटकं तेन प्रणीतम्। विश्वविश्रुतः अस्मिन् नाटके स्थितः दानमाहात्म्यप्रतिपादकभागः संस्कृतसाहित्यलोके स्थिरप्रतिष्ठाम् अलभत।

**शिक्षा क्षयं गच्छति कालपर्ययात् सुबद्धमूला निपतन्ति पादपाः।**
**जलं जलस्थानगतं च शुष्यति हुतं च दत्तं च तथैव तिष्ठति॥**

चारुदत्तं नाम नाटकद्वारा कविना भासेन यत् प्रबोधितं तत् सर्वस्वदानेन दरिद्रत्वं प्राप्तस्य आर्यचारुदत्तस्य नायिकायाः वसन्तसेनया संवृत्तवृद्धिरेव। यस्यास्ति दानशीलः तस्य अन्ये सर्वे अपि गुणाः स्वयमेव समागताः भविष्यन्ति।

**गुरवः समादरणीयाः।**

समाजस्य सुस्थितये उत्तमगुरुशिष्यसंबन्धः परिपालनीयो भवति। गुरुशिष्यसंबन्धस्य दृढतां, गुणपक्षपाती भासः कथापात्रद्वारा तेषां भाषणद्वारा लोकानिमान् उद्बोधयति। भरतस्य अयोध्याप्रवेशनसमये अचार्यवचनं भरताय एवं न्यवेदयन् रोहिणीनक्षत्रस्य प्रारम्भ एव भवतु अयोध्याप्रवेशनम्। एवं विज्ञप्तेन भरतेन इत्थं प्रत्युत्तरं दत्तं बाढमेवं न मया गुरुवचनमतिक्रान्तपूर्वम्।

**स्त्रीणां महनीयस्थानम्।**

भासनायिकाः तस्य नाटकेषु सर्वत्र नायकाः इव सुचरितत्वेन तुल्यप्राधान्यत्वेन आविष्कृताः। जाया पतिः च परस्परं बहु मन्यते। पतिः तु जायायाः संरक्षकत्वेन अङ्गीकृतः। तथैव जाया पत्युः अर्धभागत्वेन परिगणिता। स्वप्नवासवदत्तं, प्रतिमानाटकं, प्रतिज्ञायौगन्धरायणादि नाटकेषु कुलीनाः स्त्रियः

शिरोवस्त्रं धृतवत्यः इव दृश्यते। अपूर्ववेलायामेव परपुरुषाणां तासां दर्शनावसरो लब्धः। प्रतिमानाटके वनं प्रति गन्तुमुद्युक्तां सीतां प्रति रामः एवम् अकथयत्- यागेषु विवाहवेलायां दुःखे कानने च परपुरुषाणां दर्शनं नैव दोषाय भवति। अतः हे सीते शिरोवस्त्रम् अपनीयताम्। स्वप्नवासवदत्तं नाम नाटके यदा ब्रह्मचारी आश्रमे समागतः तदा तस्य वासवदत्तादर्शनम् अपनेतुम् उक्तं परपुरुषदर्शनं परिहरत्वार्या इति।

**दुश्चतरितात् निवर्त्तनम्।**

द्यूतः विषयरागः इत्यादि अधःपतनविषये पौनपुन्येन प्रवृत्तिः न केवलं स्वस्य स्वकुटुम्बस्य समाजस्य च आपदे कल्पते। स्वकृत्यानि अकृत्वा ललितकलासु समाकृष्टस्य राज्ञः उदयनस्य कथाकथनत्वेन भासः पूर्वीकृतं तत्त्वं लोकान् विज्ञापयति। कपटद्यूतक्रीडायां पराजयं प्राप्तवान् राजा धर्मपुत्रः स्वस्य एवं शूराणां भ्रातृणां जायायाः च दुःखस्य हेतुभूतः संवृत्तः। अन्ते भासः धर्मपुत्रेण अकथयत् – **नीचोऽहमेव विपरीतमतिः।**

**सहायकग्रन्थाः।**

भासनाटकसर्वस्वम् - सुधांशु चतुर्वेदी- करन्ट् बुक्स, तिरुवनन्तपुरम्,1990.

कम्प्लीट् प्लेयस् ओफ् भास, के.पि.ए. मेनोन्, नाग् पब्लिशेर्स्, दिल्ली, 1996.

*************

# भासनाटकचक्रम् एकम् विवेचनम् -

**Dr.N.Shashidhar**
Sanskrit Lecturer
Vignana Jyothi institute of Arts and Sciences
West Marredpally, Secunderabad .
Telangana
shashinalla77@gmail.com
Cell.No.9885343309

भासः कश्चन प्रसिद्धः संस्कृतनाटककारः । तेन रचितानि रूपकानि सरलभाषया निबद्धानि मनोहराणि च वर्तन्ते । कालनिर्णये भासस्य कालः चतुर्थशतकम् इति वदन्ति परिशोधकाः । स्वनाटकेषु पाणिनेः व्याकरणनियमानां पालनं न कृतवान्। अतः भासः पाणिनेः समकालीनः स्यात् इति वदन्ति परिशोधकाः। पाणिनेः कालः चतुर्थशताब्दम् आसीदिति परिशोधकानां निर्णयः। आहत्य भासस्य कालः विक्रमपूर्वे चतुर्थे तृतीये वा शतके आसीदिति कथयितुं शक्यते।

अस्य महोदयस्य त्रयोदश नाटकानि उपलभ्यन्ते।

प्रतिज्ञायौगन्धरायण – स्वप्नवासवदत्त - अविमारकाणि त्रीणि बृहत्कथाऽऽधारितानि ।

प्रतिमानाटकं - अभिषेकनाटकम् च द्वे रामायणमूले ।

तदीयानि मध्यमव्यायोग-पञ्चरात्र-दूतघटोत्कच-कर्णभार-ऊरुभङ्ग- दूतवाक्यानि सप्त महाभारताश्रितानि।

बालचरितं – भागवताश्रयम् , चारुदत्तं च कल्पितकथा इति विवेकः।

| नाटकस्य नाम | आधारः | नायकः | इतिवृत्तम् | रूपकप्रकारः | रसः |
|---|---|---|---|---|---|
| स्वप्नवासवदत्तम् | बृहत्कथा | उदयनः | राजकीयकुतन्त्रनि | नाटकम् | श्रृङ्गारः |
| प्रतिज्ञायौगन्धरायणम् | बृहत्कथा | उदयनः | राजकीयकुतन्त्रानि | नाटिक | श्रृङ्गारः |
| उरुभङ्गम् | महाभारतम् | दुर्योधनः | युद्धव्याखाः | अंकः | करुणः |
| दूतवाक्यम् | महाभारतम् | श्रीकृष्णः | राजकीयकुतन्त्रनि | व्यायोगः | वीरः |
| पञ्चरात्रम् | महाभारतम् | दुर्योधनः अन्ये च | राजकीयकुतन्त्रनि | समवकारः | वीरः |
| बालचरितम् | भागवतम् | श्रीकृष्णः | धर्माः | नाटकम् | वीरः |
| दूतघटोत्कचम् | महाभारतम् | श्रीकृष्णः | राजकीयकुतन्त्रनि | व्यायोगः | वीरः |
| मध्यमव्यायोगः | महाभारतम् | भीमः | सामाजिकधर्माः | व्यायोगः | वीरः |

| | | | | | |
|---|---|---|---|---|---|
| प्रतिमानाटकम् | रामायणम् | श्रीरामः | सामजिकधर्माः | नाटकम् | वीरः |
| अभिषेकनाटकम् | रामायणम् | श्रीरामः(अवतरणम) | सामजिकधर्माः | नाटकम् | वीरः |
| अविमारकम् | बृहत्कथा | अविमारकः | सामाजिकव्यङ्गः | नाटकम् | |
| चारुदत्तम् | कल्पितकथा | चारुदत्तः | सामाजिकव्यङ्गः | प्रकरणम् | शृङ्गारः |
| कर्णभारम् | महाभारतम् | कर्णः | सामाजिक एवं वीरोचितप्रामुख्यम् | अंकः | करुणः |

संस्कृतवाङ्मये सर्वसम्मतः प्रथमनाटककारः भासः एव। कालिदासेन रामिलसौमिल्लयोः पूर्वं भासः प्रसिद्धप्रबन्धकरूपेण स्वीकृतः। भासः कालिदासात् पूर्ववर्ती। भासस्य रचनाः कालिदासकाले जनप्रियाः अभवन्। जनप्रियत्वप्राप्तये रचनायाः शतं पञ्चाशत् वर्षाणि वा अपेक्षितानि अभवन्। अतः भासः प्रथमशताब्दीतः पूर्वकालीनः इति निश्चयः क्रियते।

विंशतेः शताब्दस्य प्रारम्भे भासस्य नाटकानां विषये केवलं तत्र तत्र प्रशास्तिवाक्यमेव उपलभ्यते स्म। अस्य कवेः ग्रन्थाः सहित्यलोके अज्ञाताः आसन्। केवलं दक्षिणभारतस्य कतिपय हस्तप्रतिलिपिष्वे भासनाटकचक्रम् निहितमासीत्। प्रथमम् महामहोपाध्यायः टि.**गणपतिशास्त्रि** महोदयः तिरुवाङ्कोरराज्यात् तालपत्रलिखितानि एतानि प्राप्य भासनाटकानि प्रकाशितवान्। गणपतिशास्त्रिणः प्रकाशनात् पूर्वमेव प्राचीनकालादेव भासनाटकस्य प्रशंसा बहुभिः कविभिः कृता।

इमं कविं महाकविः कालिदासः 'मालविकाग्निमित्रम् इति स्वस्य नाटके

**'प्रथितयशसां भाससौमिल्लकविपुत्रादीनां प्रबन्धानतिक्रम्य वर्तमानकवेः क्रियायां कथं परिषदो बहुमानः?'** इति सबहुमानं भासम् श्लाघयति।

महाकविः बाणभट्टः हर्षचरितम् नाम्नि स्वकाव्ये एवं भासकविम् अश्लाघत ।

महाकविः बाणभट्टः स्वकीयहर्षचरितसारम् नाम्नि ग्रन्थे भासस्य रूपकाणां वैशिष्ट्यम् एवं अवदत्।

**सूत्रधारकृतारम्भैर्नाटकैर्बहुभूमिकैः ।**

**सपताकैर्यशो लेभे भासो देवकुलैरिव॥** 1/14॥

दण्डिमहाकविः अपि स्वस्य अवन्तिसुन्दरी कथायाम् एवं भासकविम् अश्लाघत ।

**सुविभक्तमुखाद्याङ्गैर्व्यक्तलक्षणवृत्तिभिः।**

**परतोऽपि स्थितो भासः शरीरैरिव नाटकैः॥** अवन्तिसुन्दरीकथा 11

कविः राजशेखरः स्वस्य काव्ये अपि एवं भासकविम् '**भासो रामिलसोमिलौ'** इति,

"भासो हासः कविकुलगुरुः कालिदासो विलासः इति " जयदेवः मुरारिश्च भासं स्तुतवन्तौ।

**यस्याश्चोरश्चिकुरनिकरः कर्णपूरो मयूरो**

**भासो हासः कविकुलगुरुः कालिदासो विलासः।**

**हर्षोहर्षः हृदयवसतिः पञ्चबाणस्तु बाणः**

**केषां भवतु कविताकामिनी कौतुकामः॥** प्रसन्नराघवम्

भासः गोब्राह्मणसंरक्षकः वैष्णवमतावलम्बी च आसीत्। वैदिककर्मकाण्डेषु तस्य भगवन्तौ रामकृष्णौ चरित्ररूपेण वर्णितौ। यथा प्रतिमानाटके अभिषेकनाटके च रामस्वरूपाध्ययनेन, दूतवाक्ये, बालचरिते च कृष्णस्वरूपाध्ययनेन निर्णयं कर्तुं शक्यते।

भरतमुनेः नाट्यशास्त्रीयनियमानां विरोधः भासरचनायाम् उपलभ्यते।अतः भासनाटकानाम् विद्वद्भिः कृता आलोचना उपयुक्तैव इति मन्ये।

अन्यैः अपि कारणैः इदं तथ्यं परिपुष्टतामुपगच्छति यत् भरतनाट्यशास्त्रेण अपरिचितः भास स्यात्। अतः भरतात् पूर्ववर्ती स्यात्। भासः वात्स्यायनात् अपरिचितः यतः प्रतिमानाटके कामरूपधारिणा ब्राह्मणवेशधारिणा रावणेन रामं प्रति स्वकीयाऽध्ययनचर्चायाम् वात्स्यायनस्य कामसूत्राणाम् वर्णनं न प्राप्यते।

भासेन मानवधार्माः शास्त्राणाम् किञ्च बृहस्पतेः अर्थशास्त्रस्य उल्लेखः कृतः अस्ति। कामसूत्र प्रसङ्गस्य अभावः भास समये वात्स्यायनस्य अविद्यमानतायाः प्रदर्शनं भवति।

त्रयोदश नाटकानि

1) **<u>स्वप्नवासवदत्तम्</u>**

स्वप्नवासवदत्तात् प्रतिज्ञायौगन्धरायणादपि अधिकम् उत्कृष्टं सफलं नाटकमस्ति। प्रेमकथामाधारितम् इदं नाटकं लोकप्रसिद्धमभवत्। अस्मिन् नाटके उदयन-वासवदत्तयोः चरित्रम् अत्यधिकं भावपूर्णं प्रेमपूर्णं च वर्तते।

2) **<u>प्रतिज्ञायौगन्धरायणम्</u>**

वासवदत्तायाः वैवाहिकी घटना प्रतिज्ञायौगन्धरायणस्य मुख्या कथा। कथानकस्य विन्यासः पात्राणां चरिताङ्कः संवादः प्रभावान्वितश्च अस्मिन् नाटके साफल्यमाप्नोति।

3) **मध्यमव्यायोगः**

मध्यमस्य भीमद्वारा ग्रहणं भासस्य वैदुष्यम्। । हिडिम्बानामकराक्षस्या सह भीमस्य प्रणयः, घटोत्कचनामकपुत्रद्वारा चिरविरहितयोस्तयोः सङ्गश्च वर्णितः ।

4) **दूतघटोत्कचम्**

महाभारतस्य युद्धे यदा कतिपयः कौरववीराः अन्यायपूर्वक अर्जुनपुत्रं अभिमन्युं मारितवन्तः तदा प्रेरितः भीमसेनस्य पुत्रः घटोत्कचः दुर्योधनस्य सभां पाण्डवानां दूतो भूत्वा गच्छति। दुर्योधनः एवं उक्तवान् 'गत्वा कृष्णं कथय पाण्डवपक्षं गृह्णातु भवान्' । अहं बाणैः भवताम् उत्तरं दास्यामि" इति। कविना भासेन स्वकल्पनया एव अस्य रूपकस्य अवतरणा कृता।

एकः प्रसिद्ध श्लोकः

**प्रयामि सौभद्र विनाशचोदितः दिदक्षुरधारिमनार्यचेतसम्।**

**विचिन्तयाश्चक्रधरस्य शासनं यथा गजेन्द्रोऽङ्कशशाङ्कितो बलिम्॥ दू.घ/अं1/श्लो3**

5) **कर्णभारः**

भासनाटकेषु कर्णभारस्य विशिष्टं स्थानं वर्तते। काव्यरसस्य परिपाकेन नाटकीयतत्त्वानां निर्वाहेण च नाटकमिदं उन्नतं स्थानं अरोहति। यद्यपि नाटके युद्धविषये वीररसस्य प्राधान्यं भवति किन्तु सम्मिल्य नाटके करुणररसः विशेषप्रभां प्रकाशयति।

6) **ऊरुभङ्गम्**

महाभारतयुद्धस्य अन्तिमम् अंशसंम्बद्धः इदं नाटकं। संस्कृतवाङ्मये नाट्यसाहित्ये एतस्य नाटकस्य स्थानं विशिष्टं वर्तते। नाट्यशास्त्रे यद्यपि दुःखान्तं नाटकं न भवेदिति ग्रन्थकारस्य अभिमतं।तथापि इदं नाटकं सर्वं दुःकान्तमेव वर्तते।

7) **दूतवाक्यं**

दूतवाक्यं महाभारतस्य आख्यानामाश्रितम्। उत्तराऽभिमन्योः विवाहानन्तरं प्रयासोऽभूत् यत् कौरवपाण्डवयोः सन्धिर्जायताम्, किञ्च पाण्डवैः स्वकीय राज्यः प्राप्यताम्। भगवान् श्रीकृष्णः पाण्डवानां दौत्यं सम्पादयितुं कौरवशिबिरं गतवान् युधिष्ठिरसन्देशं श्रावितवान् तद्वचनानामेव नाटकेऽस्मिन् प्राधान्यं वर्तते। दूतवेशधारिणः श्रीकृष्णस्य वचनैः अनुप्राणितं समस्तं नाटकम्। अतः नाटकस्य दूतवावाक्यम् इति नाम सार्थकम्।

**वने पितृव्यो मृगया प्रसङ्गतः कृतापराधो मुनिशापमाप्तवान्।**

**तदा प्रभृत्येव स दारनिस्पृहः परात्यजानां पितृतां कथं व्रजेत्॥ दूत/अं1/श्लो22**

8) **पञ्चरात्रम्**

इदं नाटकं कल्पित कथा। पञ्चरात्रेषु पाण्डवानां प्रति श्रीकृष्णस्य वचनानि अत्र लिखितानि। दुर्योधनस्य प्रतिज्ञा पाण्ड्वानां प्रति अवमानकरवचनानि सन्ति नाटके। नाटके प्रधानरसः वीरः । श्रृङ्गाररसः स्त्रीपात्राणां च अभावः दृश्यते।

**मध्यमोऽहमवध्यानामुत्सिक्तानां च मध्यमः।**

**मध्यमोहं क्षितौ भद्र भ्रातृणामपि मध्यमः। मध्यम/श्लो28**

9) **बालचरितम्**

बालरूपो भगवान् श्रीकृष्णः याः लीलाः प्रादर्शयत् ताः अत्र कीर्तिताः सन्ति। नाटकीय दृष्ट्या बालचरितम् एकं सफलं नाटकम्। अस्य नायकः प्रख्यातः धीरोदात्तः। सः नायकः समस्तगुणैः - सम्पन्नः।भवन्ति वीररस प्रधान मिदं नाटकं करुणरौद्रादयः रसाः अंगिनो रसः ।काव्यपरिपाकस्य दृष्ट्या बालचरितम् अत्यन्तं प्रशंसनीयमस्ति।

**खङ्खक्षीरवपुः पुरा कृतयुगे नाम्ना तु नारायण**

**स्त्रेतायां त्रिपदार्पित त्रिभुवनो विष्णुः सुवर्णप्रभः**

**दूर्वाश्यमनिभः स रावणवधे रामो युगे द्वापरे**

**नित्यं योऽञ्जनसन्निभः कलियुगे वः पातु दामोदरः ॥ बाल/अं1/श्लो2**

10) **अविमारकम्**

एषा कथा सम्भवतो गुणाढ्यकृतबृहत्कथातो गृहीता राजकुमारस्याविमारकस्य कुन्तिभोजकुमार्या कुरङ्ग्या सह प्रणयोऽत्र वर्णितः ।

11) **<u>अभिषेकनाटकम्</u>**

सर्वे देवाः देवर्षयः ऋषिगणाः च भगवन्तं श्रीरामं अभिषिक्तवन्तः। अत एव अस्य नाम अभिषेकनाटकम्। नाटके द्वे अभिषेके वर्तेते। एकः अभिषेकः वानरराजस्य सुग्रीवस्य द्वितीयश्च चक्रवर्तिनः श्रीरामचन्द्रस्य। रामरावणयोः युद्धं विशिष्टतया वर्णितमस्ति।

**इदानीं राज्यविभ्रष्टं सुग्रीवं रामलक्ष्मणौ।**

**पुनः स्थापयितुं प्राप्ताविन्द्रं हरिहराविव॥ अभि/अं1/श्लो3**

12. **प्रतिमानाटकम्**

मृतानां इक्ष्वाकुवंशीयनाम् राज्ञां प्रतिमानिर्माण अत्र वर्णितम्। प्रतिमानिर्माणस्य कथा भासस्य मौलिकता प्रतिमायाः दर्शनेनैव भरतः दशरथस्य मृत्यु वार्ताम् अवगच्छति।

प्रतिमानाटके प्रसिद्ध सूक्तयः

**मम भ्रातुश्च भ्रातुश्च मद्यस्था त्वं न शोभसे।**

**गंगायमुनयोर्मध्ये कुनदी प्रवेशिता॥ प्रति.ना/अ3/श्लो16**

**गोपहीना यथा गावो विलयं यान्त्यपातिताः।**

**एवं नृपतिहीना हि विलयं भान्ति वै प्रजाः॥ प्रति.ना/अ3/श्लो23**

13. **चारुदत्तम्**

चारुदत्तं नाटकं भासमहाकवेः अन्तिमं नाटकम्। भासस्य कला नाटके ललितलाक्ष्यम् प्रदर्शितं किन्तु दैवदुर्विपाके इदं नाटकं सहसा परिसमाप्यते। इयं नाटकम् सम्पूर्णं नास्ति। नाटकरचनायाः मध्ये एव प्रायः भासः दिवङ्गतः। इयं नाटकम् अपूर्णमेव अभवत्।

**उपयुक्त ग्रन्थाः;**

भासनाट्यग्रन्थावलिः –राम जी उपाध्यायः –भारतीय संस्कृति संस्थानम्-महामनापुरी, वाराणसी

स्वप्नवासवदत्तं- जयकृष्णदास हरिदास- चौखम्बा संस्क्रता सीरिज - वाराणसी

प्रतिमानाटकम्- त.गणपतिशास्त्रि- चौखम्बा संस्कृत सीरिज - वाराणसी

प्रतिमानाटकम् - श्रीधरानन्द शास्त्रि- मोतिलाल बनारसीदास- वाराणसी- 1951

महाकवि भासः- आचार्यबलदेव उपाध्याय , चौखम्बा- वाराणसी-1961

स्वप्नावासवदत्तम्- भासः- चौखम्बा विद्या भवन् - वाराणसी-1980

संस्कृत साहित्य का इतिहास- आचार्य बलदेव उपाध्याय , चौखम्बा- वाराणसी-

Natyashashtra– sudha Rastogi–Krishana das academy– Varanasi – 1989

***************

# मध्यमव्यायोगे कुटुम्बनिर्वहणम् ।

**Dr. Rajesha. M. D**
Lecturer
University College, Mangalore.

सुखदुःखसमुद्भूते इह जगति सुखमेव मे स्यात् दुःखं मा भवतु इति चिन्तयमानाः मानवाः संसारसागरे सुखमन्वेषयन्तः दुःखमपि अनुभवन्ति। तादृशसंसारसागरे समस्यावैविध्यात् पीडिताः भवन्ति मानवाः । तेषां जीवने नैका घटनाः जुगुप्सां जनयन्ति । तदृशसमस्यापूर्णसंसारसागरात् धैर्येण तीरं समुपगच्छेत् । सर्वासां समस्यानां तत्तत्स्वरूपमाश्रित्य परिहारा अपि भवन्ति ।

एतादृश लोकस्य प्रतिबिम्बभूते काव्ये श्रृङ्गार-हास्य-वीर-राजकारणादिविषयापेक्षया कौटुम्बिक-जीवनतत्त्वान्येव प्रधानतया प्रतिपादितवत्सु कविषु भासमहाकविः अन्यतमः । तस्याभिप्राये कौटुम्बिकं प्रेम न केवलं कुटुम्बस्य अपि तु राष्ट्रस्याप्याधारस्तम्भ इति तद्रचितरूपकाणामवलोकनेन स्पष्टं ज्ञायते ।

व्यायोगः रूपकेषु अन्यतमः भवति । भासमहाकविनविरचिते मध्यमव्यायोग नामक व्यायोगे कुटुम्ब एकस्मिन् समावृतां समस्यां तत्कुटुम्बसदस्याः कथं निरवहन् इति किञ्चित् पश्यामः ।

उत्तरस्यां दिशि उद्यामकग्रामवासी मातुलः यज्ञबन्धुनामकस्य पुत्रस्योपयनार्थं प्रस्थितः सकलत्रपुत्र सहितः केशवदासः नामक वृद्धब्राह्मणः । सः मातुलस्य गृहं गन्तुम् अरण्यमार्गे गमनवेलायां हिडिम्बारणिसम्भूतः घटोत्कचः मातुः व्रतसम्पूर्णताद्योतकपारणार्थं कश्चन मनुष्योऽपेक्ष्यत इति प्रतीक्षते स्म। यदा केशवदासस्य कुटुम्बः तत्रागतः तदा तान् दृष्ट्वा हर्षितः सः तान् नीवारयति । वृद्धब्राह्मणपरिवारस्य मुखे भयं दृष्ट्वा सः ब्राह्मणस्योपरि विद्यमान पूज्यतमभावं, मातुर्वचनात् अकार्यं किञ्चित् कार्यं भवतीति कथयति ।[1] अस्य वचनं श्रुत्वा भीतः वृद्धब्राह्मणः मनस्विजननिवासयोग्येऽस्मिन् कानने पाण्डवाः भवेयुः इति विचिन्त्य तान् विक्रोशयति । तदा प्रथमपुत्रेण केनचिद् ब्राह्मणेन उक्तविचारेण पाण्डवाः महर्षिधौम्यस्य आश्रमं गताः इति कथयति । तत् श्रुत्वा निराशाः वृद्धपरिवारः घटोत्कचं प्रति मुक्तिं याचयन्ति । तदा सः वृद्धब्राह्मणस्य पुत्रमेकं विसर्जयतुं वक्ति ।[2] शीलगुणान्वितं पुत्रं दत्त्वाऽहं कथं निर्वृतिमाप्नुयाम् इति वृद्धब्राह्मणः घटोत्कचं प्रति वदति । तदा घटोत्कचः वृद्धब्राह्मणं प्रति एवं कथयति –

**यद्यर्थितो द्विजश्रेष्ठ पुत्रमेकं न मुञ्चसि । सकुटुम्बः क्षणेनैव विनाशमुपयास्यसि ॥** इति ।

[1] जानामि सर्वत्र सदा च नाम द्विजोत्तमाः पूज्यतमाः पृथिव्याम् ।
अकार्यमेतच्च मयाद्य कार्यं मातुर्नियोगाद् अपनीय शङ्काम् ॥ ९॥

[2] पत्न्या चारित्रशालिन्या द्विपुत्रो मोक्षमिच्छसि ।
बलाबलं परिज्ञाय पुत्रमेकं विसर्जय ॥ १२॥

तदा घटोत्कचस्य वचः श्रुत्वा केशवदासः एवं निश्चयं करोति –

**कृतकृत्यं शरीरं मे परिणामेन जर्जरम् । राक्षसाग्नौ सुतापेक्षी होष्यामि विधिसंस्कृतम्॥** इति ।

भर्तुः वचनं श्रुत्वा ब्राह्मणी स्वभर्तारं निवारयित्वा स्वाभिप्रायं, स्वयं राक्षसस्य साकं किमर्थं गन्तव्यमिति एवं वक्ति – "पतिमात्रधर्मिणी पतिव्रतेति नाम । गृहीतफलेन एतेन शरीरेण आर्यं कुलं च रक्षितुम् इच्छामि" इति । तदा घटोत्कचः स्त्रीनिमित्तं तां निवारयति । तदनन्तरं वृद्धब्राह्मणस्य ज्येष्ठपुत्रः स्वप्राणैः गुरुप्राणान्, कुलस्य च रक्षणार्थं गच्छामीति वदति ।[1] द्वितीयपुत्रः ज्येष्ठभ्रातरं निवारयित्वा स्वाभिप्रायं प्रकटयति –

**ज्येष्ठः श्रेष्ठः कुले लोके पितृणां सुसम्प्रियः । ततोऽहमेव यास्यामि गुरुवृत्तिमनुस्मरन् ॥**१७॥ इति

तदा तृतीयपुत्रः स्वभिप्रायमेवं प्रकटयति –

**ज्येष्ठो भ्राता पितृसमः कथितो ब्रह्मवादिभिः । ततोऽहं कर्तुमस्म्यर्हो गुरूणां प्राणरक्षणम् ॥**

तृतीयस्य वचः श्रुत्वा प्रथमः पुत्रः 'ज्येष्ठपुत्रेण किमर्थं गन्तव्यं, तस्य दायित्वं किम्' इति वदति –

**आपदं हि पिता प्राप्तो ज्येष्ठपुत्रेण तार्यते । ततोऽहमेव यास्यामि गुरूणां प्राणरक्षणात् ॥**

ज्येष्ठकनिष्ठपुत्रयोः विद्यमानप्रीत्या पितरौ तौ न परित्यक्तुमिच्छतः । तदा घटोत्कचः पित्रोः अनिष्टपुत्रस्य द्वितीयस्योपरि स्वस्य प्रीतिं प्रकटयित्वा नेतुमिच्छति। द्वितीयपुत्रः परलोकस्य पिपासाप्रतिकारार्थं घटोत्कचस्य अनुमतिं स्वीकृत्य वनान्ते विद्यमानजलाशयं प्रति गच्छति । यावत्कालपर्यन्तं नागतः तावद् घटोत्कचः तपस्वी मध्यमं मध्यम इति नाम्ना आह्वयति । तस्य वचः श्रुत्वा भीमसेनः मध्यमपाण्डवः तत्र आगच्छति। अन्ते सः केशवदासस्य कुटुम्बरक्षणार्थं स्वयं हिडिम्बारणि समीपं घटोत्कचेन साकम् आहाररूपेण गच्छति ।

महाकविभासेन मध्यमव्यायोगनामके रूपके केशवदासः नामक वृद्धदम्पत्त्योः द्वारा पतिपत्न्योः मितः सम्बन्धप्रदर्शनद्वारा कुटुम्बे समागतसमस्यायां पत्युः प्राणरक्षणं पत्न्याः दायित्वं च अत्यन्तमनोहरतया वर्णितम् । एवं त्रिषु पुत्रेषु प्रथमपुत्रेण पितुः रक्षणार्थं स्वस्य आत्मार्पणम्, द्वितीयपुत्रेण स्वस्य अग्रजस्य दायित्वं स्वस्यार्पणस्य कारणम् , तृतीयपुत्रेण द्वयोः अग्रजयोः रक्षणस्यावश्यकतां प्रतिपादयित्वा आत्मार्पणे सिद्धः भवति । एवं त्रयः पुत्राः कुटुम्बरक्षणे स्वस्व अभिप्रायप्रकटद्वारा कुटुम्बेऽस्मिन् समागतसमस्यायाः निर्वहणे स्वस्य योगदानं प्रदर्शयन्ति। एवम् अत्र महाकविना ज्येष्ठकनिष्ठपुत्रयोः कस्य प्रीतिर्वात्सल्यं च भवति, मध्यमपुत्रः कस्य वा प्रियो भवतीति अत्यन्तहृद्यतया वर्णितम् ।

---

[1] मम प्राणैः गुरुप्राणानिच्छामि परिरक्षितुम् ।
रक्षणार्थं कुलस्यास्य मोक्तुमर्हति मां भवान् ॥१६॥

# भासनाटकचक्रे पञ्चरात्रम्

**डा. नरेन्द्र बि एस्**

संस्कृतविभागाध्यक्षः

तुङ्गामहाविद्यालयः, तीर्थहळ्ळि

कर्नाटकराज्यम् - ५७७४३२

जगतीतले विद्यमानासु भाषासु संस्कृतभाषैव प्राचीनतमा। नाटकं संस्कृतसाहित्यस्य परमगौरवात्मकमङ्गं विद्यते। नाटकस्य प्रसादादेव संस्कृतसाहित्यस्य कीर्ति-कौमुदी निखिलेऽस्मिन् विश्वसाहित्ये विस्तृतास्ति। नाटकस्तु नेत्रज्ञानेनैव हृदयं चमत्करोति। श्रवणापेक्षयाऽवलोकनसुखं श्रेष्ठतरमिति सर्वसाधारणोऽपि जानाति । काव्ये रसानुभूतिः अर्थज्ञानेनैव कर्तुं शक्यते परन्तु नाटके रसानुभूतिः दृश्यावलोकनेनैव जायते । त्रैलोक्यस्य विषयस्यानुकीर्तनात्मक नाट्यसाहित्ये महाकविभासस्य महती प्रसिद्धिरस्ति । स्वयं महाकविकालिदासोऽपि भासस्य वैशिष्ट्यं मुक्तकण्ठेन स्वीकरोति मालविकाग्निमित्रस्य प्रस्तावनायाम्[1] । अनेन ज्ञायते यत् कालिदासस्य समये भासस्य महती प्रसिद्धिरासीदिति । भासनाटकचक्रे त्रयोदश नाटकानि समुपलभ्यन्ते । तानि महाभारताधारितानि, रामायणाधारितानि, बृहत्कथाधारितानि, भागवताधारितमिति विभक्तुं शक्यते । महाभारताधारितनाटकेषु अन्यतमम् पञ्चरात्रम् । इदं नाटकं पञ्चरात्रमिति व्यपदिश्यते, दुर्योधनकल्पिते समयविशेषे क्लृप्तस्य रात्रिपञ्चकात्मकस्य कालस्य प्राधान्यविवक्षणात् ।

कथाविशेषः -

अस्य नाटकस्य मूलकथावस्तु व्यासभारतस्य विराटपर्वाधारितम् वर्तते । तथापि नाटककारेण किञ्चित् परिवर्तनमपि कृतम् । विराटराज्ये युधिष्ठिरादीनां पाण्डवानाम् अज्ञातवासः, कौरवेण सह युद्धम् , कीचकवधादिकथा महाभारतस्य विराटपर्वणि सविस्तररूपेण वर्णिता। परन्तु नाटकेऽस्मिन् दुर्योधनो यज्ञावभृथान्ते ब्राह्मणसन्तर्पणावसरे धनुराचार्यं द्रोणं तस्याभीष्टदक्षिणां पृष्टवान् । पाण्डवेभ्यो ऽर्धराज्यदानमेव मम सुदक्षिणा[2] इति द्रोणेन निवेदिते शकुनिना सह समालोच्य "यदि पञ्चरात्रेण

---

[1] . प्रथितयशसां भाससौमिल्लककविपुत्रादीनां प्रबन्धानतिक्रम्य वर्तमानकवेः कालिदासस्य क्रीयायां कथं बहुमानः ।
मालविकाग्निमित्रे प्रथमाङ्कस्य प्रस्तावनायाम् ।

[2] . येषां गतिः क्वापि निराश्रयाणां संवत्सरैर्द्वादशभिर्न दृष्टा ।

अज्ञातवासिपाण्डवानां प्रवृत्तिरुपनीयते तर्हि तेभ्योऽर्धराज्यं दद्याम्" इति दुर्योधनस्य निर्णयादिघटना काल्पनिकरूपेण योजितम् ।

**कथानायकः -**

नाटकेऽस्मिन् सर्वप्रधानपात्रं तु दुर्योधनस्य । नाटकस्य आरम्भात् अन्त्यं यावत् तेन विशिष्यते । नाटकस्य सम्पूर्णक्रियाकलापः अस्य वचनानुसारेण सञ्चाल्यते । नाटकारम्भे महतो यज्ञस्य प्रवर्तनम्, यज्ञार्थं विपुलसंपद्व्ययः, ब्राह्मणगणप्रभृतीनां दक्षिणादिदानकरणम्, होमधूमेन देवतानां प्रीणनादिचित्रणेन दुर्योधनो धार्मिकराजरूपेण प्रदर्शितः । यज्ञावभृथस्नानसमये तस्य गुरुभक्तिं प्रदर्शयति । गुरुं द्रोणाचार्यं प्रति वारं वारं दक्षिणार्थं निवेदयति । यदा पाण्डवानां कृते अर्धराज्यदानं करणीयमिति द्रोणः अपृच्छत् तदा तस्य स्वार्थबुद्धिः जागर्ति । यदा द्रोणाचार्यः पाण्डवानां कृते यदि अर्धराज्यं न दीयते चेत् ते बलात्कारेण हरणं कुर्वन्ति[1] इति वदति तदा स्वस्वाभिमानमपि दर्शयति[2] । कुलवृद्धानां पुरतः द्रोणं प्रति दक्षिणदानप्रतिज्ञां कृत्वा स्वगुरुभक्तिमपि प्रदर्शयति[3] । पाण्डवान् प्रति प्रबलवैरम् अस्ति चेदपि अभिमन्युं प्रति वात्सल्यं सूचयति[4] । स दुर्योधनो धर्मवीरः, "कृतश्रद्धो ह्यात्मा" "तदिदमपनयो वा वञ्चना वा यथा वा भवतु नृप ! जलं तत् सत्यमिच्छामि कर्तुम्"[5] "बाढं दत्तं मया राज्यम्"[6] इत्यादिषु धर्मविषयोत्साहस्य अभिव्यक्तेः कारणात् ।

भूयिष्ठसमवकारलक्षणयोगेन रूपकमिदं समवकारः -

---

त्वं पाण्डवानां कुरु संविभागमेषा च भिक्षा मम दक्षिणा च ॥ पञ्चरात्रम् अङ्कः १, श्लो ३३

[1]. भ्रातॄणां पैतृकं राज्यं दीयतामिति वञ्चना ।
किं परं याचितैर्दत्तं बलात्कारेण तैर्हृतम् ॥ पञ्चरात्रम् अङ्कः १, श्लो ३५

[2]. यत् पुरा ते सभामध्ये राज्ये माने च घर्षिताः ।
बलात्कारसमर्थैस्तैः किं रोषो धारितस्तदा ॥ पञ्चरात्रम् अङ्कः १, श्लो ३७

[3]. गुरुकरतलमध्ये तोयमावर्जितं मे श्रुतमिह कुलवृद्धैर्यत् प्रमाणं पृथिव्याम् ।
तदिदमपनयो वा वञ्चना वा यथा वा भवतु नृप ! जलं तत् सत्यमिच्छामि कर्तुम् ॥ पञ्चरात्रम् अङ्कः १, श्लो ४७

[4]. मम हि पितृभिरस्य प्रस्तुतो ज्ञातिभेदस्तदिह मयि तु दोषो वक्तृभिः पातनीयः ।
अथ च मम स पुत्रः पाण्डवानां तु पश्चात् सति कुलविरोधे नापराध्यन्ति बालाः॥पञ्चरात्रम् अङ्कः ३, श्लो ४

[5]. पञ्चरात्रम् अङ्कः १, श्लो ४७

[6]. बाढं दत्तं मया राज्यं पाण्डवेभ्यो यथापुरम् ।
मृतेऽपि हि नराः सर्वे सत्ये तिष्ठन्ति तिष्ठति ॥ पञ्चरात्रम् अङ्कः ३, श्लो २५

नायकस्तु दुर्योधनः, पाण्डवाः द्रोणश्च देवकल्पाः। भीष्मकर्णादयस्तत्सहायाः। दुर्योधनस्य सत्यपरिपालनरूपधर्मनिष्पत्तिः फलम्। पाण्डवानामर्धराज्यलाभः, द्रोणस्य शिष्यानुग्रहचारितार्थ्य-सिद्धिरित्येवं नायकानां पृथक्फलसम्बन्धोऽप्यस्ति । एवञ्च ख्यातेतिवृत्तसंबद्धत्वात्, वीररसप्रधानत्वाद्, देवकल्पपृथक्फलबहुनायकत्वात्, कपटाश्रयत्वात्, अङ्कत्रयकारणात् भूयष्ठसमवकारलक्षणयोगेन रूपकमिदं समवकार[1] इति विज्ञायते । यद्यपि भासनाटकेषु नाट्यशास्त्रीयनियमानां यथावत् पालनम् नाभवत् । तथापि "प्राधान्येन व्यपदेशो भवति" इत्याधारेण समवकारः इति वक्तुं शक्यते ।

काव्योत्कर्षदृष्ट्या पञ्चरात्रम् -

काव्योत्कर्षदृष्ट्या इदं नाटकम् वैशिष्ट्ययुक्तम् । सरलशब्दावल्यां भावोन्मेषः कवेः विशेषता वर्तते। शब्दचमत्कारादेव नाटकस्य संपूर्णचित्रणं दृष्टिपथम् आयाति । शकुनिना उक्तम् "ऊषरेष्वपि सस्यं स्याद् यत्र राजा युधिष्ठिर"[2] इति वाक्यं शून्यहृदयान् अपि आकर्षति। नाटके अलङ्कारसङ्घटना नितान्तस्पृहणीया वर्तते । दुर्योधनस्य यज्ञसंवृद्धिवर्णना नाटककारस्य निपुणतां प्रदर्शयति । "सति च कुलविरोधे नापराध्यन्ति बालाः"[3], "धर्माधिकारवचनेषु शमीभवन्ति"[4] इत्याद्यनेककालोचित, नाटकोचितसूक्तयः हृदयहारिण्यो वर्तन्ते । नाटके स्त्रीपात्राणाम् अभावः, महाभारत-आख्यानेन सह काल्पनिककथायोजनम्, वीररसस्य प्राधानता भासस्य नाटकचातुर्यं प्रदर्शयति ।

महाकविः भासः मानवजीवनस्य विविधक्षेत्रं निजकृतिषु अङ्कयितुं चित्रयितुं वा यत्नं कृतवान् । अत एवास्य कृतिषु विविधता सर्वत्रैव दृग्गोचरीभवति । एवं व्यापकदृष्ट्या शास्त्रदृष्ट्या च भासस्य नाटकं सरलं, सुबोधम् , अभिनयदृष्ट्याऽतिश्रेष्ठमिति गण्यते ।

**************

---

[1] . ख्यातं देवासुरं वस्तु निर्विमर्शस्तु संधयः । वृत्तयो मन्दकैशिक्यो नेतारो देवदानवाः ॥
द्वादशोदात्तविख्याताः फलं तेषां पृथक्पथक् । बहुवीररसाः सर्वे यद्वदम्भोधिमन्तने ॥
अङ्कैस्त्रिभिस्त्रिकपटस्त्रिश्रुङ्गारस्त्रिविद्रवः । द्विसन्धिरङ्कः प्रथमः कार्यो द्वादशनालिकः ॥
चतुर्दिनालिकावन्त्यौ नालिका घटिकद्वयम् । वस्तुस्वभावदैवारिकृताः स्युः कपटास्त्रयः ॥
नगरोपरोधयुद्धे वाताग्न्यादिकविद्रवाः । धर्मार्थकामैः श्रुङ्गारो नात्र बिन्दुप्रवेशकौ ॥
वीथ्यङ्गानि यथालाभं कुर्यात्प्रहसने यथा । दशरूपकम् तृतीयः प्रकाशः / ६३-६८ कारिका

[2] . शून्यमित्यभिधास्यामि कः पार्थाद् बलवत्तरः ।
ऊषरष्वेपि सस्यं स्याद् यत्र राजा युधिष्ठिरः ॥ पञ्चरात्रम् अङ्कः १, श्लो ४६

[3] . पञ्चरात्रम् अङ्कः ३, श्लो ४

[4] . पञ्चरात्रम् अङ्कः १, श्लो ४१

# अहिंसा

**मनीष कुमारः,**

छात्रः, मद्रपुरीसंस्कृतकलाशाला, चेन्नै

**हिंसा लोकेन विद्विष्टा हिंसा धर्मक्षयावहा।**

**अहिंसा परमा शक्तिः अहिंसा परम तपः॥**

सर्वप्रथमं हिंसावषये चर्चा कुर्मः। तत्र योगदर्शने प्रतिपादितं यत् यमनियमासनानामाचरणे यदि विघ्न आयाति तर्हि किं कर्तव्यम् ? द्वितीयस्य साधनपादस्य त्रयस्त्रिंशत्सूत्रे उक्तम् –

**वितर्कबाधने प्रतिपक्षभावनम्** इति। तथा

**वितर्काः हिंसादयः कृतकारितानुमोदिता लोभक्रोधमोहपूर्वकाः मृदुमध्याधिमात्रा दुःखाज्ञानानन्तफला इति प्रतिपक्षभावनम्** (2/34) इति।

हिंसनं हिंसेति । प्राणवृत्तिच्छेदः हिंसा। अशास्त्रीयप्राणिवधः हिंसा। अविधिपूर्वकं प्राण्युपघातः हिंसा। प्राणवियोगानुकूलव्यापारः हिंसा। प्राणिनां शारीरं मानसं वा परिपीडनं हिंसेति। मनसा परापकृतिचिन्तनं कटुवाक्यप्रयोगोऽपि हिंसा एव। तत्र हिंसा त्रिप्रकारा = स्वयंकृता, अन्यैः कारिता, साधु साधु इति अनुमोदिता चेति। तत्र एकैका कारणभेदात्पुनः त्रिविधा भवति मांसचर्मधनादिलोभेन, अपकृतमनेनेति क्रोधेन, धर्मो मे भविष्यति इति मोहेन। एवं नवविधा जाता हिंसा ।

पुनः लोभक्रोधमोहाः प्रत्येकं त्रिविधा भवन्ति मृदुमध्याधिमात्रत्वेन। तत्पूर्वकाः हिंसादयोऽपि मृदुत्वादिना त्रिविधाः भवन्ति। तथा कृता कारिता अनुमोदिता च प्रत्येकं नवधा भवतीति हिंसायाः सप्तविंशतिभेदाः भवन्ति ।

मृदुमध्याधिमात्राः अपि प्रत्येकं त्रिविधाः भवन्ति - मृदुमुदुः, मध्यमृदुः , तीव्रमृदुः। मृदुमध्यः , मध्यमध्यः, तीव्रमध्यः । मृदुतीव्रः , मध्यतीव्रः, तीव्रतीव्रश्चेति । एवं लोभो नवविधः, तथा क्रोधमोहौ इति तत्पूर्वा कृता हिंसा सप्तविंशतिधा भवति, तथा कारिताऽनुमोदिता चेति एकाशीतिभेदा हिंसा भवति ।

अधुना अहिंसाविषये ब्रवीमि । लक्षणप्रमाणाभ्यां वस्तुसिद्धिः। अतः अहिंसायाः लक्षणं क्रियते। वाङ्मनःकायैः सर्वभूतानाम् अनभिद्रोहः अहिंसा। प्राणवियोगप्रयोजनकव्यापारराहित्यम् अहिंसा। अशास्त्रीयप्राणिपीडनाभावः अहिंसा। अथवा सर्वविधहिंसापरित्याग एवाहिंसेति ।

विविध - वाद - विवाद - विप्रतिपत्ति - बहुलेऽपि लोके अहिंसायाः विषये सर्वेषां निगमागमानाम् ऐकमत्यम्। अत एव मुनिना मनुना चातुर्वर्ण्यार्थम् अहिंसाया महत्त्वमुपस्थाप्यते -

**अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः।**

**एतं सामासिकं धर्मं चातुर्वर्ण्येऽब्रवीन्मनुः॥** (मनु, १० - ६३)

तथा च अहिंसया एव मानवैः सर्वमपि कार्यं साध्यम् । मधुरया वाचा यथा कार्यसिद्धिः सम्भाव्यते, न तथा प्रकारान्तरेण। एवं स्वार्थ - परार्थ - साधनेन सममेव धर्मपरिपालनमपि सिध्यति। उक्तञ्च -

**अहिंसयैव भूतानां कार्यं श्रेयोऽनुशासनम्।**

**वाक्चैव मधुरा श्लक्ष्णा प्रयोज्या धर्ममिच्छता॥** (मनु। 2 - 159)। ।

भगवता महर्षिणा पतञ्जलिना विनिर्मिते योगदर्शने – **यम - नियम - आसन - प्राणायाम - प्रत्याहार - धारणा - ध्यान - समाधयोऽष्टावङ्गानि** (2.29) इति सूत्रस्यास्य घटकस्य यमस्य विषये उक्तम् **अहिंसा – सत्य-अस्तेय ब्रह्मचर्य - अपरिग्रहाः यमाः** (2/30) इति।

अत्राहिंसायाः एव प्राधान्यं प्रतिपादितम् । यमः निषेधात्मकः निवृत्तिपरको वा योगाङ्गो वर्तते। ।

यैः उपरम्यन्ते निवर्त्यन्ते विषयेभ्यो मनसेन्द्रियाणीति ते यमाः। ते च अहिंसादयः पञ्चेति। तत्राहिंसा सर्वथा सर्वदा सर्वभूतानामनभिद्रोहः। सर्वथा कायेन मनसा वाचा सर्वदा प्राणात्ययादिसङ्कटकालेऽपीत्यर्थः। स्थावरजङ्गमादिप्राणिनाम् अनभिद्रोहः, पीडनबुद्धिराहित्यमित्येव योगाङ्गभूता - अहिंसा। अन्ये यमाः सत्य - अस्तेय - ब्रह्मचर्य - अपरिग्रहाः। तथा नियमाः शौच- सन्तोष - तपः - स्वाध्याय - ईश्वरप्रणिधानानि - सर्वे अहिंसामूलकाः सन्ति।

यमेषु प्रथमं स्थानमहिंसाया एव वर्तते। अहिंसामेव निर्मलीकर्तुं सत्यादिनां यमानां शौचादिनियमानां परिपालनं क्रियते । उक्तञ्च - भाष्ये भगवता व्यासेन **उत्तरे च यमनियमाः तन्मूलाः तत्सिद्धिपरतया एव तत्प्रतिपादनाय प्रतिपाद्यन्ते ।** तदवदातरूपकरणाय एव उपादीयन्ते। तथाचोक्तम् - **स खलु अयं ब्राह्मणो यथा यथा व्रतानि बहूनि समादित्सते तथा तथा प्रमादकृतेभ्यो हिंसानिदानेभ्यो निवर्तमानः तामेव अवदातरूपाम् अहिंसां करोतीति**। यमानां महत्त्वं वर्णयता भगवता पतञ्जलिना तेषां सार्वभौममहाव्रतत्वमुद्घोषितम्। तत्र सूत्रम् -

**जातिदेशकालसमयानवच्छिन्नाः सार्वभौमाः महाव्रतम्।** २।३५।

तत्राहिंसा जात्यवच्छिन्ना मत्स्यबन्धकस्य मत्स्येषु एव, नान्यत्र हिंसा। देशावच्छिन्ना ऽहिंसा यथा न तीर्थे हनिष्यामीति। कालावच्छिन्ना ऽहिंसा यथा न चतुर्दश्यां, न पुण्येऽहनि हनिष्यामीति। सैव त्रिभिः उपरतस्य समयावच्छिन्ना देवब्राह्मणार्थे, नान्यथा हनिष्यामीति। अथवा यथा च क्षत्रियाणां युद्ध एव हिंसा, नान्यत्रेति। एभिः जातिदेशकालसमयैः अनवच्छिन्ना अहिंसादयः सर्वथैव परिपालनीयाः। सर्वभूमिषु सर्वविषयेषु सर्वथैव अविदितव्यभिचाराः सार्वभौमाः महाव्रतं इत्युच्यते । अहिंसैव विश्वस्मिन् जगति शान्तिसन्धात्री, अभ्युदयसाधनी गुणोत्कर्षकारिणी,धर्माभिवृद्धिहेतुः भवाब्धिसंतरणैकसेतुश्चेति ।

अन्ते च तस्याः फलविषयेप्युक्तम् भगवता पतञ्जलिना - यत्र अहिंसायाः प्रतिष्ठा तत्र न केवलं मानवेषु अपितु सर्वप्राणिनां वैरत्यागो भवतीति। शाश्वतिकविरोधा अपि अश्व - महिष - मूषक- मार्जार – अहि-नकुलादयोऽपि भगवतः प्रतिष्ठितस्य अहिंसाख्यस्य सन्निधानात् तच्चित्तानुकारिणो वैरं परित्यजन्ति। वाल्मीकिरामयाणेऽगस्त्याश्रमस्य वनकाण्डे वर्णनम् =

**यदाप्रभृति चाक्रान्ता दिगियं पुण्यकर्मणा ।**
**तदाप्रभृति निर्वैराः प्रशान्ता रजनीचराः ॥**
**अयं दीर्घायुषस्तस्य लोकेविश्रुतकर्मणः।**
**अगस्त्यस्याश्रमः श्रीमान् विनीतमृगसेवितः॥**
**नात्र जीवन्मृषावादी क्रूरो वा यदि वा शठः।**
**नृशंसः पापवृत्तो वा मुनिरेष तथाविधः॥** सर्गः / 83, 86, 90 /

इति शम्।

# मध्यमव्यायोगे भासेनोदाहृतविद्यार्थिलक्षणम्

**Dr. M. SRIDHAR RAJAN,**
Asst. professor & Head, Dept of Sanskrit,
Sri Sankara Arts & Science college,
Enathur, Kanchipuram,
Tamil Nadu – 631 501
E-mail – cheya.sridhar@gmail.com

महाकविः भासः संस्कृतनाटककविषु अग्रगण्यः प्रधानश्च भवति। कालिदासः स्वीये मालविकाग्निमित्रग्रन्थे इत्थं स्वाभिप्रायं प्रकटयति– **"प्रथितयशसां भाससौमिल्लकविपुत्रादीनां प्रबन्धानतिक्रम्य वर्तमानस्य कवेः कालिदासस्य कथं परिषदोऽस्याः बहुमानः"** इति। अयञ्च भासः समाजप्रियः कवीनामादर्शपात्रपूर्णश्च भवति। यतो हि अयं स्वनाटकेषु समाजस्थमानवेभ्यः आत्माभिवृद्ध्यै स्वीययोगदानं किम् इति स्वीयकथायाः द्वारा नाटकीयसंवादद्वारा वा स्पष्टं प्रतिपादयति। ब्राह्मणादि चातुर्वर्ण्यधर्मान् , ब्रह्मचर्यादि- आश्रमधर्मनियमादींश्च शास्त्रोक्तान् सारांशरूपेण स्वनाटकेषु बोधयति।

अपि च भासस्य श्लोकेषु नाटकसंवादरचनाशैल्याञ्च विभिन्नानि मानवीयमूल्यानि उपलभ्यन्ते। यथा मध्यमव्यायोगे रचितानि कथापात्राणि कुशाग्रबुद्धियुक्तानि अतीव तीक्ष्णानि भवन्ति। यश्च गुणः छात्रेभ्यः अध्ययनसमये अवश्यापेक्षितः भवति। महाकविकलिदासोऽपि स्वीये रघुवंशमहाकाव्ये पञ्चमे सर्गे रघुमहाराजकौत्सकथावर्णनप्रसङ्गे उत्तमविद्यार्थिनः स्वभावमित्थं वर्णयति –

**अप्यग्रणीर्मन्त्रकृतामृषीणां कुशाग्रबुद्धे कुशली गुरुस्ते।**
**यतस्त्वया ज्ञानमशेषमाप्तं लोकेन चैतन्यमिवोष्णरश्मेः॥** इति।

तथाहि - विश्वजिति यागे रघुमहाराजः स्वराज्यादिविभवं सर्वमपि सर्वेभ्यः दानं कृत्वा निर्धनः अतिष्ठत्। तदा तस्मात् याचितुं कौत्सो नाम कश्चन विद्यार्थी आगतः। राजा आगमनकारणं ज्ञातुम् आदौ कुशलप्रश्नादीन् अकरोत्। मन्त्रकृत्सु अग्रण्या वरतन्तुमहर्षेः शिष्यम् अशेषचतुर्दशविद्यं कौत्सम् आदौ इत्थं सम्बोधयामास– "कुशाग्रबुद्धे" इति। कुशस्य अग्र इव बुद्धिः यस्य सः कुशाग्रबुद्धिः। कुशनामकस्य घासस्य अग्रभागः अतीव तीक्ष्णं भवति। तादृशतीक्ष्णबुद्धिमन् हे कौत्स इत्यर्थः।

**अङ्गानि वेदाश्चत्वाराः मीमांसान्यायविस्तरः। पुराणं धर्मशास्त्रञ्च विद्या ह्येताश्चतुर्दश ॥**

इति चतुर्शविद्यां यः आप्नोति तस्य बुद्धिः कुशाग्रबुद्धिरेव भवति। अन्यथा तस्य चतुर्दशविद्यानाम् अशेषं ज्ञानं दुःशकम्। अत एव रघुमहाराज इत्थं तं सम्बोधयति। सत्सु बहुषु विद्यार्थिलक्षणेषु तान् परित्यज्य

अस्य प्रयोगेण महाकविकालिदासस्य अयमभिप्रायः स्यात् यत् "कुशाग्रबुद्धित्वमेव उत्तमविद्यार्थिलक्षणम्" इति।

अस्तु अत्र कुशाग्रबुद्धित्त्वं नाम किम्? तस्य कः अर्थः? इत्यादीनाम् अन्वेषणे भासीये मध्यमव्यायोगे कानिचन उदाहरणानि प्राप्यन्ते। अत्र इदमवधेयं यत् मध्यमव्यायोगे भासेन साक्षात् कुत्रापि विद्यार्थि लक्षणं प्रोक्तं न वा तेषां उदाहरणानि उच्यन्ते इति प्रतिज्ञां कृत्वा उदाहरणानि उदाहृतानि। अपि तु मध्यमव्यायोगीय कथापात्राणां रचने तद्गते सम्वादे च तादृशोदाहरणानि विद्यन्ते। विद्यार्थि प्रायः श्रवणे दर्शने च तीक्ष्णता कथं भवेत् इति मध्यमव्ययोगीय कथादृष्ट्या अत्र विचार्यते।

मध्यमव्यायोगे सूत्रधारेण प्रस्थावना कृता वर्तते। आदौ सूत्रधारः रङ्गमञ्जं प्रविशति। नान्द्यनन्तरं प्रेक्षकेभ्यः किञ्चित् वक्तुमारभते। तस्मिन् समये पुनः पुनः "भोस्तात को नु खल्वेषः" इति कश्चन शब्दः श्रूयते। तदा सः स्वीय कथनं स्थगयित्वा तत्र श्रूयमानः शब्दः कः इति सावधानेन श्रुत्वा स्वीय तीक्ष्णबुद्ध्या इत्थमवगच्छति -

**भोशब्दोच्चारणादस्य ब्राह्मणोऽयं न संशयः। त्रास्यते निर्विशङ्केन केनचित् पापचेतसा॥**

(म.व्या. श्लो. सं. ०२) इति। अर्थात् - भो इति शब्दस्य श्रवणात् उच्चारयमाणः कश्चन ब्राह्मण एव इति निश्चिनोति। यतो हि ब्राह्मणं विहाय अन्यः तादृशं प्रयोगं न कर्तुमर्हति। स च ब्राह्मणः भयरहितेन केनचित् पापचेतसा त्रास्यते इति च चिन्तयति। वाक्यस्य ध्वनिं श्रुत्वा "सः भीतः" इति वक्तृस्वभावं निश्चिनोति। ब्राह्मणस्य कश्चन भयं उत्पादयति इति चेत् सः अवश्यं कश्चन पापचेता एव भवितुमर्हति। ब्राह्मणस्य त्रासनेन पापमाप्नुमः इति तस्य भीत्यभावेन सः निर्विशङ्कः इति च वदति। एवं सूत्रधारेण श्रुतवाक्ये षडेव पदानि विद्यन्ते। परन्तु भो शब्दप्रयोगात्, तद्वाक्यध्वनेः, ब्राह्मणत्राणादि कारणैः तेन ऊहिताः अर्थाः न अल्पाः। इदमेव कुशाग्रबुद्धिस्वरूपम्। अतः ग्रन्थकर्ता वा आध्यापको वा पाठनसन्दर्भे कथं शब्दस्य प्रयोगं करोति, कुतः तस्यैव शब्दस्य प्रयोगः तेन कृतः, कीदृशध्वनिना अध्यापकः पाठयति? तस्य भावः कः? इत्यादि स्वयमेव ऊह्यम्।

एवं भीमसेनः यदा प्रथमतया घटोत्कचं पश्यति तदा तस्य पूर्णाकृतिम् अदृष्ट्वा तस्य प्रत्येकं शरीरभागाणां मुखं, दंष्ट्रा, नयनं, कण्ठस्वरः, भ्रूः, नासः, हनुः, केशः, उरः, गतिः, बाहुः, इत्यादि सम्पूर्णस्य वर्णनं कृत्वा सः राक्षस्याः लोकवीरयोश्च पुत्रः एव भवितुमर्हति इति तस्य स्वरूपं वर्णयति।

अनेन विद्यार्थिनः अधिगम्यमानं पाठ्यभागं कथं वीक्षणं कुर्युः इति स्पष्टमवगम्यते। अधिगम्यमान विषयं पूर्णरूपेण दृष्ट्वा तद्गतसूक्ष्मांशानामपि दर्शनं कुर्युः येन सः वास्तविकार्थं अवगन्तुं शक्नोति। इत्थं भासेन उक्तानां नाटकसंवादानां तीक्ष्णावलोकनेन कुशाग्रबुद्धिस्वरूपस्य विद्यार्थिनः अपेक्षितलक्षणस्य स्वरूपम् अवगन्तुं शक्यते।

# स्वप्नवासवदत्ते व्यक्तित्वाध्ययनम्

**डा. रा. चन्द्रशेखरः, उपाचार्यः,**

शिक्षाविभाग, राष्ट्रियसंस्कृतविद्यापीठम् , तिरुपतिः

**भासस्य परिचयः**

महाकविः भासः संस्कृतसाहित्यक्षेत्रे प्रख्यातेषु लब्धप्रतिष्ठेषु कविषु अन्यतमः आसीत् । कविकुलगुरुः कालिदासोऽपि 'मालविकाग्निमित्रम्' इति नाटके सूत्रधारमुखात् भासस्य प्रशंसां करोति। अनेन कतिचन विषयाः स्पष्टरूपेण ज्ञायन्ते यद् भासः अत्यन्तं प्रथितयशस्कः कविः आसीत्, तस्य नाटकानि तस्मिन् काले लोकप्रियाणि आसन्, पुनश्चायं कालिदासात् पूर्वतनः इति। श्रीहर्षस्य आस्थानविद्वान् बाणभट्टः हर्षचरिते भासस्य प्रशंसां करोति –

**सूत्रधारकृतारम्भैर्नाटकैर्बहुभूमिकैः ।**
**सपताकैर्यशो लेभे भासो देवकुलैरिव । (बाणः - हर्षचरितम्.५)**

कतिपयैरन्यैरपि संस्कृतकविभिरेतन्नामधेयमुदीर्य महामहिमशालित्वमस्योद्घोषितम् । तथाहि; अस्ति तावद् राजशेखरीयं पद्यम् –

**भासो रामिलसोमिलौ वररुचिः श्रीसाहसाङ्कः कविर्**
**मेण्ठो भारवि कालिदासतरलाः स्कन्धः सुबन्धुश्च यः ।**
**दण्डी बाणदिवाकरौ गणपतिः कान्तश्च रत्नाकरः**
**सिद्धा यस्य सरस्वती भगवती के तस्य सर्वेऽपि ते ।।**

प्रायः संस्कृतनाटकानि नान्द्या आरभ्यन्ते। परं भासस्य नाटकानि सूत्रधारेण आरभ्यन्ते। अस्य नाटकानि वेदिकायामभिनेतुमपि योग्यानि सन्ति। राजशेखरः काव्यमीमांसायां भासनाटकानां विषये कथयन् तत्र 'स्वप्नवासवदत्तम्' इति नाटकं सर्वेषु नाटकेषु प्रशस्ततममिति कथयति -

**भासनाटकचक्रेऽस्मिञ्छेकैः क्षिप्ते परीक्षितुम्।**
**स्वप्नवासवदत्तस्य पावकोऽभून्न दाहकः ।। (राजशेखरः - काव्यमीमांसा)**

एवमेव नाटकानामध्ययनेन भासः नाटकेषु हास्यरसं, शृङ्गाररसं, करुणरसं च अत्यधिकं प्रयुक्तवान् इति विज्ञायते। "भासो हासः" इति जयदेवस्य उक्तिः अपि अत्र स्मरणीया एव। एवं भासस्य नाटकानि सर्वजनप्रियाणि आसन्।

जयदेवकृतस्य प्रसन्नराघवाभिधस्य नाटकस्य प्रस्तावनायां पठ्यते –

**यस्याश्चोरश्चिकुरनिकरः कर्णपूरो मयूरो**
**भासो हासः कविकुलगुरुः कालिदासो विलासः।**
**हर्षो हर्षो हृदयवसतिः पञ्चबाणस्तु बाणः**

**केषां नैषा कथय कविताकामिनी कौतुकाय ।।**

**भाषा-शैली**

नाटकानां भाषा अत्यन्तं सरला सुललिता मधुरा च वर्तते। ईषत् संस्कृतज्ञोऽपि भासनाटकानि आनन्देन पठितुमर्हति। एवं भासस्य शैली आसीत्। भासस्य रचनायां ओज:प्रसादयो: सविशेषसमावेशो दृश्यते । अन्यच्च, अस्यां महती रसभावादिप्रदीप्ति:, अपूर्वं सङ्गीतलयमाधुर्यं दूरङ्गमा च कविकल्पना अवलोक्यते। मानवहृदयानुभूतिप्रदर्शने च भासो यदि नाम कविकुलगुरुं कालिदासमप्यतिवर्तते, यतो हि जगत्प्रकृतिवर्णननिपुणसम: खलु कालिदास:। विषयवैविध्येन ललितमधुरकथावस्तुकत्वेन च भासस्य रूपकाणां विशिष्टं किमपि स्थानमस्ति। भाषासौन्दर्यस्य रमणीय-नाटकीय-परिस्थितेश्च समुत्पादने असामान्यं खल्वस्य कौशलं पश्याम:। अर्धश्लोकं कञ्चन खण्डशो विभज्य नानापात्रमुखेन नानाखण्डोद्गारेण अनन्यसदृश: कविरेष:।

मुद्राराक्षसकर्तुर्विशाखदत्तस्यापि क्वाचित्की प्रवृत्तिरेषा दृश्यते । औपयिकम् अद: नूनं वाकोवाक्यगतस्य वेगस्य संवादनिष्ठस्य च चाकचिक्यात्मकचमत्कारस्य अत्यन्तम् अनुगुणायते। गद्य-पद्योभयरचनाचातुरीविचारेण काव्यशैल्याचार्यो भास: प्रतिभाति। काव्यालङ्कारसिद्धान्त शास्त्रिमतेन वैदर्भीरीतिमयी भासस्य कृति: किल ।

वैदर्भीलक्षणसाधकानि तु –

**श्लेष: प्रसाद: समता माधुर्यं सुकुमारता ।**
**अर्थव्यक्तिरुदारत्वमोज:कान्तिसमाधय: ।। (काव्यादर्शे १/४१)**

कश्चन महत: दु:खस्य विषयोऽपि वर्तते यत्, एतादृशस्य सुप्रसिद्धस्य नाटककारस्य जीवितविषये कालविषये वा न किञ्चिदपि ऐतिह्यम् उपलभ्यतेऽधुना । भास: स्वकृतिषु कुत्रापि स्वजीवनविषये नोल्लेखितवान्। तत्पश्चादागता: कवय: स्वकाव्येषु नाटकेषु च भासस्य नाम स्मृतवन्त: इत्येकमेवांशं मनसि निधाय भासस्य काल: निश्चीयते। चाणक्योपि भासकृतश्लोकं कुत्रचित् उल्लिखितवानिति दृश्यते। पुनश्च भास: प्रतिमानाटके बार्हस्पत्यार्थशास्त्रस्य उल्लेखं कृतवान्। तच्च चाणक्यात् बहुप्राचीनकालस्य ग्रन्थ: वर्तते। अत: भास: चाणक्यादपि प्राचीनतर: इति इतिहासकाराणामभिप्राय:। एतादृश: एतावत्पर्यन्तम् भास: कति ग्रन्थान् रचितवानिति तु न ज्ञायते। परं केरलदेशीयेन टि.गणपतिशास्त्रिमहोदयेन महता परिश्रमेण अन्विष्यमाणे त्रयोदश नाटकानि समुपलब्धानि। टि.गणपतिशास्त्रिमहोदय: तानि त्रयोदशनाटकानि १९१२ तमे वर्षे तिरुवनन्तपुरे अनन्तशयनग्रन्थमालात: प्रकाशितवान् ।

**स्वप्नवासवदत्तस्य कथासार:** –

स्वप्नवासवदत्तनाटके षड् अङ्का: विद्यन्ते । उज्जयिन्या: राज्ञ: चण्डमहासेनस्य अपरं नाम प्रद्योत:। तस्य पुत्री वासवदत्ता, तां वत्सराज: उदयन: परिणीतवान्। वत्सराज: विलासजीवनं यापयति स्म। अनेन कारणेन तस्य राज्यस्य कोशागार: रिक्त: आसीत्। परं तस्य मन्त्री यौगन्धरायण: राजानं सबलं चिकीर्षति स्म। यौगन्धरायण: चक्रवर्तिन: मगधराजस्य पुत्रीं पद्मावतीं य: परिणयति स: चक्रवर्ती भविष्यतीति जानाति स्म। अत: उपायं कृत्वा वासवदत्ता लावाणकगृहे दग्धा इति असत्यप्रचारं करोति। अनेन उदयन: अत्यन्तं खिन्न: भवति। तदा यौगन्धरायण:

पद्मावत्याः विवाहम् उदयनेन सह करोति । तेन उदयनः पुनः सशक्तः भवति। तत्पश्चात् ऐन्द्रजालिकेन मायया अन्तःपुरं दग्धमिव कृत्वा वासवदत्तां पुनः उदयेन सह मेलयति।

**स्वप्नवासवदत्ते प्रमुखपात्राणां व्यक्तित्वविचाराः**

**उदयनस्य व्यक्तित्वम्** –

वत्सराजः उदयनः अस्य नाटकस्य नायकः। अयं वीणावादनकलायां कुशलः, स्ववीणया सर्वान् वशीकरोति स्म। राज्यकार्येषु निश्चिन्तः कोमलस्वभाववान् च अयं "धीरललितप्रकृतिस्वभावनायकः" वर्तते। उच्यते हि – "निश्चिन्तो धीरललितः कलासक्तो सुखी मृदुः" इति । सः वासवदत्तायामतीवानुरक्तः आसीत्। परमिदानीं वासवदत्ता तेन सह नास्तीत्यतः तां स्मारं स्मारं विरहभावेन उन्मत्तवच्चेष्टते स्म। "इह तया हसितम्, इह तया सह कथितम्, इह तया सह पर्युषितम्, इह तया सह कुपितम्, इह तया सह शयितम्" इत्यादिभिः वचोभिः तां मुहुर्मुहुः स्मरति स्म। अनेन वासवदत्तायां विद्यमानः अनुरागः प्रद्योतते। तस्य विरहवेदनाम् अस्मिन् श्लोके द्रष्टुं शक्नुमः –

**नैवेदानीं तादृशाश्चक्रवाका नैवाप्यन्ये स्त्रीविशेषैर्वियुक्ताः।**
**धन्या सा स्त्री यां तथा वेत्ति भर्ता भर्तुस्स्नेहात् सा हि दग्धाऽप्यदग्धा ।। (स्वप्न.१.१३)**

अनेन श्लोकेन उदयनस्य हृदयसंवेदनशीलता सहजरूपेण ज्ञायते। ब्रह्मचारिणा उदयनस्य प्रशंसां श्रुत्वा तापसी वदति – "स खलु गुणवान् नाम राजा य आगन्तुकेनाप्येवं प्रशस्यते।" उदयनस्य सौन्दर्यं दर्शनीयं "शरचापहीनः कामदेवः" इति पद्मावत्याः दासी वर्णयति। उदयनपद्मावत्योः विवाहानन्तरं यद्यपि उदयनः पद्मावतीं प्रीणाति तथापि वासवदत्तां विस्मर्तुं न शक्नोति।

सौन्दर्यातिशयः, अद्वितीयकलाकुशलः, कोमलहृदयः, अतिमात्रानुरागी अयं वत्सराजः उदयनः। परं कतिचन दुर्बलताः अपि तस्मिन् वर्तन्ते। राज्ञे प्राशासनिकक्षमतायाः आवश्यकता अनिवार्या भवति। परमेतस्मिन् तादृशः गुणः नासीत्। अत एव सः मुहुर्मुहुः शत्रुभिः आक्रम्यते स्म। सम्पूर्णनाटकेऽस्मिन् सः वासवदत्तामेव स्मारं स्मारं रुदन् विलपति स्म। अस्मिन् नाटके विशिष्य वासवदत्तायाः उदयनस्य च विरहविचाराः एव प्रतिपादिताः सन्ति। उदयनः धीरललितव्यक्तित्वान् वर्तते।

**वासवदत्तायाः व्यक्तित्वम्** –

अप्रतिमसुन्दरी उज्जयनीराजस्य पुत्री वासवदत्ता आदर्शस्त्री आसीत्। समग्रे नाटके तस्याः आदर्शं वयं द्रष्टुं शक्नुमः। उदयनस्य प्राणवल्लभेयम् अनुरागापेक्षया कर्तव्येऽधिकं महत्त्वं प्रयच्छति स्म। वासवदत्ता त्यागबलिदानकर्तव्यनिष्ठादिषु सर्वेषामादर्शभूता आसीत्। यद्यपि उदयनं विहाय स्थातुमतीव कष्टमनुभवति सा, तस्यामपि विरहवेदना दरीदृश्यते तथापि उदयनस्य यशसे सा यौगन्धरायणस्य योजनामङ्गीकृतवती। पद्मावत्या सह वसन्ती सा अत्यन्तं सुशीला आसीत् । ईश्वरः अपि तां परीक्षते –

चेटी – अस्माकं भट्टिनी भणति महाकुलप्रसूता स्निग्धा निपुणेति इमां तावत् कौतुकमालिकाम् - अस्माकं भर्तुदारिकायै गुम्फत्वार्या।

वासवदत्ता – एतदपि मया कर्तव्यमासीत् । अहो अकरुणा: खल्वीश्वरा:।

एवम् वासवदत्ताया: त्यागयुतं व्यक्तित्वम् अस्या: व्यवहारेण परिवेशेन स्वभावेन च परिलक्षयितुं शक्यते।

**पद्मावत्या: व्यक्तित्वम् –**

मगधराजदर्शकस्य अनुजेयं पद्मावती। अनुपमरूपवती इयम्। वासवदत्ताऽपि अस्या: वर्णनं करोति – अभिजनानुरूपं खल्वस्या रूपम्। एवमेव विदूषक: उदयनश्च तस्या रूपवर्णनं कुरुत:। पद्मावती न केवलं रूपवती अपि तु मधुरभाषिणी च । "न हि रूपमेव, वागपि खल्वस्या: मधुरा" इति वासवदत्ता कथयति। एवमेव इयं धर्मप्रिया, उदारमनस्का, संवेदनशीला, वचनबद्धा च वर्तते। वासवदत्तया सह सखीव व्यवहरति। सत्यां राज्ञ्यां तस्याम् अहङ्कारलेशोऽपि न भवति। सहानुभूतिमती विनयशीला च इयम् अन्ते वासवदत्ताया: आगमनेन तस्या: चरणयो: पतित्वा क्षमां याचते। एवं प्रकारेण सौन्दर्यशीलनिरभिमानितोदारतासहानुभूतिविनम्रतादिभि: गुणै: समृद्धमस्ति पद्मावत्या: व्यक्तित्वम् ।

**यौगन्धरायणस्य व्यक्तित्वम् –**

वत्सराजस्य प्रधानसचिव: निष्ठावान् अमात्य: यौदन्धरायण: । बुद्धिमान्, स्वामिनिष्ठावान्, कुशलराजतन्त्रज्ञ:, नीतिकौशलानां च मूर्तिमान् आसीत्। तस्य बुद्धे: कारणेनैव उदयन: बन्धी सन्नपि विलासपूर्णजीवनं यापयति स्म। उदयनस्य विश्वास: यत् यावत् पर्यन्तं यौगन्धरायण: अस्ति तावत् पर्यन्तं कोऽपि किमपि कर्तुं न शक्नोतीति। एवमेव यौगन्धरायणोऽपि तदनुरूपं कार्यं करोति स्म। उदयनस्य सर्वविधसफलताया: प्रतीक: एव यौगन्धरायण: । स: विवेकशील: राजनीतिज्ञ: च आसीत्। वस्तुत: अस्य नाटकस्य सम्पूर्णसूत्रधार: यौगन्धरायण: इति वक्तुं शक्यते। मुद्राराक्षसे चन्द्रगुप्तं प्रति चाणक्यस्य यत् पात्रमासीत् तत् पात्रम् अत्र वत्सराजं प्रति यौगन्धरायण: वहति इति चेत् नातिशयोक्ति: भवेत्। स: न्यायनिष्ठ:, स्वामिनिष्ठ, वीर:, शूरश्चासीत्। सम्पूर्णजीवनमेव वत्सराजस्य उदयनस्य जीवनोद्धाराय समर्पितवान् । एवम् अस्य व्यवहारेण स्वभावेन च अस्य व्यक्तित्वं निरूपितम्।

**उपसंहार:**

भास: प्रस्तुत नाटके विविधपात्रै: जीवनादर्शमूल्यानि उपस्थापयामास। उदयन:, वासवदत्ता, पद्मावती तथा यौगन्धरायणश्च आदर्शमूल्यानां वाहका:। भास: मनुष्यजीवने विद्यमानानां गुणानां गरिमाणं स्वीचकार।

**गुणानां वा विशालानां सत्काराणां च नित्यश:।**
**कर्तार: सुलभा लोके विज्ञातारस्तु दुर्लभा: ।। (४.१०)**

एवं प्रकारेण वस्तुयोजना, चरित्रचित्रणं, संवाद:, रसपरिपाक:, प्रकृतिचित्रणं, भाषाशैली एवं मञ्चयोग्यता तथा जीवनदर्शनस्य व्याख्यानं इत्यादिभि: दृष्टिकोणै:, स्वप्नवासवदत्तम् न केवलं भासनाटकेषु अपितु समस्त संस्कृतनाट्यसाहित्ये महत्वपूर्णस्थानमावहति।

* * * * *

# भासनाटके राजनीतिः

**मुरलीकृष्णः ई** ,
शोधच्छात्रः, संस्कृतसाहित्यविभागः,
श्रीशङ्कराचार्यसंस्कृतविश्वविद्यालयः,
कालटि 683574
चलवाणी-8301902411

**उपोद्घातः**

संस्कृतसाहित्यजगति बहवो महाकवयः विद्वांसः स्वीयरचनाभिः लब्धप्रतिष्ठा अभवन्। तेषु प्रमुखः महाकविः भासः। यतः **नाटकान्तम् कवित्वम्** इति सूक्तिः प्रसिद्धा वर्तते । अपि च अयम् एव संस्कृतभाषायाः आद्यः नाटककर्ता अस्ति। भारतीयसमाजशास्त्रस्य स्पष्टावगमनाय देवभाषायां विरचितस्य साहित्यस्यानुशीलनं कर्तव्यम्। श्रेष्ठकविभिः विरचितानां काव्यनाटकादीनाम् अनुसन्धानेन स्वल्पप्रमाणेन अस्मत् पूर्वजैरार्जितस्य ज्ञानविज्ञानस्यावगमनं भवति। भासः तादृशः सुमहान् विद्वान् वर्तते। भासः १३ नाटकानि अरचयत्। एतानि नाटकानि तेन विविधानां पुराण-इतिहास-बौद्धकथानामाधारेण एव रचितानि। मनुस्मृतौ मनुना इत्थमुक्तं दृश्यते-

**एतद्देशप्रसूतस्य सकाशादग्रजन्मनः। स्वं स्वं चरित्रं शिक्षेरन् पृथिव्याः सर्वमानवाः॥ १॥**

विषयमिमं भासः स्वीयनाटकैः सर्वेभ्यः प्रदत्तवान्। अस्य रचनाशैल्याः वैशिष्ट्यं नाम सामान्यजनाः अपि सरलतया अवगमनसमर्थाः भवन्ति।

अस्य महाकवेः कालः मौर्याणाम् शासनकाले एव इति विदुषां मतं वर्तते। अतः तत्कालीन-राजनैतिकशासनविचाराः, सामाजिकपरिस्थितयः अस्य नाटकेष्वपि उपलभ्यन्ते इत्यत्र न भिन्नाभिप्रायः। राजकीयशासनव्यवस्थापनम् , अपराधिभ्यः दण्डनीतिः च राज्ञः धर्मो भवति। पुनः च तदानींतनकालस्य भौगोलिकस्थितेः अध्ययनाय च अस्याः कृतेः अनुशीलनम् करणीयम्। व्यासमहाभारतात् यद्यपि विविधकथासन्दर्भाः स्वीकृताः तथापि अनेन स्वीयप्रतिभया रचनासु नावीन्यम् आनीतं वर्तते। महाभारतात् नितरां भिन्नरीत्या अपि रचना कृता। प्रतिज्ञायौगन्धरायणम् , स्वप्नवासवदत्तम् , कर्णभारम् , प्रतिमानाटकम् , अभिषेकनाटकम् , दूतघटोत्कचम् , पञ्चरात्रम् इत्यादिषु नाटकेष्वपि राजनीतिसन्दर्भाः आयान्ति। भासः तादृशः नैकशास्त्रप्ररूढमूलधीः आसीत्। अत एव सः नीतियुक्तान् अंशान् स्वकीयरचनासु बहुधा सन्निवेशितवान्। राजनीतौ तु आर्थिक-अमात्य-सेना-गुप्तचर-दूत-शिक्षादिव्यवस्थाः कथं प्रकारेण आसन्।

**राजनीतिः**

महाभारते विदुरनीतिः, भगवद्गीता च नीतिविषये विशेषपरिचर्चां प्रस्तौति। मनुष्यजीवनस्य प्रत्येकस्मिन् सन्दर्भे प्रत्येकव्यक्तिभिः किम् करणीयम्? कीदृशः व्यवहारः कर्तव्यः? कथं जीवनीयम् इति नीतेरन्तर्गतविषयः भवति। उचिते समये उचिते स्थाने उचितस्य कार्यस्य करणाय या कला अपेक्षिता अस्ति। सा एव कला नीतिपदवाच्या वर्तते। अद्यतन राजकीयशासनकाराः विविधाः समस्याः सम्मुखीकर्वन्ति। तासां समस्यानां परिहाराय एव साहित्यादीनाम् अनुसन्धानं कर्तव्यम्। तथा च मनुस्मृतौ राज्ञः आवश्यकताविषये इत्थमुक्तं वर्तते।

**अराजके हि लोकेऽस्मिन् सर्वतो विद्रुते भयात्।**
**रक्षार्थमस्य सर्वस्य राजानमसृजत् प्रभुः॥ ७.३॥**

सामाजिकजीवनस्य अत्यन्तलघुतमं घटकम् एव गृहं तत्र गृहनाथः मुख्यः वर्तते। तथा ग्रामस्य ग्रामप्रमुखः। नगरस्य नगरसचिवः। क्रमेण देशस्य तु राजा भवति नाथः, अथवा भरणकर्ता। राजा तु तस्य भरणपोषणकार्यं सप्तसु अङ्गेषु करोति। उक्तं च याज्ञवल्क्यस्मृतौ-

**स्वाम्यमात्या जनो दुर्गं कोशो दण्डस्तथैव च।**
**मित्राण्येताः प्रकृतयो राज्यं सप्ताङ्गमुच्यते॥**

एवं तर्हि राजा कीदृशः भवेत् इति चेत् सः धर्मज्ञः स्यात्। धर्मलक्षणम् इत्थम् अस्ति।

**धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।**
**धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्॥** इति ।

अस्यैव श्लोकस्य समानार्थकश्लोकाः भगवद्गीतायां दैवासुरसम्पद्विभागयोगे षोडशाध्याये प्रथमतः तृतीयश्लोकं यावत् । यथा -

**अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः। दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम्॥**
**अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम्। दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम्॥**
**तेजः क्षमा धृतिः शौचम् अद्रोहो नातिमानिता। भवन्ति सम्पदं दैवीमभिजातस्य भारत॥**

अनेन अवगम्यते यत् राज्ञा कीदृशेन भवितव्यमिति।

**भासनाटकेषु राजनीतिः**

महानाटककारः भासः स्वीयेषु विविधनाटकेषु राजनीतिविषयान् संलग्नवान् अस्ति। सत्यपालनस्य उदाहरणं प्रतिमानाटकात् ज्ञातुं शक्यते। भरतः पितुः दशरथस्य तथा ज्येष्ठस्य रामस्य च विषये इत्थं कथयति -

**अयोध्यामटवीभूतां पित्रा भ्रात्रा च वर्जिताम्।**

**पिपासार्थेऽनुधावामि क्षीणतोयां नदीमिव॥** इति।

अपरत्र देवकुलिकः कथयति -

**येन प्राणश्च राज्यं च स्त्रीशुल्कार्थे विसर्जिताः।**
**इमां दशरथस्य त्वं प्रतिमां किं नु पृच्छसे॥**

अत्रत्य श्लोकेन अवगन्तुं शक्यते यत् राजा दशरथः स्वस्य सत्यरक्षणाय स्वजीवनम् अपि त्यक्तवान् इति। राजा सर्वदा सत्यशीलः स्यात्। रामोऽपि पितृवाक्यपालनाय अयोध्यां परित्यक्तवान्। राजा बलवान् शूरः सदा एकलक्ष्यः स्यात् इति प्रतिज्ञायौगन्धरायणे नाटके यौगन्धरायणः इत्थं कथयति।

**व्रीलितो वञ्चनां प्राप्य मानी सत्त्वमुपाश्रितः। शूरश्चैकायनस्थस्य किमन्यत् प्रतिपद्यते॥**

महासेनः वत्सराजविषये इत्थं वर्णयति। अनेन श्लोकेन राजा कीदृशः स्यात् इत्यपि अवगम्यते।

**अग्निः कक्ष इवोत्सृष्टो दहेत् कार्त्स्न्येन मेदिनीम्।**
**अस्य मे शासनं दीप्तं विषयान्तेऽवसीदति॥**

राजा न केवलं शौर्यवीर्यः, अपि तु सः सहृदयः कलारसिकः च भवेत् इति अयं श्लोकः सूचनां ददाति।

**श्रुतिसुखमधुरा स्वभावरक्ता करजमुखोल्लिखिताग्रघृष्टयन्त्री।**
**ऋषिवचनगतेव मन्त्रविद्या गजहृदयानि बलाद्वशीकरोति॥**

राजा तु अवश्यं विद्वत्तायां अग्रगण्यः स्यात् इति अनेन श्लोकेन भासः प्रकटयते।

**अर्थशास्त्रगुणग्राही ज्येष्ठो गोपालकः सुतः।**
**गान्धर्वद्वेषी व्यायामशाली चाप्यनुपालकः॥**

स्वप्नवासवदत्तनाटके तु राज्ञः नयचातुरीविषये विविधानि उदाहरणानि द्रष्टुं शक्यन्ते। सैनिकबलसम्पादनाय राजा विविधान् उपायान् परिशीलयति। तदर्थं पुर्नविवाहः एकः मार्गः। राजा उदयनः पद्मावतीं सपत्नीरूपेण स्वीकरोति। पश्चात् सः शत्रूणाम् उपरि विजयं प्राप्नोति। इदं कार्यं वत्सराजस्य उदयनस्य मन्त्री यौगन्धरायणः एव रचयति। राजा कीदृशः उत्तमः तथैव उत्तमाः चतुराः स्युः मन्त्रिणः अपि। तदा एव राज्यसंरक्षणं शासनं च सुलभतया शक्यते। उदयनस्य यौगन्धरायणः केवलः मन्त्री न, अपि तु रुमण्वान् अपि पत्नीवियोगदुःखितस्य उदयनस्य समाहितत्वम् आनयति। परिसान्त्वनं च करोति।

**अनाहारे तुल्यः प्रततरुदितक्षामवदनः शरीरं संस्कारं नृपतिसमदुःखं परिवहन्।**
**दिवा वा रात्रौ वा परिचरति यत्नैर्नरपतिं नृपः प्राणान् सद्यस्त्यजति यदि तस्याप्युपरमः॥**

राजा तु शक्तिशाली स्यात्। अपरदेशस्य राजानः अवश्यमेव अस्य अधीने स्युः। अथवा सुहृद्मण्डले भवेयुः। प्रतिज्ञायौगन्धराणे श्लोकमिदं पश्यत। यथा महासेनः स्वपत्नीसमीप इत्थं वदति।

**अस्मत्सम्बद्धो मागधः काशिराजो वाङ्गः सौराष्ट्रो मैथिलः शूरसेनः।**

**एते नार्थैर्लोभयन्ते गुणैर्मां कस्त्वेतेषां पात्रतां याति राजा॥**

अर्थात् एतादृशसामन्तराजाः न सन्ति चेत् राजा इति वक्तुं पात्रता अपि न भवेत् इति। अनेन तदानींतनकालस्य भौगोलिकस्थितिरपि ज्ञातुं शक्यते। अपरत्र शत्रूणाम् उपरि जयस्वीकरणाय राजानम् उत्साहिनं करोति -

**भिन्नास्ते रिपवो, भवद्गुणरताः पौराः समाश्वासिताः**
**पार्ष्णी यापि भवत्प्रयाणसमये तस्या विधानं कृतम्।**
**यद्यत् साध्यमरिप्रमाथजननं तत्तन्मयानुष्ठितं**
**तीर्णा चापि बलैर्नदी त्रिपथगा, वत्साश्च हस्ते तव॥**

अस्मिन् श्लोके शत्रुसैन्यस्य पराजयाय तेषां विभाजनं (भिन्नता) करणीयम्। तथा च प्रजानां ऐक्यता च सम्पादनीया। शत्रूणां नाशनाय यत् यत् करणीयं तत्सर्वम् अनुष्ठीयताम् इति नीतिः। राज्ञः धर्मविषये यौगन्धरायणमुखात् इत्थं वाचयति भासः। कश्चन राजा स्यात् तथापि बलात्काररूपेण न कर्तव्यं इति सूचना अत्र दीयते। यथा-

**भारतानां कुलं जातो विनीतां ज्ञानवाञ्छुचिः। तन्नार्हसि बलाद्धर्तुं राजा धर्मस्य देशिकः॥**

**उपसंहारः**

भासनाटकेषु प्रसिद्धानि त्रीणि एव नाटकानि स्वीकृत्य तत्र विद्यमानराजनीतिविषयाणां दिङ्मात्रमुदाहृतम्। अनेन लघुशोधपत्रेण ज्ञातं पुरातनकालीन राजनीतिविचाराः आधुनिककालेन अपि नितराम् उपयोगिनो वर्तन्ते। सैनिकशक्तेः आवश्यकता। कश्चन शासनकर्ता स्यात् किन्तु सः कदापि बलप्रयोगेण कार्यकरणं न कुर्यात्। भासनाटकेषु प्रयुज्यमानानां नाम्नां परिशीलनेन राजा सैनिकशक्तियुक्तः भवेत् (महासेनः) प्रजाहिततत्परः स्यात् (वत्सराजः)। वैयक्तिकरीत्या राजा धर्मनिष्ठः ज्ञानी, धीरः, कलाप्रियः शीलयुक्तः च स्यात् इति अवगम्यते।

**ग्रन्थसूची**

1. डा. नेमिचन्द्र शा, महाकवि भास, मध्यप्रदेश हिन्दी ग्रन्थ अकादमी, 1972.
2. याज्ञवल्क्यस्मृतिः, गंगासागर राय हिन्दी व्याख्या, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, पुर्नमुद्रण 2015
3. शिवराज आचार्यः, मनुस्मृतिः, चैखम्बा विद्याभवन, वाराणसी, 2017.
4. भगवद्गीता, देवी बुक् स्टाल कोडुङ्ङल्लूर, 2017
5. भासनाटकचक्रम् आचार्य रामचन्द्र मिश्र चैखम्बा प्रकाशन वाराणसी भाग-2

# कवि मंगलेश डबराल के साहित्य में सामाजिक आन्दोलन

**Dr. Sathyanarayana HK**
Asst. Prof. in Hindi
The Madras Sanskrit College
84, R.H. Road, Mylapore, Chennai

साहित्य अनादिकालसे ही मनुष्य जातिके लिए नित्य–चिरंतन स्फूर्तिका स्रोत बना हुआ है। भारतीय साहित्य केवल मनोरंजनको लक्ष्य करके नहीं है अपितु उसे समग्र भारतके विभिन्न धर्म व जातिकी विविध संस्कृतिके ऐतिहासिक दस्तावेज भी माना जाता है। साहित्यमें अनादिकालसे लेकर आजतकके भरतखण्डका एवं यहाँके जनांगीय विश्वास, रीति रिवाजें, आचार–विचार, आशा–आकांक्षाएँ, सुख–दुःख, स्वप्न–कल्पनाएँ, नीति–प्रीति, साहस–साधनाएँ, अभिरुचि–अभिप्राय, ज़िंदगीकी गति–स्थिति, दिक्–दिशाओंसे संबन्धित विषय सूच्य रूपसे या बिंबात्मकताके रूपमें या फिर प्रकट रूपसे अभिव्यक्त होते आ रहे हैं।

कोई भी साहित्य उसके रचनाकार मात्रकी अभिव्यक्ति न होकर समग्रराष्ट्र एवं तत्कालीन जनताकी सामूहिक धारणा बनकर जनमानसमें सदैव बहता रहता है। तुलनात्मक साहित्य भी इससे भिन्न नहीं है। आधुनिक हिन्दी साहित्य विधाओंमें तुलनात्मक साहित्यका प्रमुख स्थान है। तुलनात्मक साहित्यकी भी अन्यान्य शाखाएँ हैं, जैसे "तुलनात्मक समाज–विज्ञान और साहित्य", "सामाजिक यथार्थता और तुलनात्मक साहित्य", "तुलनात्मक साहित्य और प्रगतिवादी चेतना", "सामाजिक आंदोलन और तुलनात्मक साहित्य", "भ्रष्टाचार विरोधी आंदोलन और तुलनात्मक साहित्य" आदि।

आजकल तुलनात्मक साहित्य रचनाएँ खूब हो रहीं हैं। यह आत्माभिव्यक्ति की प्रवृत्तिका विस्तार है। तुलनात्मक साहित्यकी सृष्टि जो अत्यंत सीमित दायरेमें आरक्षित थी, वह अब नई स्थितियोंमें व्यापक दायरेमें विस्तृत हो गयी है। इस समयका महाकाव्य एक महाकवि नहीं रचा रहा, हजारों कवि रच रहे हैं। जीवनके विविध विषयोंपर हज़ारों रंगोंमें, हज़ारों रूपोंमें कृति व कविताएँ प्रकट हो रही हैं। हज़ारों फूल खिल रहे हैं और अपनी गंध बिखेर रहे हैं। इसतरह वर्तमान भारतके प्रसिद्ध साहित्य–शिल्पियोंमें श्री मंगलेश डबरालका नाम उल्लेखनीय है। वे अंतरराष्ट्रिय ख्यातिके कवि हैं, लेखक हैं, पत्रकार हैं और एक परिपूर्ण

आलोचक भी। श्री डबरालजीका जन्म 16 मई 1948 को उत्तराखण्डके पहाड़ी इलाका टिहरी गढ़वालके काफलपानी गाँवमें हुआ था। वे "हिन्दी पेट्रियट", "प्रतिपक्ष" और "आसपास", "पूर्वग्रह", "अमृत प्रभात" आदि पत्रिकाओंके सहायक संपादक एवं "जनसत्ता", "सहारा समय", "दिल्ली मैगज़ीन" आदि पत्रिकाओं के संपाद भी रहे। वे "हम जो देखते हैं" (साहित्य अकादमी पुरस्कार प्राप्त रचना), "आवाज भी एक जगह है", "मुझे दिखा एक मनुष्य", "पहाड़ पर लालटेन", "घर का रास्ता", "आपण जे पाहतो" (मराठी रचना) नामक कुल 6 काव्य–संग्रहोंके रचयिता हैं और "कवि का अकेलापन" उनकी तुलनात्मक गद्य रचना है।

मंगलेश डबरालजीकी रचना "कवि का अकेलापन" को तुलनात्मक व आलोचनात्मक कृति माना जा सकता है। तुलनात्मक साहित्यकारकी अपनी एक दृष्टि होती है। वस्तुतः तुलनात्मक कृतिमें व्यक्त अभिप्राय व कल्पना–भावना–धारणाएँ साहित्यकारके अपने ही होते हैं। यही सिद्धान्त डबरालजीके विषयमें भी ग्राह्य है। स्वाभाविक रूपसे सहृदयी पाठक साहित्यके अंदर स्वयंको पहचाननेकी और उसमें प्रतिपादित आदर्श व तथ्योंका अनुसरण करनेकी एवं उसके प्रभावसे स्वयंको रूपायित करनेकी कोशिशमें लगा रहता है।

डबरालजीकी कविताओंमें पहाड़ी संस्कृति, आचार–विचार जैसे सामाजिक यथार्थताके दर्शन होते हैं। सामाजिकोंकी कल्पनाएँ एवं सपने कविताओंके जीवन हैं। अंधेरेमें मनुष्यका जीवन किस तरह होता है, इसका चित्रण उनकी "पहाड़ पर लालटेन" कृतिमें किया गया है। उनकी कृतियोंमें समाजकी हलचलका विवरण है। बर्फ़का गिरना, नदीका बहना आदि प्राकृतिक घटनाएँ होनेपर भी डबरालजीकी रचनाओंमें उसकी आवाज़ें सुनी जा सकती हैं। बच्चे और स्त्री घरकी खिड़कीसे "आखिरी वारदात"को देखकर थरथर काँपते हैं। वे समाजके भ्रष्ट व कलंकित लोगोंके दुःस्वप्नके शिकार हो जाते हैं। अकेला आदमी असहायताके कारण अपने अगले दिनकी दिनचर्याको और किसी दिन करनेकी इच्छासे सबसे अच्छी तारीख़की तलाशमें समाजमें घूमता हुआ दीख पड़ता है।

साहित्य जीवन और समाजसे निरपेक्ष नहीं होता, वह उसमें हस्तक्षेप करता है और अपने वैयक्तिक अभिव्यक्तिके दबावोंके साथ सामाजिक दायित्वोंकी आवश्यकताके अनुसार भी ढालता है। इस संदर्भमें डबरालजी वर्तमान कालकी सामाजिक यथार्थताको तुलनात्मक साहित्यसे जोड़कर देखते हैं। वे कहते हैं "ब्रिटिश हुकूमत कालमें साहित्य किस तरह लोक जागरणका माध्यम बना, भक्तिकालमें काव्य–साहित्य किस तरह लोक जागरणका माध्यम बना यह सर्वविदित है। लेकिन दुःखद बात यह है कि हमारे वर्तमान समयमें वैश्विक मानव समाज

और उसके अंतर्गत भारतीय मानव समाज जिस प्रकारके संकटमें फंस गया है और अमानवीयकरणकी दिशामें दौड़ रहा है वह भयावह है"।

डबरालजीकी रचनाओंमें कहीं–कहीं पूँजीवादी साम्राज्यवादपर व्यंग्य दिखता है। दरअसल पूँजीवादी–साम्राज्यवाद पतनशीलताकी चरम अवस्थामें पहुँच गया है। भारतमें तो सामंती मूल्य और संस्कारोंकी जड़ताने इसे और गहरा दिया है। डबरालजीके साहित्यमें प्रगतिवादी चेतना भी भरी है। मनुष्य प्रजाति और संपूर्ण पृथ्वीके विनाशकी चिंता गहराने लगी है। यही वे स्थितियाँ हैं जिनमें हम आमतौर पर मनुष्य व समाज तथा उसकी विभिन्न सत्ताओंकी संवेदनहीनताकी शिकायत करते पाए जाते हैं।

मंगलेशके तुलनात्मक साहित्यमें संवेदनाको तलाशनेकी आवश्यकता नहीं होती। मगर उनका कहना है कि संवेदनाकी सबसे घनीभूत संरचनामें भी यदि संवेदनाकी तलाश करनी पड़े तो इस समयकी विकराल भयावहताके बारेमें क्या कहा जाए ? डबरालजी सामाजिक और भ्रष्टाचार विरोधी आंदोलनके समर्थनमें कहते हैं कि जिस व्यवस्थामें मानव प्रजातिका तीन चौथाईसे अधिक तबाह हाल स्थितियोंमें जीनेको विवश हो और शेष एक चौथाई लोग सुख–सुविधाओंके पहाड़ पर बैठे अमानवीय भोगवाद–भ्रष्टाचारमें लिप्त हो वे भी कोई उन्नत सांस्कृतिक जीवन नहीं जी रहे हो, उस व्यवस्थाके विरोधमें जन जागरण अभियान आज भी वैसी ही ज़रूरत बन गया है जैसे भक्तिकाल या नव जागरणकालमें बना था।

जाहिर है कि जन जागरण अभियानका मुद्दा ऐसे साहित्यकी माँग करता है जो व्यापक जन–गणको जाग्रत करे, सक्रिय करे, आंदोलित करे। इसलिए बहुतसे विद्वान् कवि और समीक्षक साहित्य हो या तुलनात्मक साहित्य, उसे लोकानुमुखी और लोक प्रतिबद्ध होनेकी बात करते हैं। सामंती युगका लोक अलग था, आजका लोक अलग है। मुक्तिके इस समयका मार्ग भी अलग है। इस समय विद्यमान जनविरोधी व्यवस्थासे मुक्तिका मार्ग श्रमजीवी जनगणकी जाग्रतिसे होकर गुजरता है। इसलिए आजकलके साहित्यकार और उनकी कृतियाँ विशेषकर तुलनात्मक साहित्यिक रचनाएँ भ्रष्टाचार विरोधी, सामाजिक आंदोलन एवं प्रगतिवादी चिंतनको स्वीकार करते हैं और इसी दायित्वबोधके साथ साहित्यकी रचना होती जा रही है। साहित्यकार भी इस दायित्वको साहित्य–रचनाकी केन्द्रीयधारा बनाकर साहित्यको फिरसे हाशिये पर नहीं जीवनके केन्द्रमें ला रहे हैं। इस दृष्टिसे देखा जाए तो साहित्यकार **मंगलेश डबराल**की रचनाएँ उक्त दायित्वको निभानेमें अग्रसर हैं।

डबरालजीका कहना है कि मात्रात्मक विस्तारकी तुलनामें गुणात्मक विकास अधिक सन्तोषजनक नहीं है। तुलनात्मक साहित्य लिखे खूब जा रहे हैं, लेकिन अभी पढ़े बहुत कम जा रहे हैं। यूँ तो समग्र परिस्थितियाँ इसके लिए जिम्मेदार हैं, साहित्यकारके सृजनकौशल व साहित्यकी गुणवत्तामें न्यूनता, उसकी आकर्षण क्षमता और इसके असरमें कमियाँ भी कारण है। बेहतरकी सदा गुँजाइश तो रहती है, साथ–साथ सृजनशीलता सदैव ही इस हेतु प्रयत्नरत भी रहती है।

1960वें दशकके उत्तरार्ध एवं 1970वें दशकके प्रारंभमें हुए सामाजिक–राजनैतिक बदलावसे प्राप्त स्फूर्तिके कारण डबरालजी स्वयं प्राचीन भारतीय साहित्यकी शास्त्रीयता और छूटी हुई बुनियादी आधुनिकताके बीच जोड़नेवाली संवेदनशीलताका प्रतिनिधित्व करते हैं। अपनी कृतिमें नागार्जुनकी कविता "तेरी खोपड़ी के अंदर"के बारेमें लिखते हुए कहते हैं "नागार्जुनने ऐसी ही एक घटनाको इसतरह लिख दिया है कि वह कविता अपनेमें एक घटना बन गयी है। इसका रचनाकाल 1982 है, लेकिन बाबरी मस्जिदके विध्वंसके वर्ष 1992 में भी वह सच थी और उसके कई वर्ष बाद अब भी हम उसे जगह–जगह घटित होता हुआ देखते हैं। यह कविता एक ग़रीब रिक्शेवालेकी कहानी है जो सांप्रदायिक आधारपर बंटते हमारे समाजमें रोज़ी–रोटीके लिए तरस गया है, क्योंकि मुसलमान होने और अपनी पहचानके बाहरी संकेतोंकी वजहसे उसके रिक्शेपर कोई हिन्दू नहीं बैठता"। यह तो बीसवीं शतीके सामाजिक आंदोलनका एक नमूना था। इसतरह सामाजिक घटनाओंको भी तुलनात्मक साहित्यमें उतारनेमें मंगलेश डबराल सिद्धहस्त हैं।

डबरालजीकी "लड़की और अंधा आदमी" "गाता हुआ लड़का", "पागलों का वर्णन" आदि कविताएँ दुःखांत हैं और पाठकोंका मन छू लेती हैं। उन्होंने इस तरहकी सामाजिक यथार्थताको पाठकोंके सामने बिछानेवाली बहुतसी कविताएँ लिखी हैं। वे अपनी साहित्यिक रचनाओंका यथार्थके साथ सामाजिक हलचलोंकी तुलनाकर करते हैं। इतना ही नहीं बल्कि उनकी कुछ कविताएँ तूफान पैदा करती हैं। उनकी कविताओंमें सार्वकालिकताकी छटा लक्षित होती है। प्रभावात्मकता पैदा करनेवाली इनकी रचनाओंमें सामाजिकता और समन्वयताकी झलक मिलती है। डबरालजीको एक सफल तुलनात्मक साहित्यकार इसलिए कहा जा सकता है, क्योंकि उनके साहित्यमें सामाजिक आंदोलनकी प्रेरणा फूटकर भर पड़ी है।